सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

५८ वर्षे
३-४ अङ्कौ

मार्गशीर्ष-फाल्गुन-पूर्णिमे
दिसम्बर-मार्च, २००३-२००४ ई.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

५८ वर्षे
३-४ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
दिसम्बर-मार्च, २००३-२००४ ई.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. अशोककुमारकालिया, कुलपतिः, अध्यक्षः

१. **प्रो. श्रीकान्तपाण्डेयः**, द्वितीयः वेदवेदाङ्गसङ्कायाध्यक्षः

२. **प्रो. रामपूजनपाण्डेयः**, दर्शनसङ्कायाध्यक्षः

३. **प्रो. नरेन्द्रनाथपाण्डेयः**, साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **प्रो. राजीवरञ्जनसिंहः** श्रमणविद्या-सङ्कायाध्यक्षः

५. **प्रो. कृष्णचन्द्रदुबे**, आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः**, संयोजकः

❖ ❖ ❖

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी - २२१००२

मुद्रकः —

श्रीजी प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००२

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१. **समासशक्तिविमर्शः**
डॉ. राममनोहरमिश्रः २०९-२१८

२. **पाणिनिव्याकरणे सूत्रसमीक्षा**
प्रो. बाँकेलालमिश्रः २१९-२२८

३. **'ङेर्यः' इति सूत्रार्थवर्णनप्रकारः**
डॉ. के.वि. सोमयाजुलुः २२९-२३२

४. **द्विकर्मकधातुसमीक्षा**
डॉ. भगवतशरणशुक्लः २३३-२४२

५. **ऋग्वेदे सृष्टितत्त्वविमर्शः**
डॉ. राममूर्तिचतुर्वेदी २४३-२५४

६. **आचार्यजयन्तभट्टाभिमतनिर्विकल्पकविचारः**
डॉ. का.इ. धरणीधरः २५५-२५८

७. **व्याप्तिज्ञानप्रतिबन्धकोपाधिविवेकः**
डॉ. कमलेशमिश्रः २५९-२६२

८. **नैयायिकमतानुसारिकारणस्वरूपविचारः**
डॉ. महेशझाः २६३-२७०

९. **तन्त्रागमप्रामाण्यविमर्शः**
डॉ. परमात्मादुबे २७१-२८०

१०. **विश्वेशाङ्गीकारे सांख्यदर्शनस्याक्षेपानौचित्यम्**
डॉ. (श्रीमती) बीना श्रीवास्तवा २८१-२८६

११. **औचित्यप्रस्थानसमीक्षणम्**
डॉ. छोटेलालत्रिपाठी २८७-२९८

१२. **औपम्यविवेकः**
डॉ. विजयकुमारपाण्डेयः २९९-३०६

लघु-ग्रन्थमाला

१. **सामान्यनिरुक्तिवादार्थः** १-५८

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५८ वर्षे	मार्गशीर्ष-फाल्गुन-पूर्णिमे, वि.सं. २०६०	३-४ अङ्कौ

समासशक्तिविमर्शः

डॉ. राममनोहरमिश्रः
उपाचार्यः, व्याकरणविभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये, वाराणसी

***

समर्थः पदविधिरित्यधिकारसूत्रात्[१] सामर्थ्ये एव समासः, न तु असामर्थ्येऽन्यथा 'भार्या राज्ञः पुरुषो देवदत्तस्य' इत्यत्रापि राज्ञः पुरुष इति पदयोः समासापत्तिः। अत एवोक्तं भाष्ये[२]—'समर्थग्रहणं किमर्थम्, भार्या राज्ञः पुरुषो देवदत्तस्येति'। तच्च सामर्थ्यमेकधर्मावच्छिन्ननिरूपितैकशक्तिमत्त्वरूपैकार्थीभावः। एकपदेऽपरपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपा निरूप्यनिरूपक-भावापन्नविषयताशालिशाब्दबोधप्रयोजकाकाङ्क्षाशालित्वरूपा वा व्यपेक्षा इति विचिकित्सायामेकार्थीभाव एव सामर्थ्यमिति शाब्दिकानां राद्धान्तः। उक्तञ्च भाष्ये[३]—'एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वेति'। व्याख्यातञ्च[४] कैयटेन—'यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपपादानाद् व्यर्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः। परस्पराकाङ्क्षारूपा व्यपेक्षा'।

एवञ्च पक्षद्वयमुपस्थाप्य व्यपेक्षापक्षं दूषयता पतञ्जलिना भणितं समर्थः पदविधिरिति सूत्रभाष्ये[५]—'अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः'। एवञ्च शाब्दिकानां नये एकार्थीभाव एव समासविधानात् समासस्थले राजपुरुषादौ विशिष्टे शक्तिस्तत्र पदानि निरर्थकानि, पदेषु वर्णवत्। उक्तञ्च[६] कौण्डभट्टेनापि—'पदे वर्णवद् वृत्तौ पदानामानर्थक्यमित्यर्थः'। व्याख्यातञ्च पञ्चोलिना तत्रैव प्रभायाम्—

१. पा.सू. २.१.१; २. महाभा. २.१.१; ३. तत्रैव।
४. प्रदीपः-२.१.१; ५. महाभा. २.१.१।
६. वै.भू.सा.—समासशक्तिनिर्णयः, पृ.सं. २६०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'शक्तरामादिपदघटकरेफादिवर्णानामिव वृत्तिघटकपदानामप्यानर्थक्यमिति भावः। अन्यथा तत्र पदानामर्थवत्त्वस्वीकारे तुल्ययुक्त्या वर्णानामप्यर्थवत्त्वापत्तिरिति भावः। अत्र पक्षे वृत्तिघटकेषु पदेषु अर्थवच्छब्दनिमित्तकं कार्यं तु प्राग्भाविनमर्थमादाय, प्रत्ययोत्तरपदयोश्चेत्यादिशास्त्रारम्भसामर्थ्याद्वा भवत्येवेति बोध्यम्। तेन 'महाबाहुः, सुपन्था' इत्यादीनां सिद्धिः।

अत्राक्षिपन्ति नैयायिकमीमांसकादयः समासघटकराजादिपदानां प्रत्येकं नृपादिषु पृथक्शक्तेः राजा वदति, राजानं प्रणमति, पुरुषोऽस्ति, पुरुषमानयेत्यादौ च नृपादिविषयकशाब्दबोधान्यथानुपपत्त्यावश्यक्लृप्ततया राजपुरुषादिसमासेऽपि प्रत्येकपदनिरूपितया शक्त्या लक्षणया वोपस्थितयोरर्थयोः परस्परमन्वये बुभुत्सितार्थविषयकशाब्दबोधसम्भवाद् राजपुरुषादिसमासे राजसम्बन्धिपुरुष-निरूपितैकाऽतिरिक्ता शक्तिः समुदाये नाङ्गीकरणीया, अनन्यलभ्यो हि शब्दार्थ इति न्यायात्। अत्र च राजपुरुषरूपार्थयोः राजपुरुषपदाभ्यामुपलभ्यत्वेन तत्र समुदायशक्तिकल्पनमनुचितम्। अत एव कृत्तद्धितसमासाश्चेति सूत्रे समासग्रहणमपि चरितार्थम्, अन्यथा समुदाये शक्तिसत्त्वे वृत्तिमत्त्वरूपार्थवत्त्वस्य सत्त्वादर्थवत्सूत्रेणैव प्रातिपदिकत्वे सिद्धे तत्र समासग्रहणमनर्थकमेव स्यात्। तस्मात् समुदाये शक्तिस्वीकरणं निरर्थकम्।

राजपुरुष इत्यादौ तु राजपदादेः राजसम्बन्धिनि लक्षणा तथा च राजसम्बन्धवदभिन्नः पुरुष इति शाब्दबोधः। एवञ्च ऋद्धस्य राजपुरुष इति न प्रयोगापत्तिः, राज्ञः पदार्थैकदेशत्वेन तत्र पदार्थान्तरस्यान्वयासम्भवः, पदार्थः[1] पदार्थेनाऽन्वेति न तु पदार्थैकदेशेनेति न्यायविरुद्धत्वात्। न चैतस्मिन् मते 'घनश्याम' इत्यत्र सदृशरूपार्थप्रतीतये इवादिशब्दप्रयोगापत्तिरिति वाच्यम्, घनशब्दस्य घनसदृशे लक्षणास्वीकारेण लक्षणयैवोक्तार्थतया उक्तार्थानामप्रयोग इति न्यायेनेवादीनामप्रयोगात्।

एवं समर्थः पदविधिरिति सूत्रस्थं सामर्थ्यं यद्येकार्थीभावात्मकं स्यात्तदा 'सुबामन्त्रिते पराङ्गवत्स्वरे'[2] इति सूत्रेऽपि समर्थपदानुवृत्त्या 'द्रवत्पाणीशुभस्पती' इत्यत्र सुबामन्त्रिते इत्युक्तसूत्रस्य प्रवृत्तिर्न स्यात्, तत्र एकार्थीभावात्मक-सामर्थ्याभावात्। उक्तस्थले एतत्सूत्राप्रवृत्तौ शुभधातोः क्विपि शुभ इति षष्ठी सुबन्तस्य पतीत्यामन्त्रिते परे पराङ्गवद्भावः परस्यामन्त्रितस्याङ्गवद्भावस्तद्ग्रहणेन ग्रहणं न स्यात्। 'एवञ्च आमन्त्रितस्यादिरुदात्तः स्यात्' इत्यर्थकेन आमन्त्रितस्य[3]

---

१. अयं न्यायो घटत्वे नित्यान्वयविवक्षया नित्यो घट इति प्रयोगवारणाय स्वीकृतः सर्वै-र्वैयाकरणनैयायिकमीमांसकादिभिः।

२. पा.सू. २.१.२;

३. तदेव-६.१.१९८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चेति षाष्ठिकेन सूत्रेण आद्युदात्तत्वं न स्यात्। तत्र पदात्परस्यापदादिस्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यादित्यर्थकेन आमन्त्रितस्य च[१] इति आष्टमिकेन सूत्रेण निघातस्वरस्तु असम्भव एव, पूर्वस्यामन्त्रितस्य, आमन्त्रितं पूर्वमविद्यमानवद् इत्यनेन अविद्यमानवद्भावे शुभ इत्यस्य पदादित्वात्।

'सुबामन्त्रिते पराङ्गवत्स्वरे'[२] इति सूत्रे समर्थपदसम्बन्धाभावस्तु न शङ्क्यः, 'समर्थः पदविधिः' इत्यस्याव्यवहितोत्तरं 'सुबामन्त्रिते' इति सूत्रपाठस्यैव समर्थपदसम्बन्धे प्रामाणिकत्वात्। अन्यथा तु सुबामन्त्रिते इति सूत्रानन्तरं समर्थः पदविधिरिति सूत्रं पठेत्।

अन्यत्रैकार्थीभावात्मकं सामर्थ्यं स्वरे कर्तव्ये तु व्यपेक्षात्मकमिति वक्तुं न युक्तम्, अर्धजरतीयस्यानौचित्यात्। अतः सर्वत्र व्यपेक्षात्मकमेव सामर्थ्यमिति न समुदाये शक्तिः।

अत्राहुः शाब्दिकाः—एकधर्मावच्छिन्नशक्तिमत्त्वरूपैकार्थीभाव एव सामर्थ्यं समासप्रयोजकम्। राजा वदतीत्यादौ राजादिपदानां राजत्वाद्यवच्छिन्ननिरूपितशक्तेरावश्यकत्वेऽपि राजपुरुषादिसमासे राजसम्बन्धिपुरुषत्वाद्यवच्छिन्ननिरूपितैका शक्तिः स्वीक्रियते, न तु प्रत्येकपदनिष्ठा प्रत्येकराजाद्यर्थनिरूपिता शक्तिरपि, यतो हि यत्र राजपुरुषादिसमासजन्यशाब्दबोधसामग्रीभिन्नविषयकप्रत्यक्षं प्रति प्रतिबन्धिका भविष्यति, तत्र राजपुरुषादिसमासजन्यशाब्दबोधसामग्रीनिष्ठप्रतिबन्धकतायां राजपदजन्योपस्थितेः पुरुषपदजन्योपस्थितेश्च प्रवेशे गौरवापत्तिः, प्रतिबन्धकद्वयस्वीकारात्। विशिष्टशक्तिस्वीकारे तु एकैव प्रतिबन्धकतेति लाघवं तत्पक्षे।

न चैवं विशिष्टशक्तिस्वीकारेऽपि प्रत्येकपदनिष्ठशक्तिरावश्यकी, अन्यथा राजपदं चन्द्रनिरूपितशक्तिमदिति ज्ञानेऽपि राजपुरुषादिसमासात् नृपसम्बन्धिपुरुषनिरूपितविशिष्टशक्तिज्ञानं नृपसम्बन्धी पुरुष इत्याकारकः शाब्दबोधश्च स्यात्, नेष्यते च शाब्दिकैरपि तथेति वाच्यम्—यद्यपि राजपुरुषादिसमासो राज्ञः पुरुष इति वाक्यघटकराजादिपदसदृशराजादिपदावयवकस्तथापि यथा राजादिपदघटकरेफादिप्रत्येकवर्णानां निरर्थकत्वम्, तथैव समासघटकराजादिपदानामपि निरर्थकत्वमेव। वस्तुतो राजादिपदानां तदवयवत्वमपि नेष्यते; किन्तु अखण्डमेव राजपुरुषादिपदं, केवलं प्रक्रियानिर्वाहाय 'राज्ञः पुरुषः' इत्यादिरूपेण विगृह्यत इति राजादिपदानां पृथक् शक्तेरभावात् तज्ज्ञानस्यासम्भवात्।

यच्चाभाणि नैयायिकैः—समासे शक्त्यङ्गीकारे अर्थवत्सूत्रेणैव प्रातिपदिकसंज्ञा सिद्धा कृत्तद्धितेति सूत्रे समासग्रहणं व्यर्थं स्यादिति, तत्रेष्टापत्तिरेव। अत एव

१. पा.सू. ८.१.१; २. तदेव-२.१.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समासग्रहणं यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद् भवति, तर्हि समासस्यैवेति नियमार्थम्, तेन 'राज्ञः पुरुषः' मूलकेनोपदंशमित्यादिवाक्यस्य न प्रातिपदिकसंज्ञा।

किञ्च राजपुरुषादिसमासस्य प्रातिपदिकसंज्ञासिद्ध्यर्थं विशिष्टे शक्तिः स्वीकरणीया, अन्यथा तस्यानर्थकत्वात् प्रातिपदिकसंज्ञा न स्यात्। अत एवाऽर्थवत्सूत्रे भाष्ये 'अर्थवतां[1] समुदायोऽनर्थकः दश दाडिमानि षडपूपाः कुण्डमजाजिनम्' इति प्रत्युदाहृतम्। एवञ्च नैयायिकरीत्या राजपुरुषपदयोः प्रत्येकमर्थवत्त्वेऽपि समुदायस्यानर्थकत्वात् प्रातिपदिकत्वानापत्तिः। न च समासस्य विशिष्टार्थे लाक्षणिकत्वेन वृत्तिमत्त्वाद् अर्थवत्त्वेन प्रातिपदिकसंज्ञा भविष्यत्येवेति वाच्यम्, लक्षणायाः शक्यसम्बन्धरूपतया[2] समासपदशक्यस्याप्रसिद्धौ लक्षणाया अप्यसम्भवात्।

समासे विशिष्टशक्तेरनुपगमे 'पण्डितो ब्राह्मणः' नीलमुत्पलमित्यादौ यथा 'ब्राह्मणम्' 'उत्पलं' चोद्दिश्य पण्डितादीनां विधेयतयाऽन्वयबोधो भवति, तथैव पण्डितब्राह्मणो नीलोत्पलमित्यादिसमासे तादृशबोधापत्तिः, यतो हि तादृशबोधकारणस्य पण्डितादिप्रत्येकपदनिष्ठशक्तिज्ञानजन्यप्रत्येकार्थोपस्थितेः सत्त्वात्र चेष्टस्तादृशो बोधः। समासे शक्तिस्वीकारे तु विशिष्टशक्तिज्ञानजन्यायाः पण्डिताऽभिन्नब्राह्मणादिविषयिण्या विशिष्टोपस्थितेरेव सत्त्वेन पृथगुपस्थितेरभावात्र तादृशबोधापत्तिः। समासे शक्तेरनुपगमे उद्देश्यविधेयभावावगाहिबोधोपगमे च—

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिग्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः[3]।। इति।

काव्यस्याविमृष्टविधेयांशकत्वात्मकदोषवत्त्वं काव्यप्रकाशकाराद्युक्तं व्याहन्येत। यतो हि व्यपेक्षावादिमते वृथात्वस्य पृथगुपस्थितिसम्भवात् तस्य विधेयतया प्रतीतौ बाधकाभावः। तथा हि तत्तत्पदार्थनिष्ठविधेयत्वाख्यविषयतासम्बन्धेन शाब्दबोधं प्रति 'तत्तत्पदजन्यतत्तदर्थनिष्ठमुख्यविशेष्यकोपस्थितिः' कारणमिति कार्यकारणभावः स्वीक्रियते उद्देश्यविधेयभावेनान्वयं प्रति। एवञ्चोक्तस्थले व्यपेक्षावादिमते

---

१. महाभाष्यम्-१.२.४५।

२. लक्षणाशक्यसम्बन्धस्तात्पर्यानुपपत्तितः (कारिकावली, का.सं. ८२)। लक्षणायाः शक्यसम्बन्धत्वेन सापि अभिधा पृष्ठलग्ना (काव्यप्रकाशवामनी-टीका, पञ्चमोल्लासः)।

३. काव्यप्रकाशः, सप्तमोल्लासः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तादृशकारणस्य विद्यमानत्वाद् वृथात्वस्य विधेयतया प्रतीतौ बाधकाऽभावात् नाविमृष्टविधेयांशदोषः। विशिष्टशक्तिवादिमते तु वृथात्वस्य पृथगुपस्थितेरभावात् तस्य विधेयतया प्रतीतिर्न सम्भवति, उक्तकार्यकारणभावविरोधात्, इष्यते च वृथात्वस्य विधेयता। एवञ्चाऽत्र काव्यप्रकाशकारादिसम्मतोऽविमृष्टविधेयांशदोषो विशिष्टशक्तिवादिमते सम्भवति, व्यपेक्षावादिमते न सम्भवति। अतो विशिष्ट एव शक्तिः स्वीकार्या।

न चैवं समासशक्तिस्वीकारे निषादस्थपत्यधिकरणीयमीमांसासिद्धान्तोऽसङ्गतः स्यात्। तथा हि—निषादस्थपतिं याजयेदित्यत्र निषादस्थपतिपदे निषादानां स्थपतिरिति षष्ठीतत्पुरुषः, निषादश्चासौ स्थपतिरिति कर्मधारयो वेति सन्देहे कर्मधारय एवेति तदधिकरणेन व्यवस्थाप्यते, यतः षष्ठीतत्पुरुषे निषादपदस्य षष्ठ्यन्तार्थनिषादसम्बन्धिनि लक्षणाऽऽवश्यकी, नामार्थयोर्भेदान्वयस्य व्युत्पत्तिविरुद्धतया निषादपदार्थस्य स्थपतिपदार्थे भेदेनान्वयासम्भवात्। कर्मधारये च निषादपदार्थस्य अभेदेन स्थपतिपदार्थेऽन्वयसम्भवाल्लक्षणाया अनावश्यकत्वमिति लक्षणाकल्पनप्रयुक्तगौरवादेव न षष्ठीतत्पुरुषः, किन्तु कर्मधारय एवेति। समासशक्तिस्वीकारे तु निषादस्थपतिपदस्य निषादसम्बन्धिस्थपतौ निषादाभिन्नस्थपतौ च शक्तेरेव सत्त्वात्, उभयपक्षे लक्षणाया अनावश्यकत्वमिति क्व लाघवगौरवचर्चेति वाच्यम्, उक्तस्थले लक्षणाप्रयुक्तलाघवं गौरवं वा न स्वीक्रियते, अपि तु समासविशिष्टार्थशक्तौ निषादाभिन्नः स्थपतिरिति समासार्थः कर्मधारयपक्षे, निषादसम्बन्धिस्थपतिरित्यर्थः षष्ठीतत्पुरुषपक्षे। एवञ्च षष्ठीतत्पुरुषपक्षे निषादानां स्थपतिस्त्रैवर्णिको निषादभिन्नो वेति सन्देहः स्यात्, एवञ्च कर्मधारयपक्षे निषादभिन्नवर्णोपस्थित्यकल्पनप्रयुक्तलाघवात् तत्पक्षः स्थापितः, न तु लक्षणाकरणाकरणमूलकलाघवगौरवमादाय। अतो विशिष्टशक्तिवादिमते निषादस्थपत्यधिकरणेन विरोधाभावात् तत्पक्ष एव श्रेयस्करः।

समासशक्तेरनुपगमे चित्रगुरित्यत्र चित्राभिन्नगोस्वामीति बोधो दुरुपपादः स्यात्। तथा हि—यदि तत्र गोपदं गोस्वामिलक्षकम्, तदा गोः पदार्थैकदेशतया तत्र चित्रपदार्थस्याऽन्वयो न स्यात्, पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायात्। न च गोपदमेव चित्राभिन्नगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकमिति वाच्यम्, एकार्थीऽभावानुपगमे व्यपेक्षाया एव समासप्रयोजकताया वाच्यत्वेन चित्रपदस्य शाब्दबोधीयविषयत्वाप्रयोजकतया गोपदेन निरुक्तव्यपेक्षाया अप्यसत्त्वेन समासानुपपत्तेः। न च गोपदेन शक्त्या गौर्बोध्यते लक्षणया च स्वामी, स्वामिनि स्वनिष्ठस्वत्वनिरूपकत्वसम्बन्धेन गोरन्वयः, तत्र चाभेदेन सम्बन्धेन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चित्रपदार्थस्यान्वय इति नैकदेशान्वयो न वा व्यपेक्षाहानिरिति वाच्यम्, युगपद्वृत्तिद्वयानङ्गीकारात्। तदङ्गीकारेऽपि गोपदार्थस्य स्वामिनि स्वनिष्ठस्वत्व-निरूपकत्वसम्बन्धेनाऽन्वयो न सम्भवति, नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति न्यायात्[१]।

न च चित्रपदस्य गोपदस्य च लक्षणया चित्राभिन्नगोस्वाम्यर्थस्तयोश्च तादात्म्येनैवान्वयः। अत एव बहुव्रीहेः सर्वसमासापेक्षया जघन्यत्वप्रवादोऽपि सङ्गतः स्यात्, तद्घटकानामखिलानामेव पदानां लाक्षणिकत्वादिति वाच्यम्, तादात्म्येन पदार्थयोरन्वये विरूपेणोपस्थितयोः कारणतया तदभावादेव उक्तप्रकारेणान्व-यासम्भवात्।

न च चित्रपदस्य चित्राभिन्नगोस्वाम्यर्थः, गोपदस्य च स्वरूपमर्थः, चित्रपदस्य स्वरूपमर्थः, गोपदस्य चित्राभिन्नगोस्वाम्यर्थो वेति चित्राभिन्न-गोस्वामित्वावच्छिन्नस्वरूपत्वावच्छिन्नयोरभेदान्वयो निराबाध एव स्यादिति वाच्यम्, तथा सति गोपदघटकोकारस्य ह्रस्वत्वविधिनोदन्तताया अनुपपत्तेः 'गोस्त्रियोरुपसर्जनस्ये'ति सूत्रेण इतरपदार्थान्वितस्वार्थबोधकत्वरूपोपसर्जनत्वा-श्रयस्यैव गोपदस्य ह्रस्वविधानात्। तत्रेतरपदार्थः समासाघटकपदार्थात्मकतया गृह्यते, एतद्गोपदस्य च समासघटकचित्रादिपदार्थमात्रान्वितस्वार्थबोधकतयोप-सर्जनत्वाभावात्।

अथ चैत्रस्य गुरुकुलमित्यादावनेकस्थले पदार्थैकदेशे पदार्थस्यान्वयदर्शनात् पदार्थः पदार्थेनान्वेतीति न्याये सङ्कोचे कृतेऽपि प्राप्तमुदकं यं प्राप्तोदकेति बहुव्रीहिसमासात् समासशक्त्यनङ्गीकारे बुभुत्सितार्थबोधानुपपत्तिः।

तथा हि कर्तृक्तप्रत्ययान्तप्राप्तपदस्य प्राप्तिकर्तार्थः, उदकपदस्य च लक्षणयोदकसम्बन्धी, तदैकदेशे उदके प्राप्तिकर्तुरन्वयेऽपि उदककर्तृकप्राप्तिकर्मेत्य-भीष्टस्य बोधस्यानुपपत्तिरेव। एवं कृतः पाको येनेति विग्रहे कृतपाकेति समासात् स्वकीयकृतिकर्मपाककर्तेति बुभुत्सितस्य बोधस्यानुपपत्तिरेव।

न च प्राप्तोदक इत्यत्र धातोः प्राप्तिः, क्तप्रत्ययस्य च कर्ता कर्म चार्थः, कर्तरि उदकस्य कर्तुः प्राप्तौ, प्राप्तेः कर्मण्यन्वयादुदककर्तृकप्राप्तिकर्मत्वेन बुभुत्सितस्य ग्रामादेर्बोधः, कृतपाक इत्यत्र च कृधातोः स्वकीयकृतौ, क्तप्रत्ययस्य

१. न्यायोऽयं 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा.सू. २.३.४६) इति सूत्रे परिमाणग्रहणं कुर्वता पाणिनिना स्वीकृतः। न्यायाभावे तु द्रोणो व्रीहिरित्यत्र प्रातिपदिकार्थमात्रे प्रथमायामपि द्रोणाभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधोत्पत्तौ सूत्रे परिमाणग्रहणं व्यर्थमेव स्यात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कर्मणि घञः सम्बन्धिनि च लक्षणा, तत्र कृतेर्जन्यत्वेन कर्मणि, कर्मणो भेदेन पच्यर्थपाके, तस्य जनकत्वेन सम्बन्धिन्यनन्वयात् स्वकीयकृतिकर्मपाकसम्बन्धित्वेन बुभुत्सितस्य चैत्रादेर्बोध इत्यपि न साधु, क्तप्रत्ययस्य कर्मकर्त्रुभयार्थकताया अनुशासनविरुद्धत्वात्। प्रत्ययार्थस्य प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धतया क्तप्रत्ययार्थे कर्तरि उदकस्यान्वयासम्भवात्, स्वकृतिकर्मपाकसम्बन्धित्वेन चैत्रादेर्बोधेऽपि तादृशपाककर्तृत्वेन तस्याबोधाच्चैत्रो न पाककर्तेति निश्चयेऽपि कृतपाकश्चैत्र इति वाक्याद् बोधापत्तेः, विशेषाभावनिश्चयस्य सामान्यबुद्ध्यप्रतिबन्धकत्वात्।

एवम् 'जायाप्रतिग्राहितगन्धमाल्याम्'[१] इत्यत्र जायया प्रतिग्राहिते गन्धमाल्ये ययेति विग्रहवाक्याज्जायानिष्ठप्रेरणाविषयीभूतयत्कर्तृकप्रतिग्रहकर्मणी गन्धमाल्ये इत्यस्य, एवम् 'ऊढो रथो येन', उपहृतः पशुर्यस्यै, उद्धृत ओदनो यस्याः, बहवः पाचका यस्यामित्याद्यषष्ठ्यर्थबहुव्रीहिविग्रहवाक्येभ्यो यदनडुहादिकर्मकोद्वहनकर्म रथः, यद्रुद्राद्युद्देश्यकोपहरणकर्म पशुः, यत्स्थाल्याद्यवधिकोद्धरणकर्म ओदनः, यच्छालाद्यधिकरणकपाकभावनाश्रया बहव इत्यादिकानां रथपश्वोदनपाचकादितत्तदर्थविशेष्यकबोधानामुदयात्, समासेभ्यस्तु जायाप्रतिग्राहितगन्धमाल्यामित्यादिभ्यो जायानिष्ठप्रेरणाविषयीभूतगन्धमाल्यकर्मकप्रतिग्रहकर्त्री, रथकर्मकोद्वहनकर्ता, पशुकर्मकोपहारोद्देश्यः, ओदनकर्मकोद्धारणावधिः, बहुपाककर्त्रधिकरणमित्याद्यन्यपदार्थविशेष्यकानामेव बोधानामुदयात्, विग्रहवाक्यघटकतत्तत्पदानां यादृशार्थविषयकबोधजनकत्वं, समासघटकेषु तत्तत्पदेषु तद्विलक्षणबोधजनकत्वमेव समासशक्तिविद्वेषिभिः कल्पनीयमिति प्रत्येकं भिन्नैव व्युत्पत्तिस्तेषामावश्यकी। समासशक्तिवादिभिरपि सैव व्युत्पत्तिः शक्तिपदेनाभिधीयत इति नाममात्र एव विवादः पर्यवस्यति, तस्माद् बहुव्रीहिस्थले शक्तिरवश्यमेव स्वीकार्या।

एवं भेरी च पटहश्च, धवश्च खदिरश्चेति विग्रहे, भेरीपटहादिद्वन्द्वेभ्यश्चकारार्थस्य समाहारस्येतरेतरयोगस्य च बोधोऽन्यथानुपपन्न इति तत्रापि विशिष्टशक्तिरावश्यकी। न च विग्रह एव चकारार्थस्य प्रवेशो न समासेऽपीति वाच्यम्, भेरी चेत्यादिवाक्यानां विग्रहत्वानुपपत्तेः। समानार्थकसमस्यमानपदसमूहस्यैव विग्रहत्वात् समासेऽपि चकारार्थबोधस्य सर्वजनीनत्वात्, अन्यथा समासस्यैवानुपपत्तेः 'चार्थे द्वन्द्वः'[२] इति सूत्रेण चार्थे समाहारादौ च वाच्य एव द्वन्द्वविधानात्।

---

१. रघुवंशम्-२.१; २. पा.सू. २.२.२९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च समाहारस्य वादनादिकर्मत्वायोग्यत्वात् 'भेरीपटहं वादय' इत्यादावन्वयो न स्यादिति वाच्यम्, परम्परयैव तत्र तस्यान्वयसम्भवात्। परम्परयान्वयो न स्वीक्रियते कैश्चिद् इति वक्तुं न शक्यते, तेजस्त्वादिना साङ्कर्याद् घटत्वादिजातीनां संस्थानवृत्तित्वमते घटमानयेत्यादौ घटादिपदार्थानां परम्परयैव कर्मत्वान्वयस्य नैयायिकैः स्वीकृतत्वात्। न च 'चार्थे द्वन्द्वः' इति सूत्रस्य उक्तार्थे तात्पर्यं नास्ति, अपि तु यत्र चार्थस्य समाहारादेर्वस्तुतः सत्त्वं तयोः पदार्थयोर्विवक्षायां द्वन्द्व इत्यर्थकं तत्सूत्रम्। तथा च भेरीपटहयोर्वस्तुतः समाहारसत्त्वादेव समास इति वाच्यम्, तथा सति, भू सत्तायामित्यादावपि भूपदसत्तापदयोर्वस्तुतः समाहारसत्त्वाद् द्वन्द्वापत्तेः। अनुशासनादर्थनिर्णयस्य क्वाप्यसम्भवाच्च।

किञ्चैवं सति भेर्याः पटहस्य च साहित्याविवक्षायामपि भेरीपटहं वादयेत्यस्य प्रामाण्यं स्यात्, एवञ्चार्थस्य एवं सत्यव्यावर्तकतया 'चार्थे द्वन्द्वः' इति सूत्रे चार्थ इत्यस्य वैयर्थ्यापत्तिः।

न च नीलञ्च तदुत्पलमिति विग्रहे कर्मधारये द्वन्द्वसमासवारणाय चार्थे-ग्रहणम्, नीलाभिन्न उत्पले चार्थस्य समाहारस्याभावादिति वाच्यम्, एवमपि 'ग्रामं गतो ग्रामगतः' इत्यादिद्वितीयातत्पुरुषे ग्रामगतयोः समाहारसत्त्वाद् द्वन्द्वस्य दुर्वारत्वात्। द्वितीयातत्पुरुषस्य द्वन्द्वबाधकतया कर्मधारयस्यापि तथात्वादेव द्वन्द्वस्य वारणे 'चार्थ' इत्यस्य वैयर्थ्यं तदवस्थमेव। चार्थस्य समाहारादेः समासवाच्यत्वे चोक्तस्थलेषु चार्थस्य वस्तुतः सत्त्वेऽपि तस्याविवक्षणादेव न द्वन्द्व इति विशिष्टार्थसमाहारादौ द्वन्द्वस्य शक्तिरावश्यकी।

धवखदिरौ छिन्धीत्यादौ धवकर्मत्वान्वयानुपपत्तिरपि विशिष्टशक्तिसाधिका, अन्यथा 'धववन्तं पश्य' इत्यादौ दर्शने धवकर्मत्वान्वयबोधवारणाय, 'धवप्रकारकान्वयबोधं प्रति धवोपस्थापकपदाव्यवहितोत्तरविभक्तिजन्योपस्थितिः कारणमिति कार्यकारणभावस्यावश्यमेवाभ्युपगन्तव्यतया धवखदिरौ छिन्धीत्यादौ धवपदोत्तरं विभक्तेरभावाद् धवकर्मत्वान्वयबोधस्यासम्भवात्। विशिष्टशक्तिस्वीकारे तु समासार्थसमाहारस्यैव कर्मत्वे प्रकारतयान्वयेन, तद्वाचकसमासोत्तरविभक्तेः सत्त्वाद् अन्वयानुपपत्तेरभावात्।

न च यथा राजपुरुषादिसमासे पूर्वपदस्य राजसम्बन्धिनि लक्षणोपेयते, तथा धवखदिरादिद्वन्द्वे खदिरादीनामुत्तरपदानामेव धवखदिरादिसमाहारे लक्षणा। विशेषस्त्वेतावानेव यत्षष्ठीतत्पुरुषादौ क्वचित्पूर्वपदस्य क्वचिच्चोत्तरपदस्य लक्षणा। तत्पुरुषसमासे समासोत्तरविभक्त्यर्थस्य पूर्वपदार्थेऽन्वयाभावेन तस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभक्तिप्रकृत्यर्थत्वविरहेऽपि क्षत्यभावेन पूर्वपदस्यैव लाक्षणिकत्वेऽपि दोषाभावात्। द्वन्द्वे तु प्रत्येकपदार्थे विभक्त्यर्थस्यान्वयेन पूर्वपदस्य लाक्षणिकत्वे तस्य विभक्त्यप्रकृतितया तदर्थे विभक्त्यर्थस्यान्वयासम्भवेनोत्तरपदस्यैव विशिष्टार्थे लक्षणेति नोक्तदोषः। एवं विशिष्टस्यार्थवत्त्वाभावेन प्रातिपदिकसंज्ञाविरहेऽपि उत्तरपदस्यैवार्थवत्त्वात् प्रातिपदिकसंज्ञायां विभक्त्युत्पत्तिविशिष्टलक्षणार्थोपस्थितौ उद्देश्यविधेयभावेनान्वयस्यापि नापत्तिरिति वाच्यम्, उत्तरपदमात्रस्य प्रत्ययान्ततया प्रातिपदिकसंज्ञायास्तत्राप्रवृत्तेः। न च समासे सति विभक्तिलोपोत्तरं प्रत्ययान्तत्वाभावेन प्रातिपदिकसंज्ञा स्यादिति वाच्यम्, पूर्वं प्रातिपदिकसंज्ञाया अभावे सुपो धातुप्रातिपदिकयोरित्यनेन सुपोः लोपस्याप्रवृत्तेः।

न च 'धव सु खदिर सु' इत्यस्य समाससंज्ञायां सत्यां कृत्तद्धितेति सूत्रेण प्रातिपदिकसंज्ञा, ततो विभक्तिलोपे पुनरुत्तरपदस्य प्रातिपदिकसंज्ञेति वाच्यम्, 'धव सु खदिर सु' इत्यस्य समासत्वेऽप्यर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाया अप्रवृत्तेः। कृत्तद्धितेति सूत्रेऽपि अर्थवद् इत्यस्यानुवृत्तिरुक्ता भाष्यकृता[१]।

कृत्तद्धितेति सूत्रे अर्थवदित्यस्याननुवृत्तावपि प्रागेव प्रातिपदिकसंज्ञाया जाततया पुनस्तस्यास्तत्राप्रवृत्तिः 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इति न्यायात्। पर्जन्यवल्लक्षणप्रवृत्तिस्वीकारेऽपि विभक्तिलोपानन्तरमपि प्रत्ययलक्षणेनोत्तरपदस्य प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाया अप्रवृत्तेः।

समासे शक्तिस्वीकारादेव राजपुरुषादिसमासे समासघटकपदानां शक्तिं लक्षणां वा जानतां जनानां गुरूपदिष्टायां समुदायशक्तौ, राजपुरुषादिपदैर्विशिष्टार्थविषयकबोधस्तेभ्यो जायत इति सर्वैरेवानुभूयते। यदि विशिष्टे शक्तिर्न स्यात्, तदा अवयवार्थविषयकज्ञानाभावे विशिष्टार्थविषयकबोधो न स्यात्, वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वात्।

तत्र तेषां शक्तिभ्रमादेव बोध इति वक्तुं न शक्यते, बोधकतारूपाया एव शक्तेर्वैयाकरणैः स्वीकृतत्वात्। विशिष्टार्थबोधकतायाः शक्तेः समासे विद्यमानत्वाद् बाधाभावेन तत्र शक्तिज्ञानं भ्रमात्मकमिति वक्तुमशक्यत्वात्[२]।

एवञ्च यथा घटादिपदान्तर्गतघकारादिप्रत्येकवर्णनिष्ठशक्तिज्ञानाभावेऽपि घटपदनिष्ठशक्तिज्ञानेन घटविषयकबोधदर्शनात् तत्र समुदायशक्तिः स्वीक्रियते,

---

१. अर्थवद् इति वर्तते, कृत्तद्धितान्तञ्चैवार्थवत्, न केवलाः कृतस्तद्धिता वा। (महाभाष्यम्—कृत्तद्धितसमासाश्च—पा.सू. १.२.४६)

२. तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता। सैव शक्तिरित्यर्थः। (वैयाकरणभूषणसारः, शक्तिनिर्णयः)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथैव समासेऽपि प्रत्येकपदशक्तिज्ञानाभावेऽपि समुदायशक्तिज्ञानाद् राजपुरुषादिषु विशिष्टार्थबोधदर्शनात् तत्रापि समुदायशक्तिरवश्यमेवाभ्युपगन्तव्या।

'समर्थः पदविधिः' इत्यत्र एकार्थीभावरूपमेव सामर्थ्यं स्वीकृतम्, बृहच्छब्देन्दुशेखरेऽपि[1]। पदमञ्जरीकृतापि समासे विशिष्टशक्तिरेव स्वीकृता। तत्र यद्यपि व्यपेक्षारूपमपि सामर्थ्यं स्वीकृतं वर्तते; परन्तु तद् वाक्य एव, वृत्तौ तु एकार्थीभावरूपमेव स्वीकृतम्[2]।

'समर्थानां पदानाम्' इति काशिकावृत्तिपङ्क्तिव्याख्यानप्रसङ्गे न्यासकारेणापि एकार्थीभावरूपमेव सामर्थ्यं स्वीकृतं समासस्थले। तस्मात् सर्वैरेवाचार्यैः स्वीकृतोऽयं पक्षः समासे विशिष्टशक्तिरूपोऽवश्यमेव मन्तव्यः[3]।

●

---

१. सामर्थ्यञ्चात्र न व्यपेक्षा, व्याख्यानात्, वक्ष्यमाणदोषग्रासाच्च। किन्तु एकार्थीभावः। स च अपृथगुपस्थितिजनकत्वम्। तच्च विशेषणविशेष्यभावावगाह्युपस्थितिजनकत्वम्। अत एव किं समर्थम्? संसर्गतार्थं संसृष्टार्थमिति भाष्ये उक्तम्। (बृ.श. शेखरः, पा.सू. २.१.१)

२. समर्थानामिति कोऽर्थः? सम्बद्धार्थानां संसृष्टार्थानां वेत्यर्थः। तत्र वाक्ये सम्बद्धार्थता। व्यपेक्षा हि तत्र सामर्थ्यम्, अन्योन्यापेक्षा व्यपेक्षा। आकाङ्क्षासन्निधियोग्यत्वेषु सत्सु यः परस्परसम्बन्धम्, सा व्यपेक्षा। वाक्ये हि राज्ञ इति पदमनियतसम्बन्ध्यपेक्षयोद्भूतसम्बन्धं विशेषणभूतमर्थमाचष्टे, स्वसन्नियोग्यं च पुरुषमपेक्षते।

वृत्तौ तु संसृष्टार्थानाम्। एकार्थीभावो हि तत्र सामर्थ्यम्, वृत्तौ हि राजपदं राजानमभिधाय न तावति पर्यवस्यति पुरुषमप्याचष्टे। यथा गङ्गायां घोष इति गङ्गापदं तीरम्। यदि तु तावत्येव पर्यवस्येत्ततो यथा वाक्ये राज्ञः पुरुषोऽश्वश्चेति द्वाभ्यां सम्बन्धो भवति, तथा राजपुरुषोऽश्वश्चेत्यत्रापि स्यात्। स्वविशेषणसम्बन्धोऽपि स्यात्—ऋद्धस्य राजपुरुष इति। यथा ऋद्धस्य राज्ञः पुरुष इति, तथा पुरुषपदमपि राजविशिष्टमेव पुरुषमाचष्टे, न तु पुरुषमात्रम्। यदि तथा स्यात्ततो यथा वाक्ये राज्ञः पुरुषो देवदत्तस्य चेति द्वाभ्यां सम्बन्धो भवति, तथा राजपुरुषो देवदत्तस्य चेत्यपि स्यात्। अतो यस्य विशेषस्य भावादयं विशेषः स एकार्थीभावः—समासे तु द्वयोरेकस्मिन् विशिष्टेऽर्थे वृत्तेः पृथगर्थाभावात् स्वभावत एव विभक्तिर्निवर्तते। (पदमञ्जरी—पा.सू. २.१.१)

३. समर्थानामित्यनेन वाक्ये व्यपेक्षालक्षणं सामर्थ्यमाह—संसृष्टार्थमित्यनेन समासे पदानामेकार्थीभावलक्षणं सामर्थ्यं दर्शयति। एकार्थीभावश्च पृथगवस्थितानां भिन्नार्थानां पदानां समासे साधारणार्थानामवस्थाविशेषः। वाक्ये हि साधारणार्थता नास्ति, भिन्नार्थत्वात्। अत एव तत्र भेदनिबन्धना षष्ठ्युपजायते—राज्ञ इति वृत्तौ तूभयपदव्यवच्छिन्नार्थाभिधानात् साधारणार्थता भवति। एतेनैतदुक्तं भवति, समासे हि विशेषणविशेष्यमनुप्रविशत्येकार्थीभवति विशेष्येण सह, वाक्ये हि विशेषणं विशेष्यात् पृथगवतिष्ठत इति। (न्यासः, सू. २.१.१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाणिनिव्याकरणे सूत्रसमीक्षा

प्रो. बाँकेलालमिश्रः,
आचार्यः, संस्कृतविभागस्य
महात्मागान्धी-काशीविद्यापीठे
वाराणस्याम्

***

विश्वस्य सनातनं सर्वविधकल्याणसाधकञ्च साहित्यं मन्त्रब्राह्मणात्मको वेद एव। व्याकरणं तस्याङ्गतया प्रख्यातमस्ति। तथा हि गोपथब्राह्मणे 'षडङ्गविदस्तत्तथा धीमहे'[१] इत्युक्त्या 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'[२] इति भाष्योक्त्या च वेदस्य षट्संख्याकानि अङ्गानि सन्तीति ज्ञायन्ते। तानि च शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणञ्च प्रसिद्धान्येव। उक्तञ्च—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[३]।।इति।

अपरञ्चास्य व्याकरणस्याङ्गान्तरापेक्षया प्राधान्यमप्युक्तं भगवता भाष्यकृता— 'प्रधानञ्च षट्सु अङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति' इति।

एवञ्च यथा शरीरस्य रक्षार्थमङ्गानां महती आवश्यकताऽस्ति, तथैव वेदानां स्वरूपस्य तदर्थस्य चावगमाय शिक्षाद्यङ्गानामस्ति महत्प्रयोजनम्; किं पुनस्तत्र मुख्यस्थानीयस्य व्याकरणस्य। अथ किमिदं व्याकरणम्? व्याकरणमस्ति वेदस्यान्यतमं महनीयमङ्गम्। इदानीं तल्लक्षणनिर्वचनेन विशेषतः स्वरूपं जिज्ञासितमस्ति।

व्याक्रियन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते येन तद् व्याकरणमिति करणव्युत्पत्त्या असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृति-

---

१. गो.ब्रा., पू. १.२७;
२. म.भा., पस्पशा. १.१।
३. पाणिनीयशिक्षा, ४१.४२;
४. म.भा., पस्पशा. १.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पूर्वकसाधुशब्दविषयकज्ञानकरणं व्याकरणमित्यर्थो योगशक्त्या लभ्यते। यथा— गावी, गोणी, गोता इत्यादिभ्योऽसाधुशब्देभ्यो गो इति साधुशब्दस्य पृथक्कृत्य बोधनं व्याकरणशास्त्राधीनम्। पृथक्कृतिश्च 'गच्छतीति गौः गमेर्डः प्रत्ययः कर्तरि औणादिकः' इत्येवं प्रकृतिप्रत्ययविश्लेषणपूर्विका।

एवञ्च साधुशब्दबोधकशास्त्रत्वं शब्दगतसाधुत्वबोधकशास्त्रत्वं वा व्याकरणस्य लक्षणं पर्यवसितम्। इतरत् सर्वमसाधुशब्दज्ञानं प्रकृतिप्रत्ययादिज्ञानं परिचायककोटावेव प्रविष्टम्, न तु लक्षणशरीरे निविष्टम्। डित्थादिशब्दे प्रकृत्यादिकल्पनायाः प्रायोऽदर्शनात्।

लक्ष्यलक्षणे व्याकरणमिति व्याचक्षाणेन भाष्यकृताऽपि लक्ष्यगत-साधुत्वलक्षकशास्त्रं व्याकरणमिति प्रत्यायते, येन च पूर्वोक्तं लक्षणं साधु समर्थ्यते। 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इत्युक्त्या वाक्यपदीयकृताऽप्युक्तं तल्लक्षणे साधुसम्मतिः प्रकाश्यते।

व्याकरणशास्त्रे महर्षिपाणिनेर्लक्षणात्मिकाऽष्टाध्यायी अद्वितीया कृतिरस्ति। अष्टाध्यायीरूपोऽयं ग्रन्थः पाणिनिव्याकरणपदेन व्यपदिश्यते। अस्मिन् ग्रन्थे चतुस्सहस्राणि सूत्राणि प्रतिपादितानि सन्ति। 'सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैकः शक्यः पन्था आस्थातुम्'[1] इति पतञ्जल्युक्त्या सर्वेषां वेदानामिदं व्याकरणं पाणिनीयं जागर्ति। अयं हि भगवान् पाणिनिः—आपिशलि[2]-कश्यप[3]-गार्ग्य[4]-गालव[5]-चाक्रवर्मण[6]-कलापि[7]-भारद्वाज[8]-शाकटायन[9]-शाकल्य[10]-सेनक[11]-स्फोटायन[12]नामेकादशानां वैयाकरणानां मतानि सङ्कलय्य ततः सारमादाय अष्टाध्यायात्मकं ग्रन्थं निरमासीत्। अस्यामष्टाध्याय्यां न हि सर्वाण्येव सूत्राणि पाणिनिनैव निर्मितानि, किन्तु पूर्वाचार्यैः रचितानि सूत्राणि पाणिनिना अविकलं

---

१. महाभाष्यम्, २.१.५८; २. अष्टा., ६.१.९२।
३. तदेव, ४.३.१०३; ४. तदेव, ७.३.९९, ८.३.२०।
५. तदेव, ६.३.६१, ७.१.७४, ८.३.९९।
६. तदेव, ६.१.१३०; ७. तदेव, ४.३.१०४, ४.३.१०८।
८. तदेव, ७.२.६३।
९. तदेव, ४.३.१११, ८.३.१८, ८.४.५०।
१०. तदेव, ६.१.१२७, ८.३.१९, ८.४.५१।
११. तदेव, ५.४.११२; १२. तदेव, ६.१.१२३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समुपन्यस्तानि। तथा हि—जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्[१], जातेरस्त्रीविषयादयोपधात्[२], सप्तम्यधिकरणे च[३], अधिकरणैतावत्त्वे च[४], कर्तरि कर्मव्यतिहारे[५], कर्मण्यण्[६], वोतो गुणवचनात्[७], गुणवचनब्राह्मणादिभ्यः कर्मणि च[८], आद्गुणः[९] इत्यादीनि सूत्राणि न ह्येकार्थकानेव तत्तच्छब्दानुपादाय प्रकृतानि सन्ति। किं नाम वैयाकरणस्यापि निकाये शब्दानामेतादृशोऽभावः सञ्जातो येन अनेकार्थानिव शब्दान् गृहीत्वा अध्येतॄन् एतादृशे शङ्कापङ्के पातयितुं प्रयतेत आचार्यः। एतद्दोषपरिमार्जनाय—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'[१०], 'उभयगतिः पुनरिह भवति'[११] इत्यादीनि वचनानि भाष्यकारादिभिराश्रितानि भवन्ति। यदि नाम भगवान् पाणिनिः स्वयमेव सर्वाणि सूत्राणि निरमास्यत्, तर्हि नैवंविधानि कोटिद्वयावगाहिपदार्थजटिलानि सूत्राणि उपन्यसिष्यत्।

अथ किमिदं सूत्रं नाम? इति विचार्यते—

वेष्टनार्थकात् 'सूत्र'-धातोः अदन्तान्नित्यचौरादिकण्यन्तात् करणे बाहुलकात् घञ्प्रत्यये, सूत्र्यते, विशिष्टोऽर्थः परिवेष्ट्यते येन विलक्षणेन शब्दराशिना तत्सूत्रम्। शब्दविशेषे योगरूढोऽयं सूत्रशब्दः 'पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च', 'बलकुसुमशुल्बपत्तनरणाभिधानानि'[१२] इति लिङ्गानुशासनीयसूत्रानुसारं पुंनपुंसकोभयलिङ्गः, तत्र नपुंसकमित्यधिकारात्। तथापि अद्यत्वे प्रचुरलोकव्यवहारतः नपुंसक एव प्रयुज्यते। सूत्रशब्दोऽयं नानार्थकः। यथा—वस्त्वारम्भकतन्तुषु सूत्रशब्दः प्रयुज्यते, एवमेव दार्शनिकनिकाये 'सूत्रात्मा हिरण्यगर्भः' इत्यादिकव्यवहारेण स्थूलसृष्टेः कारणात्मनि सूक्ष्मतत्त्वेऽपि सूत्रशब्दः प्रसिद्धः। परमत्र सूत्रशब्दस्यानेकार्थत्वात् कोऽर्थोऽभिप्रेतो निबन्धकारस्येति जिज्ञासायां शब्दार्थविषयके सन्देहे तात्पर्यार्थनिर्णायकत्वेन हेतुतया प्रमाणभूतत्वे नैकार्थनियन्त्रकं भर्तृहरिवाक्यमनुस्मर्यते। यथोक्तं भर्तृहरिणा वाक्यपदीये—

> संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।
> अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥

---

१. अष्टा., १.२.५८;
२. तदेव, ४.१.६३।
३. तदेव, २.३.१५;
४. तदेव, २.४.१५।
५. तदेव, १.३.१४;
६. तदेव, ३.२.१।
७. तदेव, ४.१.४४;
८. तदेव, ५.१.१२४।
९. तदेव ६.१.८७;
१०. म.भा., १.१.२।
११. म.भा., १.१.२३।
१२. लिङ्गानुशासनम्–१५८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[१]॥

इत्युक्तदिशा प्रकरणाद्यनुरोधात् शब्दराशिविशेष एव सूत्रशब्दस्य तात्पर्यमवगन्तव्यम्। अतश्च विशिष्टार्थविशेषबोधकोऽल्पीयान् शब्दराशिः सूत्रमिति योगरूढ्या निष्पन्नमर्थं ज्ञात्वा सूत्रस्य लक्षणमपि अन्तर्निरूढं वेदितव्यम्। उक्तञ्च शिष्टैः—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

अत्र लक्षणे असन्दिग्धमित्यनेन संशयभ्रमाद्यजनकत्वमुक्तम्। अत्र प्रमाजनकत्वमर्थत आयाति। अत एव प्रमाणभूतः शब्दः सूत्रमिति लब्धम्। तत्र च यतोऽल्पीयान् शब्दो भवेत्, स एव ग्राह्यः। सारवदित्यनेन गम्भीरार्थबोधकता, विश्वतोमुखमित्यनेन नानार्थकतापि लभ्यते। अस्तोभमित्यनेन स्तोभरहितम्, स्तोभश्चानर्थकः शब्दः, यथा सामवेदे 'हाऊइ हाऊइ' इत्यादि। अनवद्यमित्यनेन गर्हितार्थराहित्यमिष्यते, एवञ्च सारवदित्यस्यैवेदं विवरणद्वयमस्तोभमनवद्यञ्चेति। न हि स्तोभस्य (प्रमादाद्युच्चरितस्य) अनवद्यस्य निन्दितार्थकस्य सारवत्ता वक्तुं शक्यते केनचिदपि मनीषिणा। अतश्च प्रसक्तगम्भीरार्थविषयप्रमाजनकत्वे सति नाना-प्रयोजनकत्वे च सति सर्वतोऽल्पीयान् वाक्यविशेषः सूत्रमिति सूत्रलक्षणं पर्यवस्यति। यथा—'इको यणचि'[२] इति व्याकरणसूत्रम्। अत्र अजव्यवहितपूर्वत्वविशिष्टस्य इकः स्थाने यण् भवति, यण्घटितश्च शब्दः साधुर्भवति, स एव प्रयोक्तव्य इत्येवं यः प्रसक्तगम्भीरश्च वाक्यार्थ-स्तद्विषयकप्रमाजनकत्वमस्य सूत्रस्य, दृष्टादृष्टोभयविधप्रयोजनकत्वेन चास्य विश्वतोमुखत्वमपि सिद्ध्यति। 'सुद्ध्युपास्यः, मद्ध्वरिः' इत्यादिप्रयोगाणां साधुत्वज्ञापनं दृष्टफलम्, 'एकः अक्षरः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति' इति श्रुत्युक्तमदृष्टफलम्। सोच्चारणजन्यमपि फलमदृष्टमेव। उक्तञ्च महाभाष्ये भगवता पतञ्जलिना—

'वेदाङ्गभूतानां व्याकरणादीनां पुनः पुनरुच्चारणेन पुण्यात्मकं फलं बहुत्र, यथा पुण्यजननाय साधुभिर्भाषितव्यं पापजननायासाधुभिः'। एवमेव 'अथातो धर्मजिज्ञासा'[३] इति मीमांसासूत्रे, 'जन्माद्यस्य यतः'[४] इत्यादि-वेदान्तसूत्रे,

---

१. वा.प. २.३१५-३१६; २. अष्टा., ६.१.७७।
३. मी.सू. १.१.१; ४. ब्र.सू. १.१.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इत्यादि-न्यायसूत्रे (न्या.सू. १.१.३) च मदुक्तलक्षणं निर्बाधं समन्वेति। एतच्च सूत्रं शिष्टैः षड्विधमुपवर्णितम्। तथा हि—

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते।।

अत्र लक्षणे क्वचित् 'सूत्रमुच्यते' इत्यस्य स्थाने 'सूत्रलक्षणम्' इत्यस्य पाठोऽपि दृश्यते।

संज्ञासूत्रम्—

'संज्ञा खलु नाममात्रकथनम्' इति संज्ञासूत्रस्य सामान्यलक्षणम्; परन्तु वैयाकरणाः 'साक्षात् शक्तिग्राहकत्वं संज्ञासूत्रत्वम्' इति विशेषलक्षणमपि कुर्वन्ति। अधोलिखितरूपेणास्य लक्षणस्य समन्वयः कर्तुं शक्यते। यथा—'वृद्धिरादैच्'[१] 'अदेङ्गुणः'[२] इति संज्ञासूत्रे। अत्र हि आदैजर्थनिरूपितशक्तिमत्पदग्राह्यत्वं वृद्ध्यादिपदेन ग्राह्यते। यथा अत्रैव सूत्रे भगवता पतञ्जलिनाप्युक्तं महाभाष्ये—'लोके तावत् मातापितरौ पुत्रस्य जातस्य संवृत्तेऽवकाशे नाम कुर्वाते—यज्ञदतो देवदत्त इति। तयोरुपचारादन्येऽपि जानन्ति यदस्य संज्ञेति, एवमिहापि। इहैव तावत् केचिद्विचक्षणा आहुः—'वृद्धिशब्दः संज्ञा, आदैचः संज्ञिनः' इति।

परिभाषासूत्रम्—

साक्षाद् विधिशास्त्रत्वात् पर्यग्राहकशास्त्रत्वं परिभाषासूत्रत्वम्। अथवा संज्ञासूत्राधिकारसूत्रभिन्नत्वे सति अप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्व-प्रकारकशास्त्रजन्यप्रमायां सहकारित्वेन मुन्यभिप्रेतत्वं परिभाषासूत्रत्वम्। तच्च 'इको गुणवृद्धी'[३], 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[४] इत्यादौ सुष्ठु वर्तते। यथा हि 'सार्वधातुकाऽऽर्धधातुकयोः'[५], सिचि वृद्धिः परस्मैपदेषु'[६] इत्यादौ 'इको यणचि'[७] इत्यादौ 'निर्दिष्टे पूर्वस्य' इति पदद्वयोपस्थापनेन द्वितीयस्य परिभाषासूत्रत्वं सुतरामागच्छति। एवमेव 'षष्ठी स्थानेयोगा'[८] इत्यादावपि परिभाषासूत्रस्य लक्षणमुपपद्यते। परिभाषाशब्दस्य व्युत्पत्तिगतोऽप्यर्थः सम्भवति—'परितः सर्वतो भाष्यन्तेऽनयेति परिभाषा। परितो भाषां परिभाषां प्रचक्षते।' यथा कैश्चिद् विद्वद्भिरुक्तम्—

---

१. अष्टा., १.१.१; २. तदेव, १.१.२।
३. तदेव, १.१.३; ४. तदेव, १.१.६६।
५. तदेव, ७.३.८४; ६. तदेव, ७.२.१।
७. तदेव, ६.१.७७; ८. तदेव, १.१.४९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दीपो यथा प्रभाद्वारा सर्वगेहे प्रकाशकः।
परिभाषा तथा बोध्या सर्वशास्त्रोपकारिका।।

इयं हि परिभाषा त्रिधा भवति—

(क) ज्ञापकसिद्धा—'संज्ञापूर्वको विधिरनित्यः'।

(ख) न्यायसिद्धा—'एकदेशविकृतमनन्यवत्'।

(ग) वाचनिकी—'विप्रतिषेधे परं कार्यम्'।

ज्ञापकसिद्धा परिभाषा द्विधा भवति—

(क) लिङ्गवती, (ख) विध्यङ्गशेषभूता।

उपरि निर्दिष्टपरिभाषाद्वयविषये उक्तं यथा—

एकस्थः सविता देवो यथा विश्वप्रकाशकः।
तथा लिङ्गवती शास्त्रमेकस्थापि प्रदीपयेत्।।

एकापि पुंश्चली पुंसां यथैकैकं प्रयाति हि।
विध्यङ्गशेषभूता सा विधिः प्रत्यनुगच्छति।।

एकत्र गृहीतसम्बन्धा सती या प्रदीपवत् सर्वं शास्त्रमभिज्वलयति, सा लिङ्गवती। 'उणादयो व्युत्पन्नानि प्रातिपदिकानि' इत्यत्र लिङ्गवत्याः परिभाषायाः लक्षणसमन्वयः कर्तुं शक्यते।

विध्यङ्गशेषभूता परिभाषा द्विधा भवति—

कस्यचिद्विधेः अङ्गभूता, विधिशेषभूता चेति।

परि सर्वशास्त्रे उपयुक्ता वाणी भाषा सा परिभाषा। सा च लिङ्गवती विध्यङ्गभूता च। या लिङ्गद्वारा भावेनोपयुज्यते साऽपरा। साऽपि काचिद् विधेरङ्गभूतायां विना विधिवाक्यं नैव प्रवर्तते। यथा—'आदेः परस्य'[1] इति नहि तद्विना 'ईदासः'[2] इति सूत्रं प्रवर्तते।

काचिद् विधिविशेषभूता यथा—'विप्रतिषेधे परं कार्यम्' इत्यविरोधे वृक्षेष्वित्यादौ 'बहुवचने झल्येत्'[3] इति झल्येत्वमव्याहतमेव।

न्यायसिद्धा परिभाषा व्याकरणे व्याकरणान्तरेऽपि प्रयुक्ता भवति। यथा—'जरायाः जरसन्यतरस्याम्'[4] इति। वाचनिकी परिभाषा नाना भवति। सा यथा—

१. अष्टा., १.१.५४;
२. तदेव, ७.२.८३।
३. तदेव, ७.३.१०३;
४. तदेव, ७.२.१०१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूत्रनिष्पन्ना, सूत्रेतरनिष्पन्ना, सूत्रेतरवचनात्मिका, सूत्ररूपे पठितेत्यादि।

सूत्ररूपे निष्पन्ना—'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः'।

सूत्रेतरनिष्पन्ना—'सकृद्गतो विप्रतिषेधे यद् बाधितं तद् बाधितमेव'।

सूत्रेतरवचनात्मिका—'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'।

सूत्ररूपेण पठिता—(क) विप्रतिषेधे परं कार्यम्[१]। (ख) इको गुणवृद्धी[२]। (ग) आद्यन्तौ टकितौ[३]। (घ) आदेः परस्य[४]। (ङ) ङिच्च[५]। (च) मिदचोऽन्त्यात्परः[६]। इत्यादिरूपेण द्रष्टव्या।

विधिसूत्रम्—

लक्ष्यविषयकापूर्वसंस्कारविषयकबोधजनकत्वं विधिसूत्रत्वम्। अथवा अत्यन्ताप्राप्त्यर्थप्रतिपादकत्वे सति साक्षात् साधुत्वविषयकशास्त्रत्वं विधिसूत्रलक्षणम्। यथा—'इको यणचि'[७], 'आद्गुणः'[८] इति वा विधिसूत्रम्। तत्र हि 'सुद्ध्युपास्यः' इत्यादिलक्ष्यविषयको योऽपूर्वसंस्कारो यणात्मक-स्तद्विषयकबोधजनकत्वं वर्तत एव। एवमेवान्यत्रापि 'अकः सवर्णे दीर्घः'[९] इत्यादावपि लक्षणसमन्वयः कर्तुं युज्यते। वैयाकरणैर्विधिसूत्राणां भागद्वयं कृतमस्ति—आदेशा आगमाश्चेति। अर्थात् कानिचिद् आदेशविधिसूत्राणि कानिचिच्च आगमविधिसूत्राणि।

आदेशविधिसूत्राणि, यथा—'जसः शीः'[१०], 'झोऽन्तः'[११] इत्यादि।

आगमविधिसूत्राणि, यथा—'ह्रस्वनद्यापो नुट्'[१२]। 'आमि सर्वनाम्नः सुट्'[१३] इत्यादि।

पुनश्च नाशनिषेधाभ्यामपि अस्य विधिसूत्रस्य भागद्वयमुपलभ्यते। यथा—

नाशविधिसूत्रम्—'लोपः शाकल्यस्य'[१४], निषेधविधिसूत्रम्—'न पदान्ताट्टोरनाम्'[१५] इति। एतस्मिन् विधिसूत्रलक्षणे गौतमाचार्यैः कृतं लक्षणमप्यन्तर्भवति। यथा तैरुक्तम्—'विधिर्विधायक' इति।

---

१. अष्टा., १.४.८२; २. तदेव, १.१.३।
३. तदेव, १.१.४६; ४. तदेव, १.१.५४।
५. तदेव, १.१.५३; ६. तदेव, १.१.४७।
७. तंदेव, ६.१.७७; ८. तदेव, ६.१.८७।
९. तदेव, ६.१.१०१; १०. तदेव, ७.१.१७।
११. तदेव, ७.१.३; १२. तदेव, ७.१.५४।
१३. तदेव, ७.१.५२; १४. तदेव, ८.४.४२।
१५. तदेव, ७.१.५२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नियमसूत्रम्—

सिद्धौ सत्यामारभ्यमाणविधित्वं नियमसूत्रत्वम्। अथवा साक्षादितर-व्यावर्तकशास्त्रत्वं नियमसूत्रलक्षणम्। तच्च 'धातोस्तन्निमित्तस्यैव'[१] इत्यादिषु सुतरां सङ्घटते। यथा—'वान्तो यि प्रत्यये'[२] इत्यनेनैव वान्तादेशस्य सिद्धत्वात् तत्र लक्षणसमन्वयः सुतरां जातः। एवमन्यत्रापि 'पतिः समास एव'[३] इत्यादिष्वपि नियमसूत्रत्वमुपपन्नम्। केचन वैयाकरणाः प्रकारान्तरेण नियमसूत्रं व्युत्पादयन्ति। यथा—'सामान्यप्राप्तस्य विशेषावधारणं नियमः'। तद्यथा—'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[४] इति सूत्रेण समासवाक्ययोरुभयोरपि प्रातिपदिकत्वम्, किन्तु 'कृत्तद्धितसमासाच'[५] इति नियमं करोति।

मीमांसकनिकाये नियम एव परिसंख्यापदेनोच्यते, 'तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' इति लक्षणात्। यथा—'पञ्च पञ्चनखा भक्ष्याः' इत्यत्र रागप्रमादेन पञ्चनखानां तदितरेषाञ्च आत्मपोषणाय भक्षणं प्राप्तम्, तत्र अनया रीत्या नियम्यते यत् पञ्चनखा भक्ष्याश्चेत्तर्हि पञ्चैव न त्वितरे। एवमेव मीमांसकनिकाये 'व्रीहयोऽवहन्तव्याः' इति वाक्यं मिलति यज्ञप्रसङ्गे। तत्र व्रीहीणामवहननमुभयथा प्राप्तम्, अवघातेन नखविदलनेन वा। तत्रापि अनया रीत्या नियम्यते यद् व्रीहीणामवहननमवघातेनैव, न तु नखविदलनेनेति।

अतिदेशसूत्रम्–

साक्षात्सादृश्यग्राहकशास्त्रत्वमतिदेशसूत्रत्वम्। तच्च स्थानिवदादेशोऽनल्विधौ[६], अन्तादिवच्च[७] इत्येष्वस्तीति तत्र लक्षणसमन्वयः। क्वचिद्वतिं विनापि यदि वत्यर्थोऽवगम्यते, तदा तत्राप्यतिदेशत्वं मन्तव्यमेव। उक्तञ्च महर्षिपतञ्जलिना 'बहुगणवतुडतिसंख्या'[८] इति सूत्रे असंख्यां यदयं संख्यामित्याह ततोऽवगम्यते संख्यावदिति, यथा अब्रह्मदत्तं ब्रह्मदत्त इत्याह तदा ब्रह्मदत्तवदिति गम्यते। व्याकरणशास्त्रे अयमतिदेशः षड्विधः, निमित्तव्यपदेशतादात्म्यरूपशास्त्र-कार्यातिदेशभेदात्। तथा हि 'पूर्ववत्सनः'[९] इत्यत्र निमित्तातिदेशः,

---

१. अष्टा., ६.१.८०; २. तदेव, ६.१.६९।
३. तदेव, १.४.८१; ४. तदेव, १.४.४५।
५. तदेव, १.२.४६; ५. तदेव, १.१.५६।
७. तदेव, ६.१.५५; ६. तदेव, १.१.२३।
९. तदेव, १.३.६२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'आद्यन्तवदेकस्मिन्'[१] इत्यत्र व्यपदेशातिदेशः 'सुबामन्त्रिते पराङ्गवत्स्वरे'[२] इत्यत्र तादात्म्यातिदेशः, 'तृज्वत् क्रोष्टुः'[३] इत्यत्र रूपातिदेशः, 'कर्मवत्कर्मणा तुल्यक्रियः'[४] इत्यत्र शास्त्रातिदेशोऽथवा प्राधान्यात्कार्यातिदेशः, 'स्थानिवदादेशोऽनलल्विधौ'[५] इत्यत्र कार्यातिदेश एवेति सर्वं 'तृज्वत्क्रोष्टुः' इत्यादि-सूत्रे प्रौढमनोरमायां विस्तरेण प्रपञ्चितम्।

अधिकारसूत्रम्—

स्वदेशे लक्ष्यसंस्कारविषयकवाक्यार्थबोधाजनकत्वे सति उत्तरोत्तरसूत्रेण सहैकवाक्यतया वाक्यार्थबोधजनकत्वमधिकारसूत्रत्वम्। अथवा केचन वैयाकरणाः प्रकारान्तरेणेत्थं व्युत्पादयन्ति यत् 'पूर्वसूत्रेणोपात्तपदादेरुत्तरसूत्रेष्वनुवर्तमानमधिकारः, यथा पद्यरूपेणापि प्राहुः—

कार्याकार्यनिमित्तानां पदानां यदुदीरणम्।
वक्ष्यमाणार्थसङ्क्षेपादधिकारः स उच्यते[६]।।

प्रत्ययः[७], परश्च[८], अङ्गस्य[९], भस्य[१०], अव्ययीभावः[११], तत्पुरुषः[१२] इत्यादीन्यधिकारसूत्राणि सन्ति। अधिकारसूत्राणां ये विभागाः कृताः सन्ति शाब्दिकैः सुधीभिस्ते यथा—

(क) कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा 'प्रदीपः सुप्रज्वलितः सर्ववेश्माभिज्वालयति' इत्याद्यम्। यथा—'षष्ठी स्थानेयोगा'[१३] इति।

(ख) यथा रज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वच्चकारेणेति द्वितीयम्। यथा—'लः कर्मणि च भावे चाकर्मकेभ्यः'[१४] इत्यत्र 'कर्तरि कृत्'[१५] इत्यतः कर्तरि इति पदं चकारेणानुकृष्यते। एवमेव 'अभिनिविशश्च'[१६] इति सूत्रस्य चकारपदेन, 'आधारोऽधिकरणम्'[१७] इत्यत आधारपदमनुकृष्यते।

---

१. अष्टा., १.१.२१; २. तदेव, २.१.२।
३. तदेव, ७.१.९५; ४. तदेव, ३.१.८७।
५. तदेव, १.१.५६।
६. प्रौ.म., अजन्तपुंल्लिङ्गे, पृ. ४१५-४१६।
७. अष्टा. ३.१.१; ८. तदेव, ३.२.२।
९. तदेव, ६.४.१; १०. तदेव, ६.४.१२९।
११. तदेव, १.१.४१; १२. तदेव, २.१.२२।
१३. तदेव, १.१.४९; १४. तदेव, ३.४.६९।
१५. तदेव, ३.४.६६; १६. तदेव, १.४.४७।
१७. तदेव, १.४.४५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(ग) प्रतियोगं तस्यानिर्देशार्थो योगे योगे उपतिष्ठत इति तृतीयम्। यथा 'पूर्वत्रासिद्धम्'[१] इति।

विशेषदृष्ट्या अस्याधिकारस्य त्रयो विभागाः पुनरपि कर्तुं शक्यन्ते। उक्तञ्च शिष्टैः—

सिंहावलोकितञ्चैव मण्डूकप्लुतिमेव च।
गङ्गाप्रवाहवच्चापि ह्यधिकारस्त्रिधा मतः।।

(क) सिंहावलोकितम्, यथा—'आदिरन्त्येन सहेता'[२] इति सूत्रं 'हलन्त्यम्'[३] इति सूत्रं वा सिंहवदवलोकयति तथैव कार्यं सम्पादयति च।

(ख) मण्डूकप्लुतिः—यथा मण्डूका एकस्मात् स्थानादुत्प्लुत्योत्प्लुत्य गच्छन्त्यपरं स्थानं प्राप्नुवन्ति, तद्वत्—'इको यणचि'[४] इति सूत्रस्थं अच्पदं मण्डूकप्लुत्या 'अवङ्स्फोटायनस्य'[५] इत्यत्रानुवर्तते। एवमेव 'तावतिथं ग्रहणमिति लुग्वा'[६] इति सूत्रस्थं 'वा' इति पदं 'श्रोत्रियश्छन्दोऽधीते'[७] इत्यत्र मण्डूकप्लुत्या आगच्छति।

(ग) गङ्गाप्रवाहो यथाऽविच्छिन्नरूपेण प्रवहति तद्वद् यत्सूत्रमनुकरोति तद् गङ्गाप्रवाहाधिकारेति नाम्ना व्यपदिश्यते। यथा—'अव्ययीभावः'[८] इत्यस्याधिकारः 'अन्यपदार्थे च 'संज्ञायाम्'[९] इति सूत्रपर्यन्तं गङ्गाप्रवाहवदविच्छिन्नरूपेण प्रचलतीति।

●

१. अष्टा. ८.२.१;
२. तदेव, १.१.७१।
३. तदेव, १.३.३;
४. तदेव, ६.१.७७।
५. तदेव, ६.१.१२३;
६. तदेव, ५.२.७७।
७. तदेव, ५.२.८४;
८. तदेव, २.१.५।
९. तदेव, २.१.२१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'ङेर्यः' इति सूत्रार्थवर्णनप्रकारः

डॉ. के.वि. सोमयाजुलुः

उपाचार्यः, व्याकरणविभागे

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

श्रीसदाशिवपरिसरः, पुरी, उड़ीसा

***

रामशब्दस्य चतुर्थीविभक्त्येकवचने 'स्वौजसमौट्'[१] इत्यादिसूत्रेण ङेप्रत्यये, 'लशक्वतद्धिते'[२] इति सूत्रेण ङकारस्येत्संज्ञायां 'तस्य लोपः'[३] इति सूत्रेण लोपे च कृते राम+ए इति स्थिते तत्र ङेप्रत्ययस्य यकारादेशविधानाय' 'ङेर्यः'[४] इति सूत्रं श्रीमता पाणिनिना प्रणीतम्। अष्टाध्याय्यां चतुर्थाध्याये प्रथमपादे त्रयोदशसङ्ख्याकमिदं सूत्रम्। तथा च रामशब्दाद् विहितस्य चतुर्थ्येकवचनस्य 'ङे' इत्यस्य 'ङेर्यः' इति सूत्रेण यादेशे राम+य इति स्थिते 'सुपि च'[५] इति सूत्रेण यञादौ सुपि परे तदव्यवहितपूर्वस्यादन्ताङ्गावयवस्यान्त्यस्याकारस्य दीर्घे 'रामाय' इति साधुपदं निष्पद्यते। इदानीं मया 'ङेर्यः' इति सूत्रं यथाशक्ति यथामति व्याख्यायते। तथा हि—ङेः य इति पदच्छेदः। अत्र सूत्रे[६] 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थान इत्यनुवर्तते। आदेश इत्यध्याह्रियते। य इत्यादेशस्य विशेषणम्। तत्र य इत्यस्यादेश इत्यत्र सामानाधिकरण्येनान्वयः। सामानाधिकरण्यञ्चात्र स्वसमानविभक्तिसजातीयसमानविभक्तिकत्वं ग्राह्यम्। अत्र सूत्रे 'अतो भिस ऐस्'[७] इति सूत्रादत इत्यनुवर्तते। अङ्गस्येत्यधिक्रियते। अत इत्यङ्गस्येत्यस्य विशेषणम्। तथा च तत्र 'येन विधिस्तदन्तस्य'[८] इति परिभाषया तदन्तविधावदन्तादङ्गादित्यर्थो लभ्यते। अत इत्यस्य पञ्चम्यन्तत्वेन तद्विशेष्यभूतस्याङ्गस्येत्यस्यापि पञ्चम्यन्ततया विपरिणामे अदन्तादङ्गात् परस्य 'ङे' इत्यस्य यादेशः स्यादिति प्रकृतसूत्रार्थः फलति। 'रामाय, कृष्णाय' इत्यादीन्यस्य सूत्रस्योदाहरणानि भवन्ति।

अयमत्र पूर्वपक्षः—'रामाय' इत्यत्र 'राम+ङे' इति स्थिते 'ङेर्यः' इति सूत्रेण ङेर्यादेशे 'राम+य' इति स्थिते यादेशस्यासुप्त्वात् तस्मिन् परे अदन्ताङ्गस्य रामेत्यस्य 'सुपि च' इति सूत्रेण दीर्घानापत्तिरिति।

---

१. अष्टा. ४.१.२; २. तत्रैव- १.३.८; ३. तत्रैव- १.३.९।
४. तत्रैव- ४.१.१३; ५. तत्रैव- ७.३.१०२; ६. तत्रैव- १.१.४९।
७. तत्रैव- ७.१.९; ८. तत्रैव- १.१.७२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रेदं समाधानम्—'रामाय' इत्यत्र 'राम+य' इति स्थिते यादेशे साक्षात् सुप्त्वस्याभावेऽपि तस्य 'अच: परस्मिन् पूर्वविधौ'[१] इति सूत्रेण स्थानिवद्भावे कृते यादेशस्योक्तरीत्या स्थानिवद्भावेन सुप्त्वाद्यञादिसुप्परकत्वेन 'रामाय' इत्यादावदन्ताङ्गावयवस्यान्त्याकारस्य 'सुपि च' इति सूत्रेण दीर्घप्रवृत्तौ न दोष:।

अयमत्र पुन: पूर्वपक्ष:—'रामाय' इत्यादौ 'राम+य' इति स्थिते 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रेणैव यादेशस्य स्थानिवद्भावेन सुप्त्वात् तस्मिन् परे पूर्वस्यादन्ताङ्गस्य 'सुपि च' इति सूत्रेण दीर्घविधानद्वारा 'रामाय' इत्यादिपदानां साधुत्वसिद्ध्या तत्र यादेशस्य स्थानिवद्भावाय किमर्थं 'अच: परस्मिन् पूर्वविधौ' इति सूत्रपर्यन्तानुधावनमिति।

अत्रेदं समाधानम्—रामाय इत्यादौ रामशब्दात् परस्य ङेप्रत्ययस्य 'ङेर्य:' इति सूत्रेण यादेशे कृते 'राम+य' इति स्थिते अनुबन्धविनिर्मुक्तस्यैव पदार्थोपस्थितिरिति सिद्धान्तानुसारं केवलस्याप्येकारस्य सुप्त्वेन तस्याल्त्वात् स्थानिवत्सूत्रस्थानल्विधाविति निषेधेन यादेशविषये स्थानिवद्भावाप्रवृत्तेस्तत्र यादेशस्य स्थानिवद्भावविधानद्वारा पूर्वस्यादन्ताङ्गावयवस्यान्त्यस्याकारस्य 'सुपि च' इति सूत्रेण दीर्घप्रवृत्त्यर्थं 'अच: परस्मिन् पूर्वविधौ' इति सूत्रेणैव यादेशस्य स्थानिवद्भावविधानमुचितमिति।

नन्वेवं 'रामाय' इत्यत्र 'राम+य' इति स्थिते यथाकथञ्चित् स्थानिवत्सूत्रेण, निष्कर्षे 'अच: परस्मिन् पूर्वविधौ' इति सूत्रेण वा स्थानिवद्भावमादाय यादेशस्य सुप्त्वसम्पादनपूर्वकं 'सुपि च' इति सूत्रेण दीर्घप्रवृत्त्या 'रामाय' इत्यादिरूपसिद्धौ न कोऽपि दोष इति कथनं सुतरामनुचितम्, यतस्तत्र 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'[२] इति परिभाषया अदन्ताङ्गङेप्रत्ययसन्निपातं निमित्तीकृत्य जायमानो ङेप्रत्ययस्थाने विहितो यादेशस्तत्सम्बन्धविघातकस्य 'सुपि च' इति दीर्घस्यानिमित्ततया प्रकृते 'सुपि च' इति दीर्घस्याप्रवृत्त्या 'रामाय' इत्यादिप्रयोगाणामसाधुत्वापत्तेरिति चेत्, न, 'कष्टाय क्रमणे' इत्यादिपाणिनीयसूत्रे 'कष्टाय' इति निर्देशबलात् तस्या: परिभाषाया अनित्यत्वेन प्रकृते सन्निपातपरिभाषाया अप्रवृत्त्या 'सुपि च' इति सूत्रेणादन्ताङ्गस्य दीर्घे कृते 'रामाय' इत्यादिरूपसिद्धावदोषात्।

न च सन्निपातपरिभाषाया अङ्गीकारेऽपि 'रामाय' इत्यत्र 'सुपि च' इति सूत्रेणादन्ताङ्गस्य दीर्घाप्राप्तावपि 'अकृत्सार्वधातुकयोर्दीर्घ:'[३] इति सूत्रेण दीर्घे कृते 'रामाय' इत्यादिप्रयोगाणां साधुत्वसिद्ध्याऽदोषादिति वाच्यम्, 'अकृत्सार्वधातु-

---

१. अष्टा. १.१.५७।

२. वै.सि.कौ. अजन्त- पु.प्र., 'ङेर्य:' सूत्रोपरि; ३. अष्टा. ७.४.२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कयोर्दीर्घः' इति सूत्रे अकृत्सार्वधातुकयोरिति पर्युदासबलेनासुपि पर एव तत्सूत्रविहितदीर्घस्य प्रवृत्त्या 'रामाय' इत्यत्र स्थानिवद्भावेन यादेशस्य सुप्त्वेन प्रकृते 'अकृत्सार्वधातुकयोर्दीर्घः' इति सूत्रविहितदीर्घस्याप्रवृत्तेः। एवञ्च 'रामाय' इत्यादौ 'कष्टाय क्रमणे' इत्यादिनिर्देशेन सन्निपातपरिभाषाया अनित्यत्वज्ञापनद्वारा प्रकृते तत्परिभाषाया अप्रवृत्त्या निरातङ्कं 'सुपि च' इति सूत्रेणादन्ताङ्गस्य दीर्घे कृते 'रामाय', 'कृष्णाय' इत्यादिप्रयोगाणां साधुत्वं सिद्ध्यतीति श्रीमतो भट्टोजिदीक्षितस्याशयः। स्पष्टञ्चेदं वैयाकरणसिद्धान्तकौमुद्याम्[१]।

अत्र नागेशः—'रामाय' इत्यादौ 'कष्टाय क्रमणे' इत्यादिनिर्देशेन सन्निपातपरिभाषाया अनित्यत्वज्ञापनात् प्रकृते तत्परिभाषाया अप्रवृत्त्या यञादौ सुपि परे पूर्वस्यादन्ताङ्गस्य 'सुपि च' इति सूत्रेण दीर्घे कृते 'रामाय' इत्यादिप्रयोगाणां साधुत्वं सिद्ध्यति।

ननु 'रामाय' इत्यादौ 'कष्टाय क्रमणे' इत्यादिनिर्देशेन सन्निपातपरिभाषाया अनित्यत्वज्ञापनात् प्रकृते तत्परिभाषाया अप्रवृत्तावपि 'असिद्धं बहिरङ्गमन्तरङ्गे'[२] इति परिभाषया अन्तरङ्गे सुपि चेति सूत्रेण दीर्घे कर्तव्ये बहिर्भूतयञादिसुप्प्रत्यय-सापेक्षत्वेन बहिरङ्गत्वेन यादेशस्यासिद्धत्वात् तत्र सुपि चेति दीर्घस्याप्रवृत्तौ कथं 'रामाय, कृष्णाय' इत्यादिप्रयोगाणां साधुत्वं सिद्ध्यतीति चेत्, न, यादेशदीर्घयोस्समाननिमित्तकत्वेन तयोरन्तरङ्गबहिरङ्गभावस्य प्रतिपादयितुमशक्य-त्वात् प्रकृतोदाहरणविषये अन्तरङ्गपरिभाषाया अप्रवृत्तेः।

ननु 'रामाय' इत्यादावुक्तदिशाऽन्तरङ्गबहिरङ्गभावस्येव सन्निपातविघात-स्याप्यभावेन अन्तरङ्गपरिभाषाया इव सन्निपातपरिभाषाया अप्यप्रवृत्त्या सुपि चेति सूत्रेण यञादौ सुपि परे अदन्ताङ्गस्य दीर्घे कृते 'रामाय' इत्यादिप्रयोगाणां साधुत्वान्वाख्याने न दोष इति चेत्, न, तत्रारोपितसन्निपातविघातस्याभावेऽपि वास्तवसन्निपातविघातस्य सत्त्वेन तादृशं वास्तवसन्निपातविघातमाश्रित्य प्रकृते सन्निपातपरिभाषया दीर्घस्याप्राप्तौ तत्प्राप्त्यर्थं 'कष्टाय क्रमणे' इत्यादिनिर्देशमूलकसन्निपातपरिभाषाया अनित्यत्वज्ञापनस्यैव युक्तत्वेन तामेव सरणिमाश्रित्य 'सुपि च' इति सूत्रेणादन्ताङ्गस्य दीर्घे कृते 'रामाय' इत्यादिप्रयोगाणां साधुत्वान्वाख्यानेनादोषात्।

किञ्च 'रामाय' इत्यादावन्तरङ्गपरिभाषया 'सुपि च' इति सूत्रविहितदीर्घाभावशङ्काऽपि कर्तुं न शक्यते। यतस्तत्रान्तरङ्गपरिभाषया अन्तरङ्गे

---

१. 'वैयाकरणसिद्धान्तकौमुदी', बालमनोरमाटीकोपेता, प्रथमभागः, अजन्तपुल्लिङ्गप्रकरणम्, पृ. १३०।
२. वै.सि.कौ. परिभाषाप्रकरणे 'स्वरितेनाधिकारः' सूत्रोपरि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्ये कर्तव्य एव बहिरङ्गस्यासिद्धत्वं प्रतिपाद्यते, न त्वन्तरङ्गे कृते। तथा च 'रामाय' इत्यादावन्तरङ्गपरिभाषाया एवाप्रवृत्तेस्तत्र 'सुपि च' इति सूत्रेण दीर्घो निराबाधः। एवञ्च 'रामाय' इत्यादौ 'कष्टाय क्रमणे' इत्यादिनिर्देशेन सन्निपातपरिभाषाया अनित्यत्वज्ञापनद्वारा 'सुपि च' इति सूत्रेण दीर्घविधानपूर्वकं 'रामाय' इत्यादिप्रयोगाणां साधुत्वसम्पादनमुचितमिति। स्पष्टञ्चेदं लघुशब्देन्दुशेखरे[1]। अस्याः सन्निपातपरिभाषाया अनित्यत्वे फलानि विस्तरेण परिभाषेन्दुशेखरे वैयाकरणनागेशेन प्रत्यपादिषत। प्रस्तुतशोधपत्रविस्तारभयादत्र तानि फलानि मया नैव निरूप्यन्ते।

समीक्षा

एतावता प्रबन्धेन 'रामाय' इत्यादौ सन्निपातपरिभाषया यञादौ सुपि परे अदन्ताङ्गस्य 'सुपि च' इति सूत्रेण दीर्घो न भवतीत्याशङ्क्य 'कष्टाय क्रमणे' इत्यादिनिर्देशेन तस्याः परिभाषाया अनित्यत्वज्ञापनद्वारा 'सुपि च' इति सूत्रेणादन्ताङ्गस्य दीर्घे 'रामाय, कृष्णाय' इत्यादिप्रयोगाणां साधुत्वं सिद्ध्यतीति वैयाकरणसिद्धान्तकौमुद्यां महानुभावेन भट्टोजिदीक्षितेन सूत्रप्रायं प्रत्यपादि। तमेव भट्टोजिदीक्षितसिद्धान्तं वैयाकरणनागेशोऽपि स्वप्रणीते लघुशब्देन्दुशेखरेऽनेक-युक्तिप्रत्युक्तिपूर्वकं मुनित्रयसम्मतं साङ्गोपाङ्गं समर्थयाम्बभूव। तत्सन्दर्भे सन्निपातपरिभाषाया अप्रवृत्त्यङ्गीकारे प्रसक्तः कृन्मेजन्तसूत्रभाष्यविरोधोऽपि नागेशेन पर्यहारि। यद्यपि वैयाकरणसिद्धान्तकौमुद्यां दीक्षितेन सन्निपातपरिभाषाया अनित्यत्वे 'कष्टाय क्रमणे' इति निर्देशाख्यमेकमेव प्रयोजनं प्रादर्शि, तथापि परिभाषेन्दुशेखरे सन्निपातपरिभाषाया अनित्यत्वज्ञापने दाक्षिः, क्रापयति, अदीदपत्, नदिकुमारि' इत्यादीन्यनेकानि प्रयोजनानि नागेशेन साङ्गोपाङ्गं प्रादर्शिषत। सर्वाण्यप्येतानि प्रयोजनानि भट्टोजिदीक्षितस्यापि सम्मतान्येव। तथापि स्थालीपुलाकन्यायेन 'कष्टाय' इत्येकमेव प्रयोजनं दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां प्रत्यपादि। तावन्मात्रेण नागेशप्रतिपादितप्रयोजनानां विषये भट्टोजिदीक्षितस्यारुचिर्नास्ति। अस्मादेव हेतोः 'रामाय' इत्यादिप्रयोगाणामुक्तदिशा साधुत्वान्वाख्यान प्रतिपादनसन्दर्भे, सन्निपातपरिभाषाया अनित्यत्वज्ञापनविषये, 'दाक्षिः' 'क्रापयति', 'अदीदपत्', 'नदिकुमारि' इत्यादीनामपि प्रयोजनानां सन्निपातपरिभाषाया अनित्यत्वस्य प्रमाणत्वेन निरूपणविषये च भट्टोजिदीक्षितनागेशयोरैकमत्यमेव वर्तते, न तु लेशतोऽपि वैमत्यमिति मन्त्रिगूढाशयः।

●

---

१. लघुशब्देन्दुशेखरः (सशेखरदीपकः), अजन्तपुल्लिङ्गप्रकरणम्, पृष्ठसंख्या-१९४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्विकर्मकधातुसमीक्षा

डॉ. भगवतशरणशुक्लः
प्राचार्यः
सौदामिनी-संस्कृत-महाविद्यालये
१४९, विवेकानन्दमार्गे, प्रयागे

***

क्रियते विविधरूपैरात्मानं प्रदर्श्य साध्यत्वेनाभिधीयते या सा क्रिया। साध्यत्वं नाम क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्। अत एव क्रियालक्षणं व्याचक्षाणो वाक्यपदीयकारः—

'यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते'[१]॥

इत्थमाह। एवं साध्यत्वेनाभिधीयमाना सा क्रिया भवति-पचत्यादिरूपेण धातुरूपनिबन्धना भवति। सर्वं वाक्यं क्रियया परिसमाप्यत इत्यभियुक्तोक्तेः क्रियाणां महत्त्वं वाक्येषु सर्वोपरि विद्यते। सा च क्रिया धातुभिरभिधीयते। दधाति विविधरूपमिति धातुः। तल्लक्षणञ्च क्रियावाचकत्वे सति भ्वादिगणपठितानुपूर्वीमत्त्वम्। धातूनां फलव्यापारयोः शक्तिः 'फलव्यापारयोः धातुरिति'[२] वैयाकरणभूषणोक्त्या ज्ञायते। तत्र भट्टोजिदीक्षितप्रभृतयः फलनिरूपिता, व्यापारनिरूपिता च धातोः पृथक् शक्तिः, एकवृन्तलग्नफलद्वयन्यायेन पृथगुपस्थितिप्रयोजिका खण्डश एकैव शक्तिरिति वा स्वीकुर्वन्ति। नागेशप्रभृतयस्तु फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिरिति स्वीकुर्वन्ति।

सकर्मकाकर्मकभेदेन धातूनां द्वैविध्यं वर्त्तते। तत्र फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति बोध्यम्।

येषु सकर्मकधातुषु कर्मद्वयी तिष्ठति, ते धातवो द्विकर्मकाः, द्वे कर्मणी येषु ते द्विकर्मका इति यावत्। के च त इति जिज्ञासायां सिद्धान्तकौमुद्याम्—

१. वाक्यपदीये क्रियासमुद्देशे, का. १; २. वैयाकरणभूषणसारे धात्वर्थप्रकरणे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दुह्याच्-पच्-दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्[१]।।

इति पद्यं कथितमस्ति। तेन दुह् प्रपूरणे, टुयाचृ याञ्चायाम्, डुपचष् पाके, दण्ड् दण्डनिपातने, रुधिर् आवरणे, पृच्छि जिज्ञासायाम्, चिञ् चयने, ब्रूञ् व्यक्तायां वाचि, शास् अनुशिष्टौ, जि अभिभवे, मन्थ विलोडने, मुष् स्तेये, णीञ् प्रापणे, हृ हरणे, कृष् विलेखने, (भ्वादिगणीयः) वह् प्रापणे एते धातवो गृह्यन्ते। महाभाष्ये च—

'दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते तदा कीर्तितमाचरितं कविना।।
नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेषु ग्रहणं कर्त्तव्यमिति निश्चयः'[२]।।

इत्युक्तमस्ति। तेनास्यां परिगणनायां पच्, दण्ड्, जि, मन्थ, मुष्, कृष् एते धातवो न ग्राह्या भवन्ति। अत्र प्रक्रियाकौमुदीकारस्तदनुयायिनश्च—

दुह्याच्यर्थरुधिप्रच्छिचिब्रूशासुजिकर्मयुक्।
नीहृकृष्मन्थ्वहदण्डग्रहमुष्पच्कर्मभाक्।।

इत्युक्तवन्तः। तत्र अर्थधातुः ग्रहधातुश्चाधिकौ भवतः। अपि च पूर्वोक्ते 'नीवह्योर्हरतेश्चापि' इत्यादिपद्ये चकारः पठितस्तेन चकारेण 'जिकृष्मन्थ्मुष्दण्ड्पच्' इत्येते धातवो ग्राह्या भवन्ति। किञ्च 'तारि-ग्राहि-मोचि-त्याजि-दीपि' इत्येते ण्यन्ताः पूर्वपठितेषु अधिकाः धातवोऽपि ग्राह्या भवन्तीति माधव उक्तवान्—

जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः।
तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दीपेश्च सङ्ग्रहः।।
कारिकायाञ्च शब्देन सुधाकरमुखैः कृतः[३]।।

किञ्चात्रैव गुरुप्रसादशास्त्री लिखितवान्—

'जिदण्डिकृषिपच्मन्थिमुषिग्रहिदधातवः।
अष्टावपि जयत्याद्या धातवश्चेन सूचिताः'।।

---

१. सिद्धान्तकौमुद्यां कारकप्रकरणे।
२. 'अकथितं च' (१.४.५१) इत्यस्य भाष्ये।
३. शब्दकौस्तुभः, पृ. १३१, द्वितीयभागेऽकथितं चेति सूत्रे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इतीदं श्लोकवार्त्तिकं लिखितवार्त्तिकपुस्तकेऽधिकं दृश्यत इति। अत्रापि पूर्वपठितेषु ग्रह्धातुः दाधातुश्चाधिकौ स्तः।

इत्थं पूर्वोक्तेष्वखिलेषु पद्येषु विचारेण द्विकर्मकधातवो दुह्-याच्-पच्-दण्ड्-रुध्-प्रच्छ्-चि-ब्रू-शास्-जि-मथ्-मुष्-नी-हृ-कृष्-वह्-अर्थ्-भिक्ष्-ग्रह्-धा-तारि-ग्राहि-मोचि-त्याजि-दीपीत्येवंरूपाः प्राप्यन्ते।

एतेषु द्विकर्मकधातुषु प्रयोगविषये तावद् भाष्यकारः 'गां दोग्धि पयः, पौरवं गां याचते, अन्ववरुणद्धि गां व्रजम्, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते, वृक्षमवचिनोति फलानि, पुत्रं धर्मं ब्रूते, पुत्रमनुशास्ति धर्मम्, अजां नयति ग्रामम्, भारं वहति ग्रामम्, भारं हरति ग्रामम्' एतान् प्रयोगान् उक्तवान्। कैयटस्तावत् 'चकारेण जयत्यादयः समुच्चीयन्ते, शतं जयति देवदत्तम्, शतं मुष्णाति देवदत्तम्, शतं दण्डयति देवदत्तम्' इत्युक्तवान्। शेषधातूनां प्रयोगा न तु भाष्यकारेण न च कैयटेन दत्ताः।

भट्टोजिदीक्षितस्तावत् शब्दकौस्तुभे दुह्-याच्-रुध्-प्रच्छ्-चि-ब्रू-शास्-नी-वह्-हृ-धातूनां, ण्यन्तानां गत्यर्थकगम्यादीनां जि-मथ्-मुष्-कृष्-दण्ड्-पच्-तारि-ग्राहि-मोचि-त्याजि-दीपि-धातूनां च प्रयोगान् उक्तवान्। अपि च 'तद्राजस्य तेनैवास्त्रियाम्' (२.४.६२) इति सूत्रस्थम् 'अहमपीदमचोद्यं चोद्ये' इति भाष्यप्रयोगात् चुद्-धातुरपि द्विकर्मकेषु ग्रहीतुं शक्यते, तेन द्विकर्मकधातूनां संख्या षड्विंशतिर्भवति। भट्टोजिदीक्षितः प्रौढमनोरमायामत्रैव सूत्रे ग्रहधातोर्द्विकर्मकेषु पाठमस्वीकृतवान्। दण्ड्धातोर्द्विकर्मकता गर्गाः शतं दड्यन्तामिति भाष्येण, पचेश्च 'कर्मवत् कर्मणा तुल्यक्रियः' (३.१.८७) इति सूत्रे 'दुहिपच्योर्बहुलं सकर्मकयोः' इति वार्त्तिकेन तद्-भाष्येण च सिद्ध्यति। तथैव 'आकृष्टव्या ग्रामं शाखाः' इति 'कृत्यानां कर्तरि वा' (२.३.७१) इति सूत्रस्थभाष्येण कृष्धातुरपि द्विकर्मकेषु भाष्यसम्मतः। यद्यपि मथ्धातोः प्रयोगा न तु भाष्यकारेण, न च कैयटेन प्रदर्शितास्तथापि एतस्य धातोः प्रयोगा यत्र तत्र काव्येषु दृश्यन्ते। तद्दृष्ट्या मन्थधातुरपि द्विकर्मकेषु ग्रहीतुं शक्यते।

अत्रेदं बोध्यम्—द्विकर्मकधातुविषये भाष्यकारो यद् दुह्-याच्-रुध्-प्रच्छ्-भिक्ष्-चि-ब्रू-शास्-नी-वह्-हृ इति धातूनाह, त एव धातवः काशिकाकारेण काशिकाग्रन्थे व्याख्याताः। किन्तु हरदत्तः कैयटानुरोधेन दण्ड्-जि-मुष्-कृष्-धातूनपि गृहीतवान्; किन्तु मन्थ्-पच्-धात्वोर्विवरणं न प्रस्तुतवान्। भिक्ष्धातुरत्र भिक्षणार्थकः, याच्धातुश्च अनुनयार्थकस्तेन स्वीकृतः। मम मते तु भिक्ष्-धातोः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'भिक्षायामलाभे लाभे च' इत्यर्थेषु सत्त्वात् टुयाचृधातोश्च याञ्चायामित्यर्थे सत्त्वाद् उभयोरर्थभेदः सुतरां दृश्यते। हरदत्तोक्तरीत्यापि टुयाचृधातोरनुनयार्थकत्वेऽपि अर्थभेदो दृश्यते। अतो भाष्यकारोक्तद्विकर्मकेषु धातुषु एतद् धातुद्वयं समुचितमेव। भाष्योक्ता एव धातवो व्युत्पत्तिवादेऽपि[१] व्याख्याताः। तत्र चकारेण स्वीकृता दण्ड्-जि-मुष्-कृष्-धातवस्तेन न गृहीताः। यद्यपि नागेशभट्टेन सिद्धान्तमञ्जूषायां बृहच्छब्देन्दुशेखरे च सिद्धान्तकौमुद्यामुक्ता अखिला द्विकर्मकधातवो व्याख्याताः, तथापि लघुशब्देन्दुशेखरे स भाष्योक्तधातून् विहाय सर्वत्र द्विकर्मकेषु व्यापारद्वयार्थकत्वं स्वीकृतवान्। कैयटेन यद्यपि चकारेण जयत्यादयो धातवः कथिताः; किन्तु उदाहरणत्वेन जि-मुष्-दण्ड इत्येते एव कथिताः। अतोऽनेन विवेचनेन ज्ञायते यद् द्विकर्मकेषु केवला दुह्-याच्-पच्-रुध्-प्रच्छ्-भिक्ष्-चि-ब्रू-शास्-जि-मुष्-दण्ड्-नी-हृ-वह्-कृष् एते धातवो ग्राह्याः। अन्ये च नागेशोक्तव्यापारद्वयार्थकत्वेन समाधेयाः। यदि—

जिदण्डकृषिपच्मन्थिमुषिग्रहिदधातयः।
अष्टावपि जयत्याद्या धातवश्चेन सूचिताः।।

इति गुरुप्रसादशास्त्रिणोक्तश्लोकवार्त्तिकविषये विचार्यते, अथवा—

'जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः।
तारेर्ग्राहेस्तथा मोचेस्त्याजेर्दीपेश्च सङ्ग्रहः।।
कारिकायाश्चशब्देन सुधाकरमुखैः कृतः।।

इति माधवोक्तश्लोकवार्तिकविषये च विचार्यते, तर्हि पूर्वपद्योक्तग्रहि-दधातिविषये, पश्चात्पद्योक्तानां तारि-ग्राहि-मोचि-त्याजि-दीपि-धातूनां विषये च समस्या आपतति। एतेषां समायोजनं कथं भवेत्। यतो हि भट्टोजिदीक्षितेन द्विकर्मकेषु ये धातवः कथितास्तत्र भाष्यकैयटोक्तधातुषु केवलं मन्थ्-धातुरप्रामाणिकः सिद्ध्यति। पूर्वोक्तश्लोकवार्तिकोक्तधातवस्तु सप्त सन्ति। तेषां विषये तादृशं प्रमाणं नैवोपलभ्यते। भट्टोजिदीक्षितस्तु सिद्धान्तकौमुद्यां दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छ्-चि-ब्रू-शास्-जि-मन्थ्-मुष्-नी-हृ-कृष्-वह् एते षोडश धातवो द्विकर्मका इत्युक्तवान्। एतेषां समीक्षायां 'कर्मवत्कर्मणा तुल्यक्रियः' (३.१.८७) इति सूत्रे दुहिपच्योर्बहुलं सकर्मकयोरिति वार्त्तिकानुसारेण तद्भाष्येण च पच्धातोः द्विकर्मकेषु प्रमाणं स्वीकृतवान्। तथैव आकृष्टव्या ग्रामं शाखा इति 'कृत्यानां कर्तरि वा'

१. द्वितीयप्रकरणे जयाटीकोपेते, पृ. १९६-२०२ यावत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(२.३.७१) इति सूत्रस्थभाष्येण कृष्धातुविषये प्रमाणं सुतरां सिद्ध्यति। मन्थविषये च सः 'येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे' इति किरातार्जुनीये (५.३०) भारविपद्योक्तमुदाहरणं प्रदर्श्य तत्र प्रमाणं दत्तवान्। ग्रहधातुविषये भट्टोजिदीक्षितो द्विकर्मकत्वं न स्वीकरोति। धा-तारि-मोचीत्यादि-विषये प्रौढमनोरमायां न किञ्चिदुक्तवान्। अपि च ग्राहि-धा-तारि-मोचि-त्याजि-दीपि-धातूनां विषये च चेत् प्रयोगाः प्राप्यन्ते, तर्हि नागेशोक्तसिद्धान्तो व्यापारद्वयरूप एव तर्कसङ्गत इति बोध्यम्।

मम मते तु सिद्धान्तकौमुदीस्थद्विकर्मकधातुबोधकपद्यस्थाने पद्यमिदं योजनीयम्। तदित्थम्—

दुह्याच्भिक्ष्दण्ड्रुधिप्रच्छिचिब्रूशासुजिपच्मुषाम्।
नीहृकृष्वह्मथां कर्मयुक् चैवाकथितं भवेत्।।

अनेन पद्येन भिक्ष्धातोर्ग्रहणं भवति, अथ च अन्या अपि आपत्तयः समाहिता भवन्ति।

एतैर्दुहादिधातुभिर्योगेऽपादानादिभिरविवक्षितस्य कारकस्य कर्मसंज्ञा 'अकथितं च' (१.४.५१) इति सूत्रेण भवति। अत्राविवक्षा अपादानत्वादिप्राप्तिपूर्विका, दुह्-याच्-भिक्ष्-दण्ड्-चिञ्-जि-मुष् एषु अपादानत्वाविवक्षायां कर्मत्वविवक्षायां चानेन कर्मत्वे द्वितीया, तेष्वपादानत्वविवक्षायां पञ्चम्यपि भवति। नी-हृ-कृष्-वह्-रुध्-धातुप्रयोगेऽधिकरणत्वाविवक्षायां कर्मत्वविवक्षायां कर्मत्वे द्वितीया, अधिकरणत्वविवक्षायाञ्च सप्तमी भवति। मन्थ्-ब्रू-शास् एतेषां प्रयोगे सम्प्रदानत्वाविवक्षायां कर्मत्वविवक्षायाञ्च कर्मत्वे द्वितीया, सम्प्रदानत्वविवक्षायाञ्च चतुर्थी भवति। पच्-प्रच्छ्-धातुप्रयोगे करणत्वाविवक्षायां कर्मत्वविवक्षायां कर्मत्वे द्वितीया, करणत्वविवक्षायाञ्च तृतीया भवति।

मन्थ्-धातोः सिद्धान्तकौमुद्यां 'सुधां क्षीरनिधिं मथ्नाति' इति प्रयोगो विद्यते। अत्र भट्टोजिदीक्षितास्तदनुयायिनश्च—

'येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे' (किरातार्जुनीये-५/३०) इति भारविप्रयोगमादाय क्षीरनिधिं गौणकर्म, सुधा प्रधानकर्म इति स्वीकुर्वन्ति। ते हि मन्थ्धातोर्द्रवद्रव्यगतसारोद्भावनानुकूलव्यापार इत्यर्थं विधाय फलस्य द्रव्यद्रव्यगतसारोद्भावनाश्रयत्वात् सुधा प्रधानं कर्म, क्षीरनीधेः सकाशात् सुधाया उद्भवात् क्षीरनिधिरिति गौणकर्म। अत एव भारविः गौणे कर्मणि लकारं विधाय तस्य चोक्तत्वात् क्षीरनिधिरित्यत्र प्रथमां साधयति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किन्त्विदं सर्वमसङ्गतं भाष्यकैयटनागेशविरुद्धत्वात्। यथा पूर्वमेवास्माभिरुक्तं यद् द्विकर्मक-धातुषु मन्थ्धातोः पाठोऽप्रामाणिकः, भाष्यकैयटाभ्यामकथनात्। 'जि-दण्डि-कृषि-पचि-मन्थि-मुषि-ग्रहि-दधातयः। अष्टावपि जयत्याद्या धातवश्चेन सूचिताः'।। इति गुरुप्रसादशास्त्रिणा उल्लिखितेन वार्तिकपद्येन एतस्यापि ग्रहणं क्रियते, तर्हि ग्रहदधात्योरपि प्रसङ्ग आपद्येत। यस्य चर्चाऽपि दुह्-याच्-पच्-दण्ड्-इत्यादिपद्ये न वर्त्तते। अतो ग्रहदधात्योरिव मन्थ्धातोरपि द्विकर्मकेषु पठितेषु धातुषु ग्रहणमप्रामाणिकं मन्तव्यम्। अत एतेषां द्विकर्मताविषये व्यापारद्वयरूपः सिद्धान्तो नागेशोक्त एव युक्तियुक्तः। अतोऽर्थनिबन्धनेयं संज्ञेति सिद्धान्तोऽपि भाष्येऽकथनादप्रामाणिकः। यद्यपि 'अहमपीदमचोद्यं चोद्ये' इति तद्राजसूत्रस्थभाष्य-मतानुसारेण प्रच्छिपर्यायस्य चुद्धातोः द्विकर्मता सिद्ध्यति, तथैव भाष्पर्यायत्वेन 'स्थास्नुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं यथार्थम्' इति भट्टिप्रयोगात्, 'शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव' इति कालिदासप्रयोगात्, 'उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः' इति भारविवचनात्, 'अर्थनिबन्धनेयं संज्ञा' इति कैयटोक्तः सिद्धान्त आवश्यकस्तिष्ठति, तथापि व्यापारद्वयरूपद्विकर्मकत्वसिद्धान्तेनैव समेषां प्रयोगाणां समाधानाद् भाष्यानुक्तत्वाच्च कैयटकथनं युक्तियुक्तं न भवतीति बोध्यम्। अतो भाष्यकैयटोक्तभिन्नेषु द्विकर्मकधातुषु प्रधाने कर्मणि एव लकारा भविष्यन्ति। अत एवास्मिन् विषये शब्दरत्नकारो हरिदीक्षितः—'तत्र ये व्यापारद्वयार्थत्वेन द्विकर्मकास्तेषां प्रधानकर्मणि लादयः। प्राधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामित्युक्तेः' इत्याह[१]। प्रधानकर्मत्वञ्चात्र कर्तृप्रत्ययसमभिव्यहारे कर्तृनिष्ठप्रधानधात्वर्थव्यापारमात्र-विशेषणफलाश्रयत्वम्। गौणकर्मत्वञ्च कर्तृनिष्ठप्रधानद्विकर्मकधात्वर्थव्यापार-मात्रविशेषणफलस्य फलतानवच्छेदकसम्बन्धेन आश्रयत्वम्। फलतानवच्छेदक-सम्बन्धः संयोगसमवायविषयविषयिभावाद्यन्यतम एव, फलतावच्छेदकसम्बन्धश्च जन्यजनकभावः।

अपि च, चेद् भारविप्रयोगमादाय मन्थ्धातोर्ग्रहणमावश्यकम्, तर्हि एतस्य ग्रहणं नीप्रभृतिष्वेवावश्यकं भवति। प्रयोगेषु तावत् लोकः प्रमाणम्। लोके 'दधि मथ्नाति' इत्येव प्रयोगो दृश्यते, न तावत् 'नवनीतं मथ्नाति' इति। अत एव यशोदाया दधिमन्थनविषयकं पद्यमस्मिन् विषये ..वदवलोकनीयं श्रीमद्भागवते—

---

१. प्रौढमनोरमा-कारकप्रकरणे, अकथितञ्चेति सूत्रे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एकदा गृहदासीषु यशोदा नन्दगेहिनी।
कर्मान्तरनियुक्तासु निर्ममन्थ स्वयं दधि[१]॥

इत्थं यत्र कुत्रापि मन्थ्धातोः प्रयोगाः सन्ति, तत्र सर्वत्र य आलोडनाश्रयः, स एव प्रयोगे प्रधानकर्मत्वेन गृहीतोऽस्ति। यथा वेणीसंहारे—

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन[२]॥

अत्र सर्वत्र प्रधानकर्माणि एव दत्तानि, तानि क्रमशः कौरवशतं, रुधिरं, सुयोधनोरू, सन्धिमिति बोध्यानि। मन्थ्धातोरत्र पद्ये प्रधानं किं भवितुं शक्नुयात् कौरवशतं विहाय। चेत् कल्पेतापि किमपि, तर्हि कवितात्पर्यं, व्यञ्जना, काकुर्वा तेन तत्रावबोद्धुं कश्चित् प्रभवेदिति तावद् विचारणीयम्। किञ्च क्षीरसागरमन्थनप्रसङ्गे श्रीमद्भागवत एव पद्यमिदमवलोकयन्तु—

कृतस्थानविभागास्त एवं काश्यपनन्दनाः।
ममन्थुः परमायत्ताः अमृतार्थं पयोनिधिम्[३]॥

अस्मिन् पद्ये अमृतार्थं पयोनिधिमिति लिखितमस्ति। तत्र अमृतार्थमिति पदेन को वा विचारकः सम्प्रदानत्वं न स्वीकुर्यात्। इत्थमेव महाभारतेऽपि द्रष्टव्यम्—

ततस्तेन सुराः सार्धं समुद्रमुपतस्थिरे।
तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलम्॥ (आदिपर्व, १८/९)

अत्रापि 'अमृतास्यार्थे' इत्यत्र सम्प्रदानत्वमेव सूचितम्। अतो भट्टोजिदीक्षितस्य कथनेन भ्रमिताः सर्वे तदनुयायिनः शोचनीया एव मन्तव्याः। भ्रमस्य कारणमत्र किमिति जिज्ञासायाम्—

'दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्'[४]॥

---

१. श्रीमद्भागवते-१०.९.१;
२. वेणीसंहारे-१.५।
३. श्रीमद्भागवते-८.७.५;
४. सिद्धान्तकौमुद्यां, कारकप्रकरणे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति पद्यम्, अथ च 'येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे' इति भारविश्लोकश्च। अत्र अम्बुनिधिरिति प्रयोगः 'ममन्थे' इत्यत्र कर्मणि लकारादुक्तः। 'गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्'[१] इति सिद्धान्तात् तद्-दृष्ट्या कोऽपि भवेद् भट्टोजिदीक्षितसममेव विचारयेत्। तेन तद्दृष्ट्या भट्टोजिदीक्षितकथनं समीचीनं भवति। इत्थं पूर्वोक्तो दुह्यादिषु मन्थधातोः पाठो भ्रमस्य प्रमुखं कारणं तिष्ठति। प्रयुक्तानामन्वाख्यानं नाप्रयुक्तानामिति व्याकरणसिद्धान्तस्यापि हानिर्दृश्यते, प्रयुक्तस्यान्यथा व्याख्यानात्। अस्मिन् विषये मयोक्तं पद्यमेव सुसङ्गतमस्ति—

दुह्याच्भिक्ष्दण्ड्रुधिप्रच्छिचिब्रूशासुजिपच्मुषाम्।
नीहृकृष्वहमथां कर्मयुक् चैवाकथितं भवेत्।।

अस्माभिरत्र भाष्योक्तो भिक्ष्धातुरपि गृहीतो यः पूर्वपद्ये त्यक्त आसीत्। अपि च मन्थ्धातोर्ग्रहणं नीप्रभृतिषु विहितम्। अनेन यथेष्टं पद्यव्याख्यानात् शाब्दिकसिद्धान्तस्य हानिरपि न जायते। पूर्वोक्तभारविप्रयोगोऽपि सुसङ्गतो भविष्यति, अम्बुनिधेः प्राधान्यात्। अत एव—

'मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन।।
कृतस्थानविभागास्त एवं कश्यपनन्दनाः।
ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम्'[२]।।
'उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः।
ममन्थुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम्'[३]।।
'ततो देवासुरैः सर्वैर्जयशब्दपुरस्सरम्।
दिव्यं वर्षशतं साग्रं मथितः क्षीरसागरः'[४]।।

---

१. सिद्धान्तकौमुद्यां भावकर्मप्रकरणे; २. श्रीमद्भागवते-८.७.५।
३. तत्रैव-८.७.१३; ४. मत्स्यपुराणे-२४९.५४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मथ्यतां मथ्यतां सिन्धुरित्युवाच पुनः पुनः।
अवश्यमुद्योगवतां श्रीरपारा भवेत् सदा।।
ब्रह्मप्रोत्साहिता देवा ममन्थुः पुनरम्बुधिम्।
भ्राम्यमाणे ततः शैले योजनायुतशेखरे[१]।।

इति श्रीमद्भागवतपुराणस्य मत्स्यपुराणस्य च सर्वाणि उदाहरणानि साधूनि भवन्ति। सर्वत्र पूर्वोक्तेषु उदाहरणेषु मन्थ्धातोः प्रधानकर्मत्वेन कौरवशतं, पयोनिधिः, अब्धिः, अम्बुधिः, क्षीरसागर इत्येते कथिताः। एतान् प्रधानकर्मत्वेन स्वीकृत्य सङ्गतिः प्राप्यते। अमृतार्थं पयोनिधिमिति श्रीमद्भागवतकथनं तु स्पष्टमेव अर्थपदेन अमृते सम्प्रदानत्वं सूचितवान्। यद्यपि—

'गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया।।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः'।।

इति भट्टोजिदीक्षितकारिकायामपि 'प्रधाने नीहृकृष्वहाम्' इत्यत्र 'मथ्' इत्यस्य पाठाभावात् तदापत्तिर्न दूरीभवति, तथापि तत्र 'मुख्ये नीमथ्हृकृष्वहाम्' इत्थं न्यासविधानेन अथवा 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्। अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।' (म.भा. १/४/५१) इति भाष्यस्थवार्तिकबलेन चोक्तदोषनिरासो भवतीति बोद्धव्यम्।

एका वार्ताऽत्र समाहिता भवति यत् केनात्र अमृतादिषु सम्प्रदानसंज्ञा स्यात्। तत्रेदं वक्तव्यम्। 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' इति वार्तिकेन अत्र सम्प्रदानसंज्ञा भविष्यति। यतो हि कर्त्ता मन्थनक्रियया अमृतमभिप्रैति। अतस्तस्यानेन वार्त्तिकेन सम्प्रदानसंज्ञा भविष्यति। पश्चात् सम्प्रदानस्याविवक्षायां 'अकथितं च' (७.१४.५१) इत्यनेन कर्मसंज्ञा भविष्यति। अथवा व्यापारद्वयपक्षस्य आश्रयणाद् आलोडनानुकूलव्यापारानुकूलव्यापार इति मन्थ्धातोरर्थ इति स्वीकाराद् आलोडनाश्रयः क्षीरनिध्यादयस्तदनुकूलव्यापाराश्रयः सुधादयस्तदनुकूलव्यापाराश्रयः कर्त्तारो देवप्रभृतय इति बोध्यम्। तथैव अन्येषां भाष्यकैयटपठितधातूनां विषये वक्तुं शक्यते। भाष्यकैयटोक्तधातुविषये तु एकैव व्यापारः स्वीकरणीय इति बोध्यम्।

---

१. मत्स्यपुराणे-२४९.५७-५८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'ण्यन्तद्विकर्मकधातुविषये न काचिद् विप्रतिपत्तिः। तत्र ण्यन्तेषु गत्यर्थकाः, बुद्ध्यर्थकाः, भक्षणार्थकाः, अकर्मकाः, शब्दकर्मका नित्या द्विकर्मकाः, हृ कृ इति धातू च विकल्पेन द्विकर्मकौ, तथैव आत्मनेपदीयावस्थायाम् अभिवादि-दृश्‌धातू चापि विकल्पेन द्विकर्मकौ भवतः'।

इत्थमनेका विचारसरण्यो द्विकर्मकधातुविषये ग्रन्थेषु विचारिताः सन्ति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ऋग्वेदे सृष्टितत्त्वविमर्शः

डॉ. राममूर्तिचतुर्वेदी
उपाचार्यः, संस्कृतविभागस्य
महात्मागान्धी-काशीविद्यापीठे
वाराणस्याम्

❋ ❋ ❋

वैदिकवाङ्मये भारतीयार्यसंस्कृतेर्मूलाधारभूतो ग्रन्थः ऋग्वेदोऽतीव-प्राचीनतमो मन्यते। यद्यपि पाश्चात्यविद्वांस ऋग्वेदस्य विभिन्नं रचनाकालं निर्धारयन्ति, तथापि भारतीयमान्यतानुसारं न केवलमृग्वेदस्य अपि तु समग्रस्यापि वेदस्यापौरुषेयत्वं नैकविधतर्कप्रमाणाभ्यां प्रतिष्ठापितं विद्यते। वेदानामपौरुषेयत्वे सिद्धे रचनाकालस्यावसर एव न प्राप्यते, अतो हेतोर्वेदो नित्यः शब्दराशिः आ सृष्टिकालादेव सम्प्राप्त इत्येव वक्तुं शक्यते।

वेदशब्देभ्यः सृष्टिः—

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वेताश्वतरोपनिषद्–६.१८) इति श्रुत्वा परमेश्वरेण प्रतिकल्पं कश्चिद् ब्रह्मा विधीयते, तथा तस्मै पूर्वतो निजहृदि विद्यमानो नित्यः शब्दराशिर्वेदः प्रदीयते, ब्रह्मा तमेव वेदात्मनाधिगतं शब्दराशिमाधारीकृत्य यथापूर्वं जगत् पुनः संसृजति। मनुस्मृत्याऽपि तदेव स्मार्यते, तद्यथा—

> सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्।
> वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे[१]॥

'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' इति गीतोक्तवचनानुसारं (श्रीमद्भगवद्गीता–४।१३) यद्यपि कृष्णात्मा परमेश्वर एव ब्राह्मणादिचतुर्वर्णानां सर्जकः प्रतीयते, तथापीदं सर्जकत्वं न साक्षात्, अपि तु ब्रह्माणं विधाय तस्मै वेदशब्दराशिप्रदानानन्तरं तद्द्वारा ब्राह्मणादिचतुर्वर्णसर्जनं प्रतिभाति। यतो हि गुणकर्मविभागत एव ब्राह्मणादिचातुर्वर्ण्यं सृष्टमिति पुरस्तादुक्तम्, तच्च

---

१. मनु. १.२१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गुणकर्मविभागज्ञानं वेदज्ञानाधीनम्, वेदाश्च परमेश्वरहृदि निःश्वासरूपेणावस्थिताः परमेश्वरेच्छया ब्रह्मणा समधिगम्यन्ते तथा तेभ्य एव जगन्निर्मीयते। तद्यथा—

चातुर्वर्ण्यं त्रयो लोकाः चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति[१]॥

चातुर्वर्ण्यानामपि पाञ्चभौतिकी सृष्टिरेव लोके दृश्यते, अतः चातुर्वर्ण्यसर्जनात् पूर्वं शब्दादिपञ्चतन्मात्राणां तेभ्यः पञ्चमहाभूतादीनां सृष्टिरावश्यकी, साऽपि वेदादेव जायत इत्यपि स्मृत्या प्रमाणीक्रियते, तद्यथा—

शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः[२]॥

ईश्वरस्य सृष्टिकारणत्वम्—

'वेदात् सर्वं प्रसिद्ध्यति' इति स्मृत्या वेदशब्देभ्यः सृष्ट्युत्पत्तिसम्भावनायां को वा वेदमाधारीकृत्य जगज्जनयतीति जिज्ञासायामुच्यते, यद् ईश्वर एव जगन्निर्माणे क्षमः, तस्यैव हृदयान्तराले निःश्वासभूता वेदाः पूर्वत एव विद्यमाना भवन्ति। कोऽयमीश्वर इत्यपेक्षायां ब्रह्मण एव मायाविशिष्टं स्वरूपमीश्वर इति ऋग्वेदमन्त्रानुशीलनेनाभिज्ञायते।

ऋग्वेदे यद्यपि साक्षादीश्वरशब्देन जगज्जनकत्वं नोपलभ्यते; किन्तु ईश्वर-शब्दसमानार्था हिरण्यगर्भ-प्रजापति-विश्वकर्म-पुरुषादयः शब्दाः प्राप्यन्ते, येषां सृष्ट्युत्पादकत्वमुपलभ्यते। तद्यथा—ऋग्वेदीयदशममण्डलस्य हिरण्यगर्भसूक्ते हिरण्यगर्भस्य जगज्जनकत्वमवलोक्यते। अयं हिरण्यगर्भः प्रजापतिरूपेण ईश्वर एव व्यपदिश्यते।

तदुक्तं सायणाचार्येण 'हिरण्यगर्भः समवर्तताग्रे' (ऋ. १०.१२१.१) इति मन्त्रभाष्ये—'यद्यपि परमात्मैव हिरण्यगर्भस्तथापि तदुपाधिभूतानां वियदादीनां सूक्ष्मभूतानां ब्रह्मण उत्पत्तेस्तदुपहितोऽप्युत्पन्न इत्युच्यते। स च जातमात्र एवैकोऽद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः पतिरीश्वर आसीदिति सायणभाष्यात् स्पष्टमिदं यद्धिरण्यगर्भः परमात्मनो न भिन्नः' इति।

'एकं सद् विप्रा बहुधा वदन्ति' (ऋ. १.१६४.३६) इत्यत्र मन्त्रोक्तैकपद-बोध्यस्य निर्गुणस्य ब्रह्मण एव माययोपहितं नाम क्वचिद् हिरण्यगर्भः, क्वचिद् विश्वकर्मा, क्वचिद् विराट् पुरुष इति व्यपदिश्यते।

---

१. मनु. १२.९७; २. तत्रैव-१२.९८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ऋग्वेदस्य दशममण्डले एकाशीतितमे सूक्तेऽस्यैव ब्रह्मण ईश्वरात्मना भुवनपुत्रो विश्वकर्मा नाम ऋषिः सृष्टिप्रक्रियां प्रकाशयति। सूक्तस्यास्य देवताऽपि विश्वकर्मैव तच्चेश्वरस्यापरं नामावगन्तव्यम्। विश्वं कर्म यस्येति विग्रहबलेन यो विश्वस्य कर्ता स एव विश्वकर्मा ईश्वर एवेत्यत्र न कश्चित् संशीतिलेशः। तद्यथा मन्त्रवर्णः—

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आविवेश[१]।।

मन्त्रस्यास्याभिप्रायं वितन्वता सायणाचार्येणायमाशयः प्रदर्शितो यद् यो विश्वकर्मा परमेश्वर इमानि सर्वाणि भुवनानि प्रलयकाले स्वात्मन्याहुतिप्रक्षेपवत् संहरति, यश्च ऋषिरतीन्द्रियद्रष्टा होता च भूत्वा संहारात्मनो हवनस्य कर्ता भवति सोऽयं विश्वकर्मा परमेश्वरोऽस्माकं समेषां पिता जायते। अत्रायं भावो यत् प्रलयकाले यः परमेश्वरः सर्वान् लोकान् संहरति, पुनः सृष्ट्यादौ सर्वान् लोकान् संसृजति—स एक एव परमात्मा यथाकार्यं स्वात्मानमेव बहुरूपं करोति।

'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.आ. २.४.१), 'एकं वा इदं विबभूव सर्वम्' (ऋ. ८.५८.२), 'रूपं रूपं प्रतिरूपो बभूव' (ऋ. ६.४७.१८), 'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ. ६.४७.१८) इत्याद्याः श्रुतयस्तदेवार्थमभिप्रयन्ति। स तादृशः परमेश्वर आशिषा 'बहु स्यां प्रजायेय' (तै.आ. ८.६) इति श्रुत्या पुनः पुनः सिसृक्षया जगद्भोगमाकाङ्क्षमाणः प्रथमच्छदं—'प्रथमं मुख्यं निष्प्रपञ्चं पारमार्थिकं स्वरूपं विवृणोति, तथा च 'तत् सृष्ट्वा तदेवानुप्राविशत्' (तै.आ. ८.६) इति श्रुत्या स्वसृष्टान् प्राणिहृदयप्रदेशान् जीवात्मरूपेणाविशति।

ऋग्वेदस्यास्य सूक्तस्य द्वितीये मन्त्रे जगन्निर्मातुः परमेश्वरस्य जगन्निर्माणवेलायां किमधिष्ठानं कीदृशञ्चारम्भणमासीदिति प्रश्नोत्तरप्रस्थानेन सृष्टि-विज्ञानं समुपदिष्टं विद्यते, तद्यथा—

किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्।
यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः[२]।

इतः पूर्वस्मिन् मन्त्रे परमेश्वरो विश्वकर्मा प्रलयकाले स्वात्मनि जगत् संहृत्य पश्चात् सिसृक्षायां जातायां सर्वं जगद् यथापूर्वं सृष्ट्वा

१. ऋ.सं. १०.८१.१; २. ऋ.सं. १०.८१.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्रानुप्राविशदित्युक्तम्। सम्प्रति जगदधिष्ठानविषये तदारम्भणविषये च जिज्ञास्यते। लोके हि घटं चिकीर्षुः कुलालो यथा गृहादिकं कञ्चित् स्थानविशेषमधिष्ठाय मृद्रूपेणारम्भद्रव्येण चक्रादिरूपैरुपकरणैर्घटं निर्माति, तद्वद् ईश्वरस्यापि जगदाश्रयभूतयोर्द्यावापृथिव्योरुत्पादनवेलायां किमधिष्ठानमभूत्, तयोरुपादानकारणं किमभूदिति प्रश्नोदये मन्त्रोत्तरार्धेनैव समाधानं क्रियते, यद् विश्वकर्मणः परमेश्वरस्य स्वमहिम्ना अनेकरूपग्रहणसामर्थ्यात् स्वयमेवात्माधिष्ठानं स्वयञ्चात्मोपादानकारणं प्रकल्प्य विश्वचक्षा विश्वकर्मा भूमिं जनयति दिवञ्च विवृणोति। एतदेवार्थं प्रकाशयति पुरस्तान्मन्त्रवर्णः, तद्यथा—

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
स बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः[१]॥

स विश्वकर्मा परमेश्वरः सर्वात्मकत्वाद् अधिष्ठानाद्यभावेऽपि संसारं स्रष्टुं शक्नोति, यतो हि स विश्वतश्चक्षुः सर्वतो व्याप्तचक्षुः, अपि च विश्वतोमुखः सर्वतोमुखः सर्वतोबाहुः सर्वतस्पाद् वर्तते, अतः स्वस्मिन्नेव त्रैलोक्यमुत्पादयति, कथमिति चेत् मन्त्रोत्तरार्धेन तदेतत्प्रकाश्यते यद् एवंविधः स परमेश्वरो बाहुभ्यां दिवं संधमति—सम्यक् प्रेरयति तथा च पतत्रैः—गमनशीलैः पादैः पृथिवीं सम्प्रेरयति, एवंरूपेण स एको देवः स्वयंप्रकाशो द्यावापृथिवीं जनयति। परमेश्वरस्य स्वमहिम्ना विविधरूपग्रहणाज्जगदधिष्ठानं जगदुपादानकारणानि च तत्स्वरूपान्तराण्येवावगन्तव्यानि। अत एव श्रुतौ प्रश्नोत्तराभ्यां सृष्टिबीजं जिज्ञास्य श्रुत्यन्तरेण परब्रह्मण एव जगदाकारत्वं निरूप्यते, तद्यथा—

किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्[२]॥

लोके हि यथा प्रौढं प्रासादं विनिर्माणः कस्मिंश्चिद्वने स्थितं कञ्चिन्महान्तं वृक्षं छित्वा तक्षणादिना प्रासादोपकरणं स्तम्भादिकं सम्पादयति, तद्वत् पूर्वोक्तश्रुत्या यदि परमेश्वरो द्यावापृथिवीमुत्पादयामास, तर्हि कस्माद् वनात् कं वृक्षमादाय तक्षणादिना स्तम्भादिकं निर्मितवान् इति प्रश्नजातं हे मनीषिणो जिज्ञासायुक्तेन मनसा पृच्छत—मनसि विचारयतेत्यर्थः। पुनश्च स परमेश्वरो विश्वानि भुवनानि धारयन् यत्स्थानमध्यतिष्ठत्, तदपि पृच्छत विचारयत इति। समग्रस्यास्य प्रश्नजातस्य इदमेवोत्तरं यद् ब्रह्मैव तद्वनं ब्रह्मैव स वृक्ष इति। यतो हि

---

१. तत्रैव-१०.८१.३; २. तत्रैव-१०.८१.४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तैत्तिरीयब्राह्मणग्रन्थे मन्त्रगतप्रश्नस्य साधूत्तरं द्रष्टुं शक्यते मन्त्राणां व्याख्यानग्रन्थतयाऽत्र ब्राह्मणे ब्रह्मण एवोपकरणत्वमधिष्ठानत्वञ्चोपवर्णितं दृश्यते। तद्यथा—

ब्रह्म तद्वनं ब्रह्म स उ वृक्ष आस यतो द्यावापृथिवी निसृतक्षुः।
मनीषिणो मनसाधिब्रवीमि वो ब्रह्माध्यतिष्ठद् भुवनानि धारयन्[1]॥

तपसो विश्वोत्पत्तिः—

ऋग्वेदस्याघमर्षणसूक्ते चित्रविचित्रस्यास्य जगतः समुद्भवः परमेश्वरेच्छया तत्तपोबलेन च जायत इत्युच्यते। 'यस्य ज्ञानमयं तपः' (मु.उप. १.१.९) इति श्रुत्या तथा 'तपस्तप्त्वेदं सर्वमसृजत्' (तै.आ. ८.६) इति श्रुत्या च परमेश्वरस्यापि सृष्ट्यर्थं तपश्चरणं तत्तपसो जगत्सर्जनञ्चानुमीयते। ऋग्वेदोपान्त्यगतमघमर्षणसूक्तं तु तपस एव जगदिदं सर्वं जायत इति निर्दिशति, तद्यथा—

ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः॥
समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधद् विश्वस्य मिषतो वशी॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीं चान्तरिक्षमथो स्वः[2]॥

अत्र मन्त्रार्थं विवृण्वता सायणाचार्येण सर्वं सृष्ट्युपादानकारणं माययोपहितस्य ब्रह्मणस्तपसोऽध्यजायत इत्युक्तम्। यथा हि तत्रत्यं भाष्यम्— "ऋतमिति सत्यं नाम तच्च मानसं यथार्थसङ्कल्पनरूपम्, ऋतोऽन्यत् सत्यं नाम यथार्थभाषणं वाचिकं सत्यं चकाराभ्यामन्यदपि शास्त्रीयं धर्मजातं सत्यत्वेन समुच्चीयते। एतत्सर्वमभीद्धाद् अभितप्ताद् ब्रह्मणा पुरा सृष्ट्यर्थं कृतात्तपसोऽध्यजायत—उत्पद्यत इत्यर्थः। यद्वा अभीद्धादभितः प्रकाशमानात् परमात्मनो मायाधिष्ठानरूपोपादानभूतादृतं सत्यञ्चाजायत। तस्मादेवेश्वरादहश्च रात्रिश्चाजायत, रात्रिशब्दोऽत्र अह्नोऽप्युपलक्षणम्। तस्मादेवेश्वरादर्णवोऽर्णसोदकेन युक्तः समुद्रश्चाजायत। समुद्रशब्दोऽन्तरिक्षोदध्योः साधारण इत्यभिमतार्थस्य प्रकाशनार्थाय अर्णवशब्दो विशिष्यते। अर्णवात् समुद्रात् सृष्टादध्यूर्ध्वं संवत्सरः

१. तै.ब्रा. २.८.९; २. ऋ.सं. १०.१९०.१-३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संवत्सरोपलक्षितः सर्वः कालोऽजायत। श्रूयते च श्रुतौ—'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्ताः काष्ठाश्च'' (तै.आ.१०.१.२) इति। स चेश्वरोऽहोरात्राण्येतदुपलक्षितानि सर्वाणि भूतानि विदधत् सृजन् मिषतो निमिषादियुक्तस्य विश्वस्य सर्वस्य प्राणिजातस्य वशी स्वामी भूत्वा वर्तते। सूर्याचन्द्रमसौ कालस्य ध्वजभूतौ दिवञ्च पृथिवीञ्चान्तरिक्षञ्चेत्थं त्रिभुवनं विधाता यथा पूर्वस्मिन् कालेऽकल्पयत् सृष्टवान्, तथैवोत्तरोत्तरकल्पेऽपि कल्पयति संसृजतीत्यर्थः।

कालो जगत्सर्जकः—

अथर्ववेदे कालशब्दो निर्विशेषेण परात्परतरं ब्रह्म तथा सविशेषेण जगत्कारणभूतहिरण्यगर्भाख्यं तत्त्वमुच्यते। कालशब्दस्य निर्वचनं कुर्वता निरुक्त-कृता यास्काचार्येण एतदभिहितं यत् 'कालः कालयतेर्गतिकर्मणः' इति। अत्र वृत्तिकृता दुर्गाचार्येणोक्तं यत् कालो हि सः सर्वाण्येव भूतानि कालयति क्षयं नयतीति कालः। एतेन ब्रह्माण्डस्य किमपि गतिमत् तत्त्वं कालपदेनोच्यते। अयं हि कालो नित्योऽजन्योऽपरिच्छिन्नात्मको ब्रह्मरूपः, परिच्छिन्नात्मकः सूर्यादिग्रहगतिनियामको हिरण्यगर्भाख्यः संवत्सररूपः। 'कालः स दूयते प्रथमो नु देवः' (अथर्व. १९.५३.२) इत्याथर्वणश्रुत्या अपरिच्छिन्नात्मकः काल एव परतत्त्वरूपेण निरूपितो विद्यते। नित्यत्व-विभुत्व-सर्वज्ञत्वादिगुणा अस्मिन्नेव कालतत्त्वेऽनुस्यूताः प्रतिपाद्यन्ते, अत एव आथर्वणकालसूक्तव्याख्यानावसरे सायणाचार्येण—'अनेन सूक्तद्वयेन सर्वजगत्कारणभूतः कालरूपः परमात्मा स्तूयते'[१] इति प्रतिज्ञातं दृश्यते। तदनुसारं मायया परिच्छिन्नः कालरूपः परमात्मा द्यावापृथिवीमुत्पादितवान्, तस्मिन्नेव परमात्मनि सूर्यः तपन् समग्रं भूमण्डलं प्रकाशयति, तस्मिन्नेव सर्वाणि भूतानि निवसन्ति, स काल एव सर्वेषां भूतजातानां चक्षुः, तेनैव चक्षुषा कालः सर्वान् जागतिकान् पदार्थान् पश्यति। तथात्र मन्त्रवर्णः—

कालोऽमुं दिवमजनयत् काल इमाः पृथिवीरुत्।
कालो ह भूतं भव्यं चेषितं ह तिष्ठते॥
कालो भूतिमसृजत् काले तपति सूर्यः।
कालो ह विश्वा भूतानि काले चक्षुर्विपश्यति[२]॥

---

१. अथर्ववेद-(१९.५३.१)मन्त्रव्याख्याने सायणः।

२. अथर्व. १९.५३.५-६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आपः स्रष्टुराद्या सृष्टिः—

'अप एव ससर्जादौ तासु बीजमवासृजत्' (मनु. १.८) इति स्मृत्या जगदीश्वरस्य जगन्निर्माणोपादानेषु आप एव प्रथमं मूलतत्त्वं निरूप्यते; परन्तु इदमप्तत्त्वं न केवलं लोकलोचनगोचरीभूतं द्रवात्मकं जलरूपम्, अपि तु वैदिक-विज्ञानानुसारं सकलब्रह्माण्डस्योत्पादकं मूलोपादानकारणमुच्यते। अप्तत्त्वं परमार्थतः अम्भो मरीचिर्भर आपोरूपेण चतुष्प्रकारकं विद्यते, तच्च चतुर्षु लोकेष्वभिव्याप्तं सत् तत्तल्लोकाऽनुरूपां सृष्टिं जनयति। तत्र चतुर्षु प्रकारेषु अम्भःसंज्ञकमप्तत्त्वं प्रथमं विद्यते, एतद्धि महः जनः तपः सत्यमित्यादिसंज्ञया व्यवह्रियमाणेषु सूर्यमण्डलादूर्ध्वलोकेषु व्याप्तं भवति। 'मरीचि'संज्ञकं द्वितीयमप्तत्त्वमन्तरिक्ष-स्थानेष्वभिव्याप्तं भवति। एवं तृतीयं 'भर'नामकमप्तत्त्वं नभोमण्डलादुद्गतं पृथिव्यामुर्वरशक्तिजनकं भवति। एवमेव वसुधातले सर्वत्र प्रवहमानं नद्यादिजलं वापीकूपतडागादिभ्योऽधिगतं पेयं जलञ्च 'आप' इति नाम्ना व्यवहृतं जायते, तथा हि श्रुतौ समाम्नानं दृश्यते—

'स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत अम्भो मरीचिर्भर आप इति। अदोऽम्भः परेण दिवं द्यौः प्रतिष्ठा, अन्तरिक्षं मरीचयः, पृथिवीं भरः या अधस्तात् ता आप इति' (ऐ.उप. ४.१)।

मनुस्मृत्यनुसारमपि परमात्मना जगन्निर्माणेच्छया सर्वतः प्रथममप्तत्त्वं निर्माय तत्रैव सर्वशक्तिसम्भृतं बीजमुत्क्षिप्तम्। तदेव बीजं हिरण्याण्डं समभवत् तत एवाण्डात् सर्वलोकस्रष्टा ब्रह्मा समजायत इति। तद्यथा—

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत्॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः[१]॥

तत्रैव मनुस्मृतौ नारायणपदनिर्वचनावसरे 'आप' इत्ययं शब्दो 'नरसूनवः' इति विशेषेण प्रोक्तो दृश्यते, तस्यायमभिप्रायोऽभिलक्ष्यते यत् परमेश्वरात् प्रथमतया जन्यत्वाद् 'आपो' नरसूनव उच्यन्ते। सृष्टिनिर्माणावसरे विधात्रा सर्वतः प्रथममप्तत्त्वं निर्माय तेन जगन्निर्माणं विधाय पुनः प्रलयावसरे सम्पूर्णस्यास्य जगतस्तास्वेवाप्सु विलयं कृत्वा ता एव आपः स्वाधिष्ठानत्वेनाङ्गीक्रियन्ते, अतस्तेन 'नारायण' इत्यभिधानं लभ्यते। तद्यथा—

१. मनु. १.८-९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः[१]॥

ऋग्वेदेऽपि सर्वलोकजनयिता मूलतत्त्वरूपोऽग्निः अपां गर्भे प्रतिष्ठितो भवति, पुनः जगत्सिसृक्षया ततः स्वात्मानमुद्भाव्य अपोरूपतामादधाति। प्रकृति-सार्वनाम्याच्च, इतरेतरजन्मानः, इतरेतरप्रकृतय इति देवस्वरूपनिरूपणावसरे निरुक्तकारस्य सिद्धान्तात् मन्त्रेषु क्वचिदपां जनयिता अग्निः क्वचिदद्भ्यो जायमानोऽग्निरित्युभयथापि स्तुतो दृश्यते। तद्यथा—

उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः[२]।

अत्र सर्वलोकस्य जनयिता अपां गर्भरूपोऽग्निर्मनुष्याणां रक्षको निरूपितः, पुनः स एव लोकहिताय उस्रिया-उदकानि उज्जजान-उदजनयद् इति प्रतिपादितम्।

क्वचिद्वायुरप्याद्या सृष्टिः—

ऋग्वेदस्यापरस्मिन् मन्त्रे वायुरेव प्रथमा सृष्टिरित्युक्तम्, अपि च तस्मादेव जलादिसूक्ष्मतत्त्वानां सृष्टिर्जातेत्युक्तं दरीदृश्यते। तद्यथा मन्त्रवर्णः—

अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाह।
अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव[३]॥

अत्र सायणाचार्यो व्याख्याति यद् अन्तरिक्षे विभिन्नमार्गैर्गच्छन् वायुः एकमपि दिनं नोपविशति सर्वदैव गच्छतीत्यर्थः। स एव वायुरपां सखा, प्रथमजा सर्वेभ्यः प्राणिभ्यः पूर्वोत्पन्नः, ऋता वा-सत्यवान् सन् कुत्र खलु क्षेत्रे जातस्तथा कस्माच्च स्थानान्निर्गत्येदं सर्वं जगद् व्याप्नोदिति सर्वदा सर्वत्र वर्तमानत्वादस्योत्पत्तिर्व्याप्तिभावश्च न केनापि ज्ञातुं शक्यत इत्यर्थः। अत्र मन्त्र-व्याख्याने वायुः प्रथमजा इति विशेषणेन सम्भक्तो दृश्यते, अतस्तच्छब्द-सामर्थ्यबलेन वायोरपि प्रथमा सृष्टिरत्र वक्तुं शक्यते। अपि च मन्त्रान्तरेऽपि वायोस्तादृशमेव माहात्म्यं द्रष्टुं शक्यते। तद्यथा मन्त्रवर्णः—

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम[४]॥

---

१. मनु. १.१०; २. ऋ.सं. ३.१.१२।
३. तत्रैव-१०.१६८.३; ४. ऋ.सं. १०.१६८.४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रायमाशयः—स एव प्रथमजा वायुरिन्द्रादीनामपि देवानामात्मा भूत्वा जीवरूपेण तेष्ववस्थानात् समग्रस्य भूतजातस्यापि गर्भो भूत्वा अर्थाद् गर्भवत् प्राणवायुरूपेणान्तर्वर्तमानोऽनिवारितगतिः सन् यथाकामं कुतश्चिच्छरीरान्निर्गत्य शरीरान्तरं प्रविशतीत्यर्थः।

एवमेव हिरण्यगर्भसूक्तेऽपि विश्वात्मिका आपः, तत्र हिरण्यगर्भाख्यः प्रजापतिः, अथवा स एव प्राणात्मको वायुरजायत इत्युक्तं दृश्यते। तथा हि मन्त्रवर्णः—

आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम[1]॥

अत्र यथासायणभाष्यमेतदुच्यते, यज्जगदुत्पत्तेः प्राक् परमेश्वरनिस्यन्दिता आप एव सर्वतः प्रथमं विश्वमायन् सर्वं जगद् व्याप्नुवन्, ता एव आपः स्वगर्भमूले प्रजापतिं दधाना देवादीनामपि सर्वेषां प्राणिनामसुं प्राणभूतं गर्भस्थं तं प्रजापतिं प्रथमं जनयन्ति, ततोऽग्निम्, उपलक्षणमेतत्, अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीत्यर्थः। अथवा सृष्ट्यग्रे गर्भं दधाना आपो विश्वात्मनावस्थिता भवन्ति, ततो गर्भभूतात् प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत इति। अथवा उक्तलक्षणा या आपो विश्वमावृत्य स्थिता भवन्ति, ततस्ताभ्योऽद्भ्योऽद्वितीयोऽसुः प्राणात्मकः प्रजापतिरजायत इति। स प्रजापतिरेव भूमेर्जनयिता सत्यधर्मा सत्यमवितथं धर्मजगतो धारयिता दिवमन्तरिक्षोपलक्षितान् सर्वांल्लोकान् जनयामास। तथा स एव लोकाह्लादिनीरप उदकान्यप्युत्पादयामास इति ह्यग्रिमो मन्त्रवर्णो निर्दिशति। तद्यथा—

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम[2]॥

विराट्पुरुषात् सृष्टिः—

ऋग्वेदीयपुरुषसूक्तेऽपि तस्मादेवादिपुरुषात् परब्रह्मणो ब्रह्माण्डदेहो विराट्-संज्ञको ब्रह्मापरपर्यायः पुरुषः समुत्पन्नः, स च विराट्पुरुष इत्यभिधानेन व्यवहृतः। तत्र विराट् नाम विविधानि वस्तूनि राजन्ते यत्रेत्युक्तम्। सोऽयं वेदवेदान्तैकवेद्यः परमात्मा स्वयमेव स्वकीयया मायया ब्रह्माण्डरूपं विराट् देहं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत्। तद्यथा—

---

१. ऋ.सं.-१०.१२१.७; २. तत्रैव-१०.१२१.९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्माद्विराडजायत विराजो अधिपूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः[१]॥

अत्रायमाशयो यत् स जात एव विराट्पुरुषः स्वमहिम्ना व्यतिरिक्तोऽभवत्, अर्थाद् देवतिर्यङ्मनुष्यादिरूपेण विभिन्नो भूत्वा तेषां निवासार्थं द्युलोकादिस्थानं यथापूर्वं ससर्ज इति। अमुमेवाशयमाथर्वणिका उत्तरतापनीयोपनिषदि विस्पष्टमामनन्ति यत् 'स वा एष भूतानीन्द्रियाणि विराजो देवताः कोशाँश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव' इति (नृ.ता. २.१.९)।

अनिर्वचनीयतत्त्वतः सृष्टिः

ऋग्वेदस्यातिप्रसिद्धे नासदीयसूक्ते सृष्टेः प्रागवस्थायां कस्यचिदेकस्यानिर्वचनीयतत्त्वस्य सत्त्वं स्वीक्रियते, तच्च 'आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास' (ऋ.सं. १०.१२९.२) इति मन्त्रवर्णेन निरूप्यते। इदं हि तत्त्वं सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वमेवास्ति, यत् स्वधया स्वमायया आनीत् प्राणितवत्। तस्मात् परः परस्तात् सृष्टेरूर्ध्वं वर्तमानमिदं जगत् तदानीं नासीदित्यर्थः।

पुनरग्रे सूक्तर्षिर्निर्दिशति यत् सृष्टेः प्राक् प्रलयदशायां भूतं भौतिकं सर्वं जगत् तमसाच्छादितमासीत्, यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् तदानीं मूलकारणेन भावरूपाज्ञानेन तमसा सर्वं जगदाच्छादितमासीत्। आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपमज्ञानमेव तम उच्यते। यतः सर्वं जगत् तमसाच्छादितमासीत्, अत एव 'नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्' (ऋ.सं. १०.१२९.१) इत्यादिश्रुत्या समस्तपदार्थजातस्य निषेधः क्रियते। अत्राचार्यसायणस्य विचारोपन्यासोऽवश्यमनुसन्धेयः। नन्वावरकत्वादावरकं तमः कर्ता, आवार्यत्वात् जगत् कर्म, तर्हि कथं तयोः कर्मकर्त्रोस्तादात्म्यं भवितुमर्हति, तदुच्यते—यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते, तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायते। मनुनाऽपि एतदेव स्मर्यते, तद्यथा—

आसीदिदं तमोभूतमज्ञातमलक्षणम्।
अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः[२]॥

कथं वा तत्र विस्पष्टं न ज्ञायत इति जिज्ञासायामुच्यते, यत् 'अप्रकेतं सलिलं सर्वमा इदम्', (ऋ.सं. १०.१२९.३)। इदं सर्वं दृश्यमानं जगद् यद्यपि

१. ऋ.सं. १०.९०.४; २. मनु. १.४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मूल-कारणेन सर्वं गतेन सलिलेन सङ्गतमविभागापन्नमिवासीत्, यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथैव तमसाच्छादितं जगत् न विज्ञातुं शक्यमासीत्, तथापि 'तपसस्तन्महिना जायतैकम्' (ऋ.सं. १०.१२१.३) इति मन्त्रवर्णेन प्रतिपादितं यत् मूलकारणेन तमसा विभागङ्गतमपीदं जगत् परमेश्वरेच्छारूपस्य तपसो महिम्ना उत्पन्नं जायते। परमेश्वरस्य जगदुत्पत्तौ तदिच्छारूपमेव कारणं श्रुतावाम्नातं दृश्यते, तद्यथा—

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा[१]॥

अत्रायं भावः—अस्य विकारजातस्य जगतः प्रागवस्थायां परमेश्वरस्य हृदि कामः जगत्सिसृक्षा समुत्पन्ना, किं हेतुकेयं सिसृक्षेति जिज्ञासायामुच्यते यत् सर्वप्राणिमयस्यास्य परमेश्वरस्यान्तःकरणे पूर्वत एव भाविनः प्रपञ्चजातस्य बीजभूतं रेत आसीत्, तस्मादेव कारणाद् अतीते कल्पे पुण्यापुण्यकर्मकृतां प्राणिनां कर्मानुरूपफलप्रदानाय कर्माध्यक्षस्य सर्वसाक्षिणः परमेश्वरस्य मनसि यथा पूर्वं जगत्स्रष्टुमिच्छा अजायत, तस्याञ्च जातायां तपसा स्रष्टव्यं पर्यालोच्य परमेश्वरः सर्वं जगत् सृजतीति श्रुतावाम्नायते, तद्यथा—

'सोऽकामयद् एकोऽहं बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्च' (तै.आ. ८.६)। पुनरग्रिमे मन्त्रे सूक्तर्षिः परमेश्वरस्य सृष्टिविज्ञानविषये नैजामज्ञानतां प्रकटीकृत्य यस्येदं जगत् कार्यं स एव जानातीति निरूपयति, तद्यथा—

को अद्धा वेद क इह प्रवोचत, कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव[२]।

अत्रायमाशयः—सृष्टेर्दुर्विज्ञानात् कोऽपि पुरुषः पारमार्थ्येन तां ज्ञातुं न शक्नोति, न चास्मिन् लोके वक्तुमपि शक्नोति, कथमिति चेदुच्यते—इयं दृश्यमाना विसृष्टिः भोक्तृभोग्यादिरूपेण विविधा बहुप्रकारा सृष्टिः कस्मादुपादानकारणात् कस्माच्च निमित्तकारणात् प्रादुर्भूता इत्येतदुभयं को वा विस्तरेण वक्तुं शक्नुयात्। यदि देवाः सर्वज्ञाः सन्तस्तां सृष्टिं ज्ञातुं वक्तुं च शक्नुवन्तीति चेदुच्यते, तर्हि तेऽपि न समर्था भवन्तीति वदामः, कथमिति चेदुच्यते—यतो हि देवा अपि अस्य जगतः सर्जनानन्तरमेव प्रादुर्भूताः, अतो

१. ऋ.सं. १०.१२९.४; २. तत्रैव-१०.१२९.६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भूतसृष्टेः पश्चाज्जायमानत्वाद् देवा अपि ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः? तथा अजानन्तो वा कथं प्रब्रूयुः? एवं सति यदि देवा अपि न जानन्ति, तर्हि तद्व्यतिरिक्तः को नाम मनुष्यादिः जगत्कारणं ज्ञातुं प्रभवेत्। अतो यस्येदं जगत् कार्यं स जगदीश्वर एव ज्ञातुं प्रभवतीत्यर्थः। अथवा दुर्विज्ञानत्वादस्य जगतः सोऽपि न जानीयादिति सूक्तर्षेर्मनसि विचिकित्सा जायते, तद्यथा मन्त्रवर्णः—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद[१]॥

अत्रायमभिप्रायः—इयं विविधा सृष्टिर्यतः समजायत इति को जानीयात्? न कोऽपि, कथमिति चेदुच्यते—नास्त्येव जगतो जन्म, कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्ति। यस्मादुपादानभूतान्निमित्तभूताच्च परमात्मनो जगदिदमाबभूव, तं परमात्मानं को ज्ञातुं प्रभवति? न कोऽपीत्यर्थः। एवमेव स्वमेवात्मानं निमित्तीकृत्य स्वयञ्चात्मानमुपादानीकृत्य परमात्मा जगदिदं सर्वं ससर्ज सृष्टवान्, यदि वा न ससर्ज इत्यपि न कोऽपि ज्ञातुं वक्तुं वा प्रभवति। अतोऽस्य जगतो योऽध्यक्ष ईश्वरः परमे व्योमनि उत्कृष्टे आकाशवन्निर्मले स्वप्रकाशे स्वात्मनि वा प्रतिष्ठितो विद्यते, सोऽपि जानाति न वेति अहमपि वक्तुं न शक्नोमि, अथवा सर्वज्ञ ईश्वर एव तां सृष्टिं सम्यक्तया जानीयात्, नान्यः कश्चिदित्येवावितथं स्यात्। स एव स्वात्मनो महिम्ना जगदिदं सर्वं निर्माय तत्र स्वयञ्चानुप्रविश्य भोक्तृभोग्यरूपेण विभागं कृत्वा बालक्रीडनकवत् लीलया क्रीडति। अतो लीलाताण्डवपण्डितं तं परमात्मानमतिरिच्य न कोऽपि तदीयं सृष्टिविज्ञानं ज्ञातुं वक्तुं वा शक्नोतीति निर्विवादम्।

●

१. ऋ.सं. १०.१२९.७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आचार्यजयन्तभट्टाभिमतनिर्विकल्पकविचारः

डॉ. का.इ. धरणीधरः
अध्यक्षः, संस्कृतविभागस्य
पाण्डिच्चेरी-विश्वविद्यालये
पाण्डिच्चेरी

***

तत्र तावन्न्यायदर्शने प्रत्यक्षलक्षणमेवमसूत्रयद् गौतमो महर्षिः— 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' इति[१]। इन्द्रियार्थयोः संयोगादिना उत्पन्नं शाब्दबोधातिरिक्तं भ्रमभिन्नं निश्चयात्मकं यज्ज्ञानं तत् प्रत्यक्षमिति तदर्थः। सूत्रघटितं ज्ञानपदं सूत्रगतविशेषणानां विशेष्यसङ्क्रमणत्वनियमाज्ज्ञानरूपविशेष्यकथनार्थं सुखादिव्यावृत्त्यर्थं वा प्रयुक्तमिति न्यायमञ्जरीकारः प्राह। सूत्रघटकाव्यपदेश्यव्यवसायात्मकपदयोर्निर्विकल्पक-सविकल्पकरूपप्रत्यक्षद्वैविध्यपरत्वं तात्पर्यटीकाकारो मन्यते। 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' इत्यत्राव्यपदेश्यव्य-वस्थायात्मकपदाभ्यां निर्विकल्पकसविकल्पके विवक्षिते इति। परन्तु सूत्रभाष्यवार्त्तिकादिषु ग्रन्थेषु विभागोऽयं न निरूपित इत्यवश्यं ध्येयं सुधीभिः।

अत्रेदं तत्त्वम्—'पृथिव्यादिगुणास्तदर्थाः'[२] इति सूत्रेण पृथिव्यादिनिष्ठानां गन्धादिगुणानामिन्द्रियजन्यप्रत्यक्षविषयत्वमुपपाद्य प्रत्यक्षविषयस्य घटादे-र्गुणनिष्ठप्रकारतानिरूपितविशेष्यत्वं सूचितम्। तथा च गुणविशिष्टद्रव्य-विषयकप्रत्यक्षं सविकल्पात्मकं सूत्रसम्मतमेव। अत एव न्यायभूषण-कारोऽप्यभाणीत्[३]—'सविकल्पकमपि प्रत्यक्षं पृथिव्यादिगुणास्तदर्था इत्यनेन लेशतः सूचितमिति, एवमव्यपदेश्यशब्देन निर्विकल्पकमपि सूचितम्' इति। एवं वैशेषिकदर्शनेऽपि सूत्रभाष्ययोः सविकल्पकनिर्विकल्पकशब्दादर्शनेऽपि तन्निरूपणं तु तत्र तत्र सङ्केतितमस्तीत्यलमतिचर्चया।

---

१. न्या.सू. १.१.४;
२. तदेव-१.१.१४।
३. न्या.भू. १.१.१४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रकृतोपात्तोऽयं विषयः 'निर्वकल्पकप्रत्यक्षविषये न्यायमञ्जरीमतपरिशीलनम्' इति। अतो न्यायमञ्जरीग्रन्थमादृत्य साम्प्रतं किञ्चित् पश्यामः।

नामजातिगुणक्रियाविशिष्टविषयकं प्रत्यक्षं सविकल्पकम्। जात्यादीनां व्यक्त्या सह विशेषणविशेष्यभावावगाहि-प्रत्यक्षं सविकल्पकमिति तदर्थः। यत्र तु ज्ञाने जात्यादिकं तदाधारव्यक्तिश्च भासते; परन्तु तयोर्विशेषणविशेष्यभावो नावभासते तन्निर्विकल्पकम्। एतदेवाभिप्रेत्याह तात्पर्यटीकाकारः—'अविद्यमानं व्यपदेशो यस्मिन् तद् अव्यपदेश्यं जात्यादिस्वरूपावगाहि, न तु जात्यादीनां मिथो विशेषणविशेष्यभावावगाहीति यावत्'[१] इति। तथैवाह मणिकारः—'नामजात्यादि-योजनारहितं वैशिष्ट्यानवगाहि निष्प्रकारकं निर्विकल्पकम्'[२] इति। निर्विकल्पके घटो घटत्वं सम्बन्धश्च भासते; परन्तु विशेष्यत्वविशेषणत्वसंसर्गत्वैर्घटादिकं न भासते। तथा च ज्ञानत्वघटितं विशेष्यताशून्यत्वं विशेषणताशून्यत्वं संसर्गताशून्यत्वञ्चेति लक्षणत्रयं पर्यवसन्नम्।

निर्विकल्पकज्ञानं न व्यपदेश्यम्, आकाररहितत्वात्। यथा देवदत्तोऽयं, श्यामोऽयं, दण्डी इत्यादिव्यपदेशवत् निर्विकल्पकानुभवे न हि कश्चन आकारो दृश्यते। यद्यपि 'इदं किञ्चित्' इति ज्ञानं निर्विकल्पकमिति क्वचिद् उदाहरणं प्रदर्श्यते, तथापि नामजात्याद्यविषयकं ज्ञानमित्येव तस्य तात्पर्यमिति विभावनीयम्। अन्यथा किञ्चित्प्रकारकत्वेन तस्यापि सविकल्पकत्वापत्तेः। तथा च नामजात्यादिसम्बन्धाविषयकं वस्तुमात्रविषयकं ज्ञानं निर्विकल्पकमिति पर्यवस्यति। अत एव न्यायसारग्रन्थे 'वस्तुमात्रावभासकं निर्विकल्पकम्[३], यथा प्रथमाक्षसन्निपातजं ज्ञानं मुक्तावस्थायां योगिज्ञानं च' इति निर्विकल्पकस्वरूपं दरीदृश्यते। नामजातिगुणक्रियादिविशिष्टं यत् प्रत्यक्षं न विषयीकरोति, किन्तु वस्तुमात्रं तन्निर्विकल्पकं प्रथमत इन्द्रियसन्निकर्षानन्तरं जायत इति ज्ञायते। न च प्रथममेव जात्यादिविशिष्टमेव प्रत्यक्षं कुतो न जायत इति वाच्यम्, प्रथमत इन्द्रियसम्बन्धस्य वस्तुन्येव जायमानत्वात्। एकसम्बन्धिज्ञानमपरसम्बन्धि-स्मारकमिति न्यायेन वस्तुज्ञानानन्तरं जात्यादेः स्मरणं भवति। ततो जात्यादिविशिष्टस्य प्रत्यक्षं भवतीति नियमात्। न चाद्यस्तन्यपानादौ अदृष्टेन उद्बोधितो जन्मान्तरीयानुभवजनितः संस्कारो यथा इष्टसाधनतां स्मारयति, तथा अदृष्टविशेषोद्बोधितो जन्मान्तरीयसंस्कारो

---

१. तात्पर्यटीका, पृ. २२०, मिथिलाप्रकाशनम्।

२. त.चि., निर्विकल्पकवादः, पृ. ८५७; ३. न्यायसारः, पृ. १७३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जात्यादिस्मृतिमुत्पादयति, तद्बलाच्च आद्यं विशिष्टप्रत्यक्षं भवितुमर्हतीति न निर्विकल्पकसिद्धिरिति वाच्यम्, आद्यस्तनपानादौ गत्यन्तराभावेन जन्मान्तरीयानुभवजनितसंस्कारोद्बोधकादृष्टस्य कल्पनाया अन्याय्यत्वात्। अन्यथा जन्मान्तरानुभूतानामेतज्जन्मनि इन्द्रियसन्निकृष्टानामर्थानां स्मरणमेव भवेत्, न त्वनुभवः। न च घटत्वरूपविशेषणानुभवः सविकल्पक एवायं घट इति विशिष्टप्रत्यक्षं जनयतु तथा च गतं निर्विकल्पकेनेति वाच्यम्, तथात्वे तस्यापि विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यत्वं, तस्यापि तथेत्यनवस्थाप्रसङ्गात्।

अत्र शास्त्रदीपिकाकारसम्मतिः

अत्राहुः शास्त्रदीपिकाकृतः—विषयेन्द्रियसंयोगानन्तरं जायमानं सामान्यं गोत्वादिविशेषश्च खण्डत्वमुण्डत्वादिरिति यत्र न विविक्तं तद् विशेष्यविशेषणभावरहितवस्तुमात्रगोचरमिन्द्रियजन्यज्ञानं वयं प्रतीमः। तदेव विशिष्टवैशिष्ट्यानवगाहीत्युच्यते। तदेव निर्विकल्पकमिति व्यवह्रियते। तदुक्तं 'प्रतीमो हि वयमक्षसन्निपातानन्तरमविविक्तसामान्यविशेषविभागं सम्मुग्ध-वस्तुमात्रगोचरमालोचनज्ञानम्'[१] इति।

किञ्च निर्विकल्पकानङ्गीकारे सविकल्पात्मकं ज्ञानमपि न सम्भवति। सविकल्पकं हि ज्ञानं विशिष्टवैशिष्ट्यावगाहि भवति। विशिष्टवैशिष्ट्या-वगाहिबुद्धित्वावच्छिन्नं प्रति विशेष्यविशेषणयोर्ज्ञानस्य कारणत्वं सुवचम्। तत्र यावत्पर्यन्तं घटघटत्वे इत्याकारकं ज्ञानं न जायते, तावत्पर्यन्तं घटत्वप्रकारकघटविशेष्यकं सविकल्पकं ज्ञानं न सम्भवतीति घटघटत्वविषयकं निर्विकल्पकं ज्ञानमवश्याभ्युपेयम्, कारणं विना कार्यानुदयात्।

किञ्च भाट्टमते जातिव्यक्त्योर्गुणगुणिनोश्च भेदाभेदापरपर्यायस्य तादात्म्यस्यैव स्वीकारात् निर्विकल्पे सामान्यविशेषोभयात्मकं वस्तु भासत इति अङ्गीक्रियते। तदुक्तमाकृतिवादे श्लोकवार्तिके—'तेन नात्यन्तभेदोऽपि स्यात् सामान्यविशेषयोः'[२] इति।

'यदा तु शबलं वस्तु युगपत् प्रतिपद्यते।
तदाऽन्यानन्यभेदादि सर्वमेव प्रलीयते'[३]॥ इति च।

एतदेव प्रदर्शयितुकामो जयन्तभट्टः—

---

१. शास्त्रदीपिका, पृ. ४०; २. श्लोकवार्तिकम्, आकृतिवादः।
३. तदेव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'केचिद् गुणक्रियाद्रव्यजातिभेदादिरूषितम्।
शबलं वस्तु मन्यन्ते निर्विकल्पकगोचरम्'[१]।। इति प्राह।

'अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्'[२]।।

'आलोच्यते वस्तुमात्रं ज्ञानेनापातजन्मना।
अचेत्यमाने भेदोऽपि चकास्तीत्यतिसाहसम्'[३]।।

इति च श्लोकवार्तिकमत्रानुसन्धेयम्।

न चैवं सति निर्विकल्पकज्ञानस्य वस्तुस्वरूपमात्रमेव विषयः, न सामान्यविशिष्टम्, तर्हि स्वलक्षणमात्रमेव विषय इति वदता सौगतेनाविशेषप्रसङ्ग इति वाच्यम्, जात्याद्याकारावभासस्य तत्र स्पष्टत्वात्। तदुक्तं धर्मकीर्तिना—

'प्रत्यक्षं कल्पनापोढमभ्रान्तमभिलापिनी।
प्रतीतिः कल्पना क्लृप्तिहेतुत्वाद्यात्मिका न तु'[४]।। इति।

अत एव स्वलक्षणमात्रं निर्विकल्पस्य विषय इति वदतां सौगतानां मतमेवं निराकारि न्यायमञ्जर्यां जयन्तभट्टेन—

गृहीते निर्विकल्पेन व्यावृत्ते हि स्वलक्षणे।
अकस्मादेव सामान्यविकल्पोल्लसनं कथम्[५]।।इति।

अस्यायमर्थः—निर्विकल्पेन सकलेतरव्यावृत्तं रूपमेव गृह्यते, सामान्यं तु विकल्पस्यैव विषय इति खलु तव मतम्। अत्रेदं पृच्छामः—सामान्यमन्यत्र कदापि गृहीतमत्र विकल्पे भासते? उत कुत्रापि न? न द्वितीयः, कुत्राप्यभातस्य भानं तु न सम्भवत्येव, न हि शशशृङ्गादिः कुत्रापि भासते। नापि प्रथमः, अन्यत्र भानं चेत्, किं विकल्पे? उत निर्विकल्पे? यदि विकल्पे तर्हि पुनरनवस्था, यदि निर्विकल्पे तर्हि सिद्धं नः समीहितम्। निर्विकल्पानुसारेण हि विकल्पाः प्रादुर्भवन्तीति।

●

---

१. न्यायमञ्जरी, २.९३;
२. श्लोकवार्तिकम्, पृ. १४७।
३. तदेव, पृ. १५०;
४. प्रमाणवार्तिकम्।
५. न्यायमञ्जरी, २.९७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्याप्तिज्ञानप्रतिबन्धकोपाधिविवेकः

डॉ. कमलेशमिश्रः
उपाचार्यः
स्नातकोत्तरन्यायदर्शनविभागस्य
श्रीजगन्नाथसंस्कृतविश्वविद्यालये, श्रीविहारे, पुरी।

❋ ❋ ❋

प्रमाकरणं[१] प्रमाणम्। प्रमा च चतुर्विधा[२]। अनुमितिस्तास्वन्यतमा। तस्याः करणमनुमानम्[३]। अनुमानञ्च व्याप्तिज्ञानम्। व्याप्तिश्च साहचर्यनियमः[४]। एतज्ज्ञानप्रतिबन्धक उपाधिः।

सोपाधिकहेतुर्व्याप्यत्वासिद्ध[५] इति अन्नम्भट्टाः। तथा चोपाधिविशिष्टहेतु-र्व्याप्यत्वासिद्ध इत्यर्थः फलितः।

उपाधिशब्दश्च रूढ इति। तेन स पारिभाषिकः। परिभाषा चात्र— साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति[६]। साध्यव्यापकत्वञ्च साध्यसमाना-धिकरणात्यन्ताभावाप्रतियोगित्वम्। साधनाव्यापकत्वञ्च साधनवन्निष्ठात्यन्ताभाव-प्रतियोगित्वम्। 'पर्वतो धूमवान् वह्नेः' इत्यत्रार्द्रेन्धनसंयोग उपाधिः। अस्यान्र्द्रेन्धनसंयोगस्य साध्यधूमव्यापकत्वम्, 'यत्र यत्र धूमस्तत्र तत्रान्र्द्रेन्धनसंयोगः' इति नियमात्, साध्यधूमाधिकरणे विद्यमानघटाद्यत्यन्ताभावस्याप्रतियोगित्वात्। अस्य च हेतुवह्न्यव्यापकत्वम्, 'यत्र यत्र वह्निरूपहेतुर्वर्त्तते, तत्र तत्रान्र्द्रेन्धनसंयोगो नियमेन नास्तीति' दर्शनात्, साधनवह्न्यधिकरणायोगोलके विद्यमानार्द्रेन्धन-संयोगात्यन्ताभावप्रतियोगित्वात्।

लक्षणेऽत्र साध्यव्यापकत्वपदाभावे 'शब्दोऽनित्यः कार्यत्वात्' इति सदनुमानेऽपि सावयवत्वोपाध्यापत्तिः, सावयवत्वस्य कार्यत्वहेत्वव्यापकत्वात्, 'यत्र

---

१. त.भा., पृ. ११।
२. प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। (त.सं., पृ. ३५)
३. अनुमितिकरणमनुमानम्। (तत्रैव, पृ. ५८)
४. तत्रैव, पृ. ६१;
५. तत्रैव, पृ. ८२।
६. (क) त.सं., पृ. ८२।
(ख) साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा। स उपाधिः.....। (का.व. १३८)
(ग) साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक उपाधिः। (अनु.चि., पृ. ८११)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्र कार्यत्वं तत्र तत्र सावयवत्वमिति नियमस्य जन्यगुणादौ व्यभिचारात्। अतः साध्यव्यापकत्वपदनिवेशः। तथा च सावयवत्वस्य कार्यत्वहेत्वव्यापकत्वेऽपि न साध्यानित्यत्वव्यापकत्वम्, 'यत्र यत्रानित्यत्वं तत्र तत्र सावयवत्वमिति नियमस्यापि अजन्यगुणादौ व्यभिचारात् तत्रानित्यत्वेऽपि सावयवत्वाभावात्।

अपि च साधनाव्यापकत्वपदाभावेऽस्मिन्ननुमाने प्रमेयत्वोपाध्यापत्तिः, प्रमेयत्वस्य साध्यानित्यत्वव्यापकत्वात्। अतः साधनाव्यापकत्वनिवेशः। तथा च 'यत्र यत्र कार्यत्वं तत्र तत्र प्रमेयत्व'मित्यनेन प्रमेयत्वस्य साधनव्यापकत्वम्, न तु साधनाव्यापकत्वमिति न प्रमेयत्व उपाधिलक्षणातिव्याप्तिः।

ननु साध्यव्यापकत्वे सति साधनाव्यापकत्वमित्युपाधिलक्षणस्वीकारे सदनुमानेऽप्युपाधिप्रसङ्गः, 'पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वततेरत्वस्यापि तथात्वाद् वह्नेरनुमानात्प्राक् पर्वते वह्निरसिद्धः। तथा च तदा धर्मिणः पर्वतस्य वह्निविशिष्टत्वं नोपपद्यते। यत्र यत्र वह्निस्तत्र तत्र पर्वततेरत्वमिति। तेन च पर्वततेरत्वस्य साध्यवह्निव्यापकत्वं स्पष्टम्। अनुमानात् प्राक् पर्वते धूमस्य प्रत्यक्षसिद्धत्वादस्मिन् पर्वते तदितरत्वासम्भवात् 'यत्र धूमस्तत्र पर्वततेरत्वं नियमेन न' इत्यनेन पर्वततेरत्वस्य हेतुधूमाव्यापकत्वमिति। अत एव सदनुमाने उपाधेर्वारणार्थं तस्य साध्यव्याप्यताप्यावश्यकी। अतः साध्यव्याप्यत्वे सति साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति तल्लक्षणं वक्तव्यम्। तथा च पर्वततेरत्वस्य साध्यवह्निव्यापकत्वेऽपि तदधिकरणजलादौ वह्न्यभावात् साध्यव्याप्यत्वानुपगमान्नोपाधित्वम्। अतः साध्यसमव्याप्तिरेवोपाधिरिति प्राञ्चः[१]। तेन चोपाधेर्व्युत्पत्तिः सिद्ध्यति। सा च उप समीपवर्त्तिनि स्वधर्ममादधाति सङ्क्रामयतीति। यथा स्फटिकलौहित्ये जपाकुसुममुपाधिरित्यत्र लौहित्य-सङ्क्रामकत्वम्। धूमवान् वह्नेरित्यादौ धूमसामग्र्यादिकमुपाधिः। स्फटिकलौहित्ये जपाकुसुममिव धूमसामग्र्यादेः स्वसमवहितवह्नौ स्वनिष्ठधूमव्याप्त्याधायकत्वात्[२]। तथा चार्द्रेन्धनसंयोगो वह्निरूपहेतौ स्वधर्मव्याप्तिमादधाति। उपाधौ साध्य-व्याप्यतासत्त्व एव व्याप्तिरहितहेतौ स्वगतव्याप्तिं सङ्क्रामयितुमुपाधिः शक्य इति।

परन्तु साध्यसमव्याप्त उपाधिरिति न स्वीकुर्वन्ति नव्याः। उपाधौ साध्यव्यापकता, न तु साध्यव्याप्यता। यो व्यापकव्यभिचारी सोऽवश्यं व्याप्यव्यभिचारी। धूमवान् वह्नेरित्यत्र हेतुवह्नेः साध्यधूमव्यापकार्द्रेन्धन-संयोगव्यभिचारित्वाद् व्याप्यधूमव्यभिचारित्वमिति। यत उपाधिः स्वव्यभिचारेण हेतौ साध्यव्यभिचारस्यानुमापक इति।

---

१. (क) उपाधिश्च साधनाव्यापकत्वे सति साध्यसमव्याप्तिः। (सप्तपदार्थी, पृ. १४)
　(ख) साधनाव्यापकाः साध्यसमव्याप्ता उपाधयः। (तार्किकरक्षा, पृ. ६६)

२. म.प्र. २, पृ. २८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न चैतेन सर्वत्र पक्षेतरत्वोपाधिप्रसङ्ग इति वाच्यम्, बाधोन्नीतपक्षेतरत्वोपाधिस्वीकारे बाधाभावात्, 'वह्निरनुष्णः कृतकत्वात्' इत्यत्र वह्निरूपपक्षेऽनुष्णत्वाभावस्य निश्चितत्वात् पक्षेतरत्वे साध्यव्यापकताया निश्चयात्। परन्तु सन्दिग्धसाध्यकानुमितौ 'पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वतेतरत्वे वह्निरूपसाध्यव्यापकताया[1] निश्चयाभावान्न तदुपाधित्वम्। न च पक्षेतरत्वस्य निश्चितोपाधित्वाभावेऽपि सन्दिग्धोपाधित्वमिति वाच्यम्, हेतौ साध्यव्यभिचारस्योपाधेः प्रयोजनत्वात् सद्हेतुस्थलेऽपि तदुद्भावेन स्वव्याघातकत्वोपदर्शनात्।

उपाधिश्चतुर्विधः केवलसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकसाधनावच्छिन्नसाध्यव्यापकोदासीनधर्मावच्छिन्नसाध्यव्यापकभेदात्। तत्र केवलसाध्यव्यापको यथा धूमवान् वह्नेरित्यनुमाने आर्द्रेन्धनसंयोगः। पक्षधर्मावच्छिन्नसाध्यव्यापको यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यनुमाने उद्भूतरूपवत्त्वम्।

नन्वयमुपाधिर्न प्रत्यक्षत्वरूपसाध्यव्यापकः। 'यत्र यत्र प्रत्यक्षत्वं तत्र तत्रोद्भूतरूपवत्त्वमिति नियमादर्शनात्, आत्मनि प्रत्यक्षत्वेऽपि उद्भूतरूपवत्वाभावादिति चेत्, अत्रोच्यते—उद्भूतरूपवत्त्वस्य साध्यमात्रव्यापकत्वाभावेऽपि 'यत्र बहिर्द्रव्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्व'मित्यनेन बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वसम्भवः। अतोऽयमुपाधिर्बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकः।

साधनावच्छिन्नसाध्यव्यापको यथा ध्वंसो विनाशी जन्यत्वादित्यनुमाने भावत्वम्। अयमुपाधिः साधनजन्यत्वावच्छिन्नसाध्यव्यापकः। उदासीनधर्मावच्छिन्नसाध्यव्यापको यथा प्रागभावो विनाशी प्रमेयत्वादित्यनुमाने भावत्वम्। अयमुपाधिरुदासीनजन्यत्वावच्छिन्नविनाशित्व-रूपसाध्यव्यापकः। प्रकारान्तेरेणोपाधेर्द्वैविध्यं निश्चितोपाधिशङ्कितोपाधिभेदात्[2]। तत्र निश्चितोपाधिस्तु आर्द्रेन्धनसंयोगः। शङ्कितोपाधिः सन्दिग्धोपाधिनाम्ना व्यपदिश्यते। यथा स श्यामः, मित्रातनयत्वात्। अत्र शाकपाकजत्वमुपाधिः। अत्र हेतोरव्यापकता सन्दिग्धेति।

उपाधेर्दूषकता उद्दिश्यते। तथा हि—उपाधिः स्वव्यभिचारेण हेतौ साध्यव्यभिचारोन्नायकः। स च स्वकीयाभावेन पक्षे साध्याभावानुमानं जनयति, अपि च स्वव्याप्यत्वरूपहेतुना साध्ये पक्षवृत्तित्वाभावानुमानमिति। 'अयोगोलकं धूमवद् वह्नेः' इत्यत्रार्द्रेन्धनसंयोगरूपोपाधिर्भावत्रयेणानुमानं प्रतिबध्नाति। यथा—

---

१. बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च नोपाधिः। (मुक्ता., पृ. ४५८-४५९)

२. स चायं द्विविधो निश्चितः सन्दिग्धश्च...शाकाद्याहारपरिणतिजत्वम्। (चिं., पृ. ३१६-३२०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वह्निर्धूमव्यभिचारी आर्द्रेन्धनसंयोगव्यभिचारित्वात्, अयोगोलकं धूमाभाववद् आर्द्रेन्धनसंयोगाभावाद् धूमोऽयोगोलकावृत्तिः, आर्द्रेन्धनसंयोगव्याप्यत्वाच्चेति।

अत्रायं विवेकसारः

उपाधिशब्दो योगरूढ इत्युदयनाचार्याः। अत उप समीपवर्त्तिनि आदधाति स्वीयधर्ममिति व्युत्पत्तिः सम्भवति। प्रवृत्तिनिमित्तायोपाधौ साध्यव्याप्यता प्रयोजनीया। साध्यव्याप्यताभाव उपाधौ न व्याप्तिः। व्याप्त्यभाव उपाधिर्हेतौ स्वीयधर्मव्याप्तिं कथं वाऽऽदधातीति **प्राञ्चः**।

नव्यास्तूपाधिं रूढ्यर्थे स्वीकुर्वन्ति। तेन चोपाधौ साध्यव्यापकता यथेष्टा, न तु साध्यव्याप्यता। निश्चितोपाधौ यो यद्व्यापकव्यभिचारी, स तद् व्यभिचारीति नियमोपपत्तिः। अतो वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वा-दित्यनुमानेन वह्निहेतौ धूमसाध्यस्य व्यभिचारसिद्धिः। तथा च व्याप्तिज्ञानं प्रतिबध्यते।

सन्दिग्धोपाधौ साध्यव्यभिचारसंशयात्र व्याप्तिनिश्चयः। अतो नानुमानम्।

अत्र **प्राचीनानामयमाशयः**—व्याप्तिस्तु नियतसाहचर्यम्। धूमे यथा वह्निसहचारो भूयो भूयो दृश्यते, तथैव महानसादिषु वह्निमत्सु धूमदर्शनेन वह्नावपि धूमसहचारः। परन्तु धूमे वह्निनिरूपिता स्वाभाविकसम्बन्धरूपा व्याप्तिर्न तु वह्नौ धूमस्य, तन्निरूपितसम्बन्धस्यार्द्रेन्धनसंयोगोपाधिप्रयुक्तत्वात्। किञ्च धूमोत्पत्तौ न वह्निमात्रस्य हेतुत्वमार्द्रेन्धनसंयोगं विना तेन तदनुत्पत्तेः।

तथा च स्वाभाविकसम्बन्ध एवानौपाधिकसम्बन्धः। इयञ्च व्याप्तिरिति[१]।

उपाधिसत्त्वे नानौपाधिकत्वरूपव्याप्तिज्ञानं सम्भवति। अत उपाधेर्व्याप्ति-ज्ञानप्रतिबन्धकत्वं निर्बाधम्। वस्तुत उपाधेर्न साक्षाद् व्याप्तिज्ञानप्रतिबन्धकत्वम्; किन्तु व्यभिचारज्ञानद्वारेति दिक्।

●

---

१. स्वाभाविकश्च सम्बन्धो व्याप्तिः। (त.भा., पृ. १२२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नैयायिकमतानुसारिकारणस्वरूपविचारः

डॉ. महेशझाः
व्याख्याता, न्यायविभागस्य
राष्ट्रियसंस्कृतसंस्थाने (मानितविश्वविद्यालये)
श्रीसदाशिवपरिसरः, पुरी

***

समग्रे जगति कारणं विना किमपि कार्यं नोत्पद्यते। कारणं कार्यात् प्राक् तिष्ठति। कार्यञ्च कारणानन्तरं भवति। तदुक्तं कार्यनियतपूर्ववृत्ति-कारणमित्यन्नम्भट्टपादैः[१]। कार्यस्य यन्नियतपूर्वभावि तत् कारणमित्यर्थः। तत्र अन्यथासिद्धिशून्यत्वे सतीति विशेषणं देयमिति तेनैवोक्तं तर्कदीपिकायाम्[२]। तथा चानन्यथासिद्धं कार्यनियतपूर्ववृत्तिकारणमिति फलितम्। तदुक्तं विश्वनाथपादैः— 'अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता। कारणत्वं भवेदि'ति[३]। कारणञ्च कार्यापेक्षमिति। अत्र कार्यं प्रति नियतपूर्ववर्त्तिता अर्थादेव गम्यते।

कार्यं नाम प्रागभावप्रतियोगि[४]। यस्याभावः स प्रतियोगी। उत्पत्तेः पूर्वमिह कपाले घटो भविष्यतीति या प्रतीतिर्जायते तत्प्रतीतिविषयकोऽभावः प्रागभावः। एतस्याभावस्य प्रतियोगिरूपं यद् घटादिकं तदेव कार्यम्। यस्योत्पत्तिर्भवति तदेव कार्यमिति भावः। एवंरूपं कार्यं प्रति अन्यथासिद्धिशून्यत्वे सति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वम्।

पूर्ववृत्तित्वं कार्योत्पत्तेरव्यवहितपूर्वक्षणे कार्याधिकरणे वृत्तित्वम्। यस्मिन् क्षणे कार्यस्य सर्वाणि कारणानि सन्निहितानि भवन्ति, प्रतिबन्धकानां चाभावो वर्त्तते, तत्क्षणः पूर्वक्षणः सामग्रीक्षणो वा उच्यते। सामग्रीणां प्रतिबन्धकाभावसहितानां सर्वेषां कारणानां वोपस्थितौ सत्यां हि परक्षण एव कार्यमुत्पद्यते। तथा हि पटरूपकार्योत्पत्तेरव्यवहितपूर्वक्षणे पटरूपकार्यस्य तन्तुरूपेऽधिकरणे वृत्तित्वं पूर्ववृत्तित्वम्।

कारणस्य कार्यं प्रति अव्यवहितपूर्ववृत्तित्वाद् गतदिवसीयपटस्य कारणभूतस्तन्तुः अद्यतनपटं प्रति नियतपूर्ववृत्तिः सन् अपि अद्यतनपटं प्रति तस्य

---

१. त.सं., पृ. ३६;
२. दीपि., पृ. २२५।
३. का.व., १६;
४. त.सं., पृ. ३७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अव्यवहितपूर्ववृत्तित्वाभावान्न कारणत्वम्। व्यवहितपूर्ववर्त्तिनि अतिव्याप्तिवारणाय अव्यवहितेति। घटादिकार्येऽतिव्याप्तिवारणाय पूर्ववृत्तीति तर्कदीपिकायाम्[१]। कार्यं घटं प्रति घटत्वावच्छिन्नद्रव्यस्य नियतत्वेऽपि पूर्ववृत्तित्वाभावान्न तत्रातिव्याप्तिः।

वृत्तित्वं चात्र यस्मिन् अधिकरणे कार्यमुत्पद्यते तस्मिन् अधिकरण एव। कार्यतावच्छेदकसम्बन्धेन यत् कार्यस्याधिकरणम्, तस्मिन् अधिकरणे कारणतावच्छेदकसम्बन्धेन वृत्तित्वमित्यर्थः। कार्याधिकरणे येन सम्बन्धेन कार्यमुत्पद्यते स कार्यतावच्छेदकसम्बन्धः। कार्याधिकरणे कारणं येन सम्बन्धेन वर्त्तमानं सत् कार्यमुत्पादयति स कारणतावच्छेदकसम्बन्धः। तन्तौ पटः समवायसम्बन्धेनोत्पद्यत इत्यत्र कार्यतावच्छेदकसम्बन्धः समवायः। पटात्मककार्यस्याधिकरणे तन्तौ च तन्तुस्तादात्म्यसम्बन्धेन वर्त्तत इत्यत्र कारणतावच्छेदकसम्बन्धस्तादात्म्यम्। तन्तुसंयोगः कार्याधिकरणे तन्तौ समवायसम्बन्धेन वर्तत इति तन्तुसंयोगस्य कारणतावच्छेदकसम्बन्धः समवायः। तुरीवेमादिकं तन्तौ स्वप्रयोज्यविजातीयतन्तुसंयोगसम्बन्धेन वर्तत इत्यत्र कारणतावच्छेदकसम्बन्धः स्वप्रयोज्यविजातीयतन्तुसंयोगः।

नियतत्वं नाम—नियमेन वृत्तित्वं, कार्यव्यापकत्वं वा। यत्र यत्र कार्यं तत्र तत्र यस्य पदार्थस्य नियमेन उपस्थितिर्दृश्यते, न त्वभावः, तत् कार्यं प्रति स पदार्थो नियतो व्यापको वा भवति। यत्र यत्र घटकार्यमुत्पद्यते, तत्र तत्र मृत्पिण्डसद्भावोऽवश्यम्भावीति घटरूपकार्यं प्रति मृत्पिण्डो व्यापकः। तथा च कार्योत्पत्तेरव्यवहितपूर्वक्षणे कार्यतावच्छेदकसम्बन्धेन यत् कार्याधिकरणम्, तस्मिन् अधिकरणे कारणतावच्छेदकसम्बन्धेन यत् कार्याधिकरणम्, तस्मिन् अधिकरणे कारणतावच्छेदकसम्बन्धेन नियमेन विद्यमानत्वं, कार्याधिकरणे विद्यमानस्याभावस्याप्रतियोगित्वं वा नियतपूर्ववृत्तित्वमिति फलति। एवञ्च मृत्तिकावहनकारिणः रासभस्य कदाचिद् घटं प्रति पूर्ववृत्तित्वेऽपि घटसामान्यं प्रति अव्यापकत्वाद् रासभो न घटं प्रति कारणम्[२]। न हि यत्र यत्र घट उत्पद्यते, तत्र तत्र रासभोपस्थितिर्नियमेन भवति। तथा चानियतपूर्वभाविनि रासभादावतिव्याप्तिवारणाय नियतेति पदमुपात्तम्। एवञ्च रासभस्य घटत्वावच्छिन्नं द्रव्यं प्रति नियतत्वाभावात् नातिव्याप्तिः।

ननु घटमात्रं प्रति रासभस्य पूर्ववृत्तित्वं माऽस्तु, घटविशेषं प्रति यदि रासभस्य पूर्ववृत्तित्वमस्ति, तर्हि तद्घटं प्रति तस्य रासभस्य कारणत्वं भवेदिति चेत्, न, रासभस्य पूर्ववृत्तित्वेऽपि तस्य अन्यथासिद्धत्वान्न कारणत्वम्।

१. त.दी., पृ. २२५; २. तत्रैव, पृ. २२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ननु पटं प्रति तन्तुरूपं न कारणम्। तन्तुरूपस्य पटं प्रति कारणत्वे तस्य गुणत्वाद् असमवायिकारणत्वमेव भवेत्। असमवायिकारणनाशे च कार्यनाशः। तन्तुरूपनाशे तु न पटनाशो भवतीति पटं प्रति तन्तुरूपस्य कारणत्वं न स्वीकरणीयम्। तत्तु तन्तुरूपं पटं प्रति नियतपूर्ववृत्ति इति तत्र कारणलक्षणमतिव्याप्तमिति चेत्, उच्यते—अन्यथासिद्धभिन्नमेव कारणं भवितुमर्हति, तन्तुरूपं तु अन्यथासिद्धमिति न तत्रातिव्याप्तिः। तथा हि, कार्यनियतपूर्ववृत्तित्वे सति यत् कारणत्वेन न स्वीकृतं तद् अन्यथासिद्धम्। अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वे लघुनियतपूर्ववृत्तिभिन्नत्वे वा सति नियतपूर्ववृत्तित्वमन्यथासिद्धत्वम्[1]। अवश्यक्लृप्तनियतपूर्ववृत्ति च कारणमिति कारणे अतिव्याप्तिवारणाय सत्यन्तदलम्। अनियतपूर्ववृत्तिष्वतिव्याप्तिवारणाय विशेष्यदलम्। एतादृशान्यथासिद्धभिन्नत्वे सति नियतपूर्ववृत्तित्वं कारणत्वम्। तन्तुभ्य एव पटात्मककार्यसिद्धेस्तन्तुरूपमन्यथासिद्धमिति तत्र नातिव्याप्तिः। एवं घटं प्रति दण्डं कारणम्, दण्डत्वमन्यथासिद्धमिति तत्र तत्र अतिव्याप्तिवारणाय अन्यथासिद्धिशून्यत्वे सतीति।

कारणलक्षणे अनन्यथासिद्धेति यद् विशेषेणं दत्तमास्ते, तच्च अन्यथासिद्धं पञ्चविधम्—

(१) यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन स्वरूपेण ज्ञायते, तत्कार्यं प्रति तत्स्वरूपं (तत्स्वरूपबोधको धर्मः) अन्यथासिद्धम्। यथा—घटं प्रति दण्डात्मकस्य कारणस्य पूर्ववृत्तिता दण्डत्वेन रूपेण (स्वरूपेण) ज्ञायते, अतो घटात्मकं कार्यं प्रति दण्डत्वमन्यथासिद्धम्।

(२) यस्य पदार्थस्य यत् कार्यं प्रति स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः, अपि तु कारणमादायैव अन्वयव्यतिरेकौ स्तः, सोऽपि (गुणः) पदार्थस्तत्कार्यं प्रति अन्यथासिद्धः। यथा—घटं प्रति दण्डरूपमन्यथासिद्धम्। यतो दण्डरूपस्य घटं प्रति अन्वयव्यतिरेकौ स्वकारणं दण्डमादायैव वर्त्तेते, न तु स्वातन्त्र्येण, अतो दण्डरूपं दण्डत्वमिव अन्यथासिद्धम्।

(३) अन्यत्कार्यं प्रति पूर्ववृत्तित्वं (कारणत्वं) निश्चित्य एव यस्य पदार्थस्य यत् कार्यं प्रति पूर्ववृत्तित्वं निश्चीयते, स पदार्थस्तत् कार्यं प्रति अन्यथासिद्धः। यथा—घटं प्रति आकाशः। आकाशो नित्यो व्यापकश्च। अतः कार्यमात्रं प्रति नियतपूर्ववर्त्ती वर्तते, ततश्च घटं प्रत्यपि नियतपूर्ववर्त्तित्वेन कारणं भवितुमर्हति। तच्च कारणमाकाशत्वेन रूपेण स्वीकार्यम्, तदाकाशत्वं शब्दसमवायिकारणत्वरूपं वर्त्तते, अनेन प्रकारेण आकाशः शब्दस्य जनकः (समवायिकारणम्) इति

१. द्र., मुक्तावली, पृ. ८८-८९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिद्ध्यति। तदनन्तरमर्थाद् आकाशस्य शब्दं प्रति जनकत्वं निश्चित्यैव घटादिकार्यं प्रति जनकत्वं निश्चीयते। अत आकाशो घटं प्रति (शब्दातिरिक्तं जन्यं पदार्थं प्रति) अन्यथासिद्धः।

(४) यत्कार्यं जनकं प्रति पूर्ववृत्तित्वं निश्चित्यैव यस्य पदार्थस्य यत्कार्यं प्रति पूर्ववृत्तित्वं निश्चीयते, स पदार्थस्तत्कार्यं प्रति अन्यथासिद्धः। यथा— कुलालपिता घटं प्रति अन्यथासिद्धः। इदमत्रावधेयं यद् यदि कुलालपिता कुलालपितृत्वेन रूपेण घटं प्रति कारणं मन्येत, तर्हि स घटात्मकं कार्यं प्रति अन्यथासिद्धो भवेत्, किन्तु यदि सः कुलालत्वेन रूपेण घटं प्रति कारणं मन्येत, तर्हि तु इष्टापत्तिः।

(५) कार्योत्पत्तेः पूर्वक्षणे अवश्यमेव (नियमेन) विद्यमानैर्दण्डचक्रचीवर-कुलालादिभिर्घटोत्पत्तेः सम्भवे, तदतिरिक्तः सर्वोऽपि पदार्थोऽन्यथासिद्धः, यथा— रासभादिः। यद्यपि यं कञ्चिद् घटं (घटव्यक्तिं) प्रति रासभस्य नियतपूर्ववृत्तित्वं भवितुमर्हति, तथापि घटजातीयं प्रति तस्य नियतपूर्ववृत्तित्वं न भवति, अतो रासभस्तत्सदृशा अन्येऽपि पदार्था घटं प्रत्यन्यथासिद्धाः। अत एव द्रव्यप्रत्यक्षे महत्परिमाणं कारणम्, अनेकद्रव्यवत्त्वमन्यथासिद्धम्। यदि द्रव्यप्रत्यक्षे अनेकद्रव्यवत्त्वं कारणं स्वीक्रियेत, तर्हि गौरवदोषो भवेत्, यतो महत्त्वत्वजातेरपेक्षया अनेकद्रव्यवत्त्वं गुरुभूतो धर्मो वर्त्तते। गुरुभूतधर्मावच्छिन्नस्य पदार्थस्य कारणत्वे स्वीक्रियमाणे गौरवदोषो भवति, लघुभूतधर्मावच्छिन्नस्य पदार्थस्य कारणत्वे स्वीक्रियमाणे लाघवं भवति। उक्तेषु पञ्चविधेष्वन्यथासिद्धेषु (दण्डत्व-दण्डरूप-गगन-कुलालपितृरासभात्मकेषु) पञ्चमोऽन्यथासिद्ध आवश्यकः, यतस्तेनैवेतरे सर्वेऽपि अन्यथासिद्धा गतार्था भवन्ति।

नन्वन्यथासिद्धलक्षणे यद् अवश्यक्लृप्तनियतपूर्ववर्त्तिभिन्नत्वं निवेशितं तत् कारणभिन्नत्व एव पर्यवस्यति, कारणभिन्नत्वस्यैवान्यथासिद्धलक्षणे अपेक्षणीयत्वात्। कारणलक्षणे चान्यथासिद्धभिन्नत्वं निवेशितम्। तथा सति अन्योन्याश्रयः, कारणज्ञानं विना अन्यथासिद्धस्य, अन्यथासिद्धज्ञानं विना च कारणस्य ज्ञानासम्भवाद् इति चेत्, न, अवश्यक्लृप्तनियतपूर्ववर्त्तित्वमेव कारणत्वमित्यत्रैव तात्पर्यात्। अन्यथासिद्धाद् यो भेदः कारणलक्षणे निवेशितः, स तु शिष्यबुद्धिवैशद्यार्थम्, कारणस्य सुस्पष्टपरिचयार्थं च। न तु वस्तुतोऽन्यथासिद्धभेदः कारणलक्षणे विवक्षितः।

कारणभेदनिरूपणम्

कारणं त्रिविधम्—समवायिकारणम्, असमवायिकारणम्, निमित्तकारण-ञ्चेति। तदुक्तं कारिकावल्याम्—'समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्। एवं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वमिति[1]। वस्तुतस्तु एक एव पदार्थः कदाचित् समवायिकारणं भवति, कदाचिद् वा निमित्तकारणम्। एवमेकमेव पदार्थः कदाचिद् असमवायिकारणं भवति, कदाचिन्निमित्तकारणञ्चेति तेषां मध्ये विरोधाभावात् कारणं त्रिविधमिति वक्तुं न शक्यते। किं तर्हि? कारणता एव त्रिविधा— समवायिकारणता, असमवायिकारणता, निमित्तकारणता चेति। कारणतायाः त्रैविध्यवशात् कारणेऽपि त्रैविध्यव्यवहारः क्रियत इति भावः।

समवायिकारणस्वरूपविमर्शः

यत् समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। तदुक्तं कारिकावल्याम्— 'यत् समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्' इति[2]। यस्मिन् द्रव्ये समवायसम्बन्धेन सम्बद्धं सत् कार्यमुत्पद्यते तद् द्रव्यं समवायिकारणमित्यर्थः। समवायिकारणत्वं द्रव्यस्यैव भवति नान्यस्य पदार्थस्य। तथा चोक्तं कारिकावल्याम्—'समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयमिति'[3]। कार्याधिकरणे यत् नियतवृत्ति तदेव कारणम्। तथा च यस्मिन् द्रव्ये समवायसम्बन्धेन कार्यमुत्पद्यते, तस्मिन् द्रव्ये कार्याधिकरणे वा यत् नियमेन वर्तते, तद् द्रव्यं समवायिकारणम्। कार्याधिकरणे कार्यं येन सम्बन्धेनोत्पद्यते, स कार्यतावच्छेदकसम्बन्धः। अत्र च समवायः कार्यतावच्छेदकसम्बन्धः। कार्याधिकरणे कारणं येन सम्बन्धेन वर्तते, स च कारणतावच्छेदकसम्बन्धः। समवायिकारणस्थले च कारणतावच्छेदकसम्बन्धस्तादात्म्यम्। तथा च समवायसम्बन्धेन यत् कार्यस्याधिकरणं तस्मिन् तादात्म्यसम्बन्धेन यद् वर्तते तत् समवायिकारणमिति फलति। पटरूपकार्यस्याधिकरणे तन्तौ पटः समवायसम्बन्धेन वर्तते। पटाधिकरणे तन्तौ च तन्तुस्तादात्म्यसम्बन्धेन वर्तत इति तन्तुः पटस्य समवायिकारणम्। एवं पटगुणस्तदधिकरणे पटे समवायसम्बन्धेन उत्पद्यते। तस्मिन् च अधिकरणे पटे पटस्तादात्म्यसम्बन्धेन वर्तत इति पटः पटगुणस्य समवायिकारणम्। एवं पटकर्मापि पटकर्माधिकरणे पटे समवायसम्बन्धेनोत्पद्यते, तस्मिन् चाधिकरणे पटे पटस्तादात्म्यसम्बन्धेन वर्तत इति पटः पटकर्मणः समवायिकारणम्। तथा च द्रव्यं जन्यद्रव्याणां जन्यगुणानां कर्मणाञ्च समवायिकारणं भवितुमर्हति। समवायेन जन्यं कार्यं प्रति द्रव्यस्यैव कारणत्वाद् द्रव्यगुणकर्मसु द्रव्यस्यैव समवायिकारणत्वमिति भावः। गुणानां कर्मणाञ्चोत्पत्तौ कश्चन विशेषोऽस्ति। तथा हि गुणं प्रति द्रव्यं समवायिकारणम्। कारणानन्तरं च कार्यस्योत्पत्तिरिति द्रव्योत्पत्तेर्द्वितीयक्षण एव गुण उत्पद्यते। कर्मणि च संयोगादिगुणानामपेक्षा अस्तीति द्वितीयक्षणे संयोगादिगुणानामुत्पत्तौ सत्यां तृतीये क्षण एव कर्म उत्पद्यत इति।

१. का.व., १७; २. तत्रैव- १८।
३. तत्रैव- २३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

असमवायिकारणस्वरूपविमर्शः

न समवायिकारणम् असमवायिकारणम्। अत्र च नञ् सादृश्यार्थे, न तु भेदार्थे। भेदार्थकनञ्ग्रहणे यत् समवायिकारणभिन्नं तदेवासमवायिकारणं स्यात्। तथा च सति निमित्तकारणेऽतिव्याप्तिः स्यात्। सादृश्यार्थकनञ्ग्रहणे तु उपपद्यते। कथमसमवायिकारणस्य समवायिकारणेन सह सादृश्यमिति चेत्, उच्यते— समवायिकारणं यथा कार्योत्पत्तेः पूर्वक्षणवृत्ति कार्यकालवृत्ति च तथा असमवायिकारणमपि। अपि च समवायिकारणनाशे यथा कार्यनाशः, असमवायिकारणनाशेऽपि तथा कार्यनाश इति। इदमसमवायिकारणं दर्शनान्तरे न स्वीकृतम्।

समवायिकारणे प्रत्यासन्नं यत् कारणं तद् असमवायिकारणम्। तदुक्तम्— 'तत्रासन्नं जनकं द्वितीयम्'[१] इति विश्वनाथपादैः। समवायिकारणेऽतिव्याप्तिवारणाय तत्रासन्नमिति। समवायिकारणसमवेतेऽन्यथासिद्धेऽतिव्याप्तिवारणाय जनकमिति। असमवायिकारणत्वं गुणकर्मणोरेव भवितुमर्हति। तदुक्तम्—'गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्'[२] इति। आत्मविशेषगुणानां तु कुत्रापि असमवायि-कारणत्वं नास्तीति तद्भिन्नत्वं सामान्यलक्षणे देयम्।

अत्र समवायिकरणे प्रत्यासन्नं द्विविधम्—कार्यैकार्थप्रत्यासत्त्या कारणैकार्थ-प्रत्यासत्त्या च[३]। कार्येण सह एकस्मिन् अर्थे समवेतत्वे सति यत् कारणं तद् आद्यम्। यथा घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति[४]। समवायिकारणेन सहैकस्मिन् अर्थे समवेतत्वे सति यत् कारणं तद् द्वितीयम्। यथा घटरूपं प्रति कपालरूपमसमवायिकारणम्। स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति[५]। तथा च समवायसम्बन्धेन स्वसमवायिसमवायसम्बन्धेन वा असमवायिकारणं समवायिकारणे प्रत्यासन्नमिति फलितोऽर्थः। इत्थञ्च कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या वा समवायिकारणे प्रत्यासन्नं कारणमात्मविशेषगुणभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसितम्। तदुक्तमन्नम्भट्टपादैः—'कार्येण कारणेन वा सहैकस्मिन् अर्थे समवेतत्वे सति यत् कारणं तद् असमवायिकारणम्'[६] इति।

---

१. का.व., २३; २. तत्रैव, २३।
३. मुक्ता., पृ. ८३; ४. तत्रैव, पृ. ८३।
५. तत्रैव, पृ. ८३-८४; ६. त.सं., पृ. ३८-३९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रेदं ज्ञातव्यम्—कार्यं भावात्मकमभावात्मकं च भवितुमर्हति। तत्र ध्वंसाभावरूपमभावात्मकं कार्यं केवलं निमित्तकारणैरेवोत्पद्यते। भावात्मककार्याणि च परमाणुभिन्नानि पृथिव्यादिचतुर्विधभूतानि, नित्यगुणभिन्ना: सर्वे गुणा:, सर्वाणि कर्माणि च। गुणरूपं भावात्मककार्यं च द्विविधं भवितुमर्हति—कारणगुणोत्पन्नमकारणगुणोत्पन्नञ्च। समवायिकारणगुणेभ्यो ये गुणा उत्पद्यन्ते, ते कारणगुणोत्पन्ना:। पटस्य रूपरसादयो गुणास्तन्तूनां रूपरसादिभ्य उत्पद्यन्त इति पटस्य रूपरसादयो गुणा: कारणगुणोत्पन्ना:। पाकजा रूपरसादय: पाकाद् एव उत्पद्यन्ते, न तु समवायिकारणगुणेभ्य:। ज्ञानेच्छादीनामाश्रयभूतस्यात्मन:, शब्दाश्रयस्याकाशस्य च समवायिकारणाभावाद् एते गुणा अकारणगुणोत्पन्ना:।

तत्र कार्येण सहैकस्मिन् अर्थे समवेतत्वे सति यत् कारणं तद् असमवायिकारणमित्यस्यैवासमवायिकारणलक्षणत्वे सर्वेषां कार्यद्रव्याणाम्, अकारणगुणोत्पन्नानां गुणानाम्, सर्वेषां कर्मणाञ्चासमवायिकारणे लक्षणसमन्वय: स्यात्। तत्र यथा कार्याणि समवायिकारणे समवेतानि तथा असमवायिकारणानि अपि समवायिकारणे समवेतानि। किन्तु कारणगुणोत्पन्नानां गुणाना-मसमवायिकारणेषु तु नेदं लक्षणमन्वियात्। तथा हि, पटगुणानामसमवायिकारणं तन्तुगुणा:। तत्र पटगुणा: समवायिकारणे पटे समवेता:, तन्तुगुणास्तु पटे न समवेता:, अपि तु तन्ताविति तत्र नेदं लक्षणमन्वेति। अत एव कारणगुणोत्पन्नानां गुणानामसमवायिकारणेषु लक्षणसमन्वयार्थं कारणेन वा सहेत्युक्तम्। ततश्च पटरूपाणां समवायिकारणं पट:, तेन पटात्मकेन कारणेन सह एकस्मिन्नेव तन्तौ तन्तुरूपं समवेतमिति पटरूपस्यासमवायिकारणे तन्तुरूपे लक्षणमिदं सङ्गतं भवति।

तथा चासमवायिकारणं द्विधा भवितुमर्हति—साक्षात्सम्बन्धेन परम्परासम्बन्धेन च। साक्षात्सम्बन्ध: समवाय:, परम्परासम्बन्धश्च स्वसमवायिसमवाय:। भावात्मककार्याणां मध्ये द्रव्याणां कर्मणामकारणगुणोपन्नानां गुणानाञ्चासमवायि-कारणं स्वस्वसमवायिकारणे समवायसम्बन्धेन वर्त्तते। तथा हि पटस्य असमवायिकारणं तन्तुसंयोग:। तत्र पट: समवायिकारणे तन्तौ समवेत:, तन्तुसंयोगोऽपि तन्तौ समवायसम्बन्धेन वर्त्तते। वायुवृक्षयो: संयोगो वृक्षकम्पनस्य असमवायिकारणम्। तत्र वृक्षकम्पनरूपं कर्म स्वसमवायिकारणे वृक्षे समवेतम्, वायुवृक्षयो: संयोगोऽपि वृक्षे समवायसम्बन्धेन वर्त्तते। एवमात्ममन: संयोगो ज्ञानेच्छादीनामसमवायिकारणम्। तत्र ज्ञानेच्छादयो यथा स्वसमवायिकारणे आत्मनि समवेता:, आत्ममन:संयोगोऽपि तथा आत्मनि समवायसम्बन्धेन वर्त्तते। कारण-गुणोत्पन्नानां गुणानामसमवायिकारणं तु तत्तत्समवायिकारणे स्वसमवायिसमवाय-सम्बन्धेन वर्तते। तथा हि तन्तुरूपं पटरूपस्यासमवायिकारणम्। तत्र पटरूपस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समवायिकारणं पटः। तस्मिन् पटे तन्तुरूपं स्वसमवायिसमवायसम्बन्धेन वर्तते। तन्तुरूपं तन्तौ समवेतमिति तन्तुस्तन्तुरूपसमवायी। तस्मिन् तन्तौ पटः समवायसम्बन्धेन वर्तत इति पटरूपसमवायिकारणे पटे स्वसमवायिसमवाय-सम्बन्धेन तन्तुरूपं वर्त्तत इति पटरूपं प्रति तन्तुरूपमसमवायिकारणम्।

निमित्तकारणस्वरूपविमर्शः

समवायिकारणासमवायिकारणाभ्यां भिन्नं यत् कारणं तन्निमित्तकारणम्। तदुक्तम्—'आभ्यां परं तृतीयं स्यात्' इति[1] विश्वनाथैः। कार्येण सह यस्य समवायसम्बन्धो नास्ति, कार्यस्य समवायिकारणे च यत् समवायसम्बन्धेन स्वसमवायिसमवायसम्बन्धेन वा न प्रत्यासन्नम्, एतादृशं कारणं निमित्तकारणम्। यत् कारणं कार्ये नोपलभ्यते, तदेव निमित्तकारणमिति भावः। कुम्भकारेण सह घटस्य समवायसम्बन्धो नास्ति, घटस्य समवायिकारणे कपाले च कुम्भकारो न प्रत्यासन्न इति कुम्भकारो घटस्य निमित्तकारणम्। एवं तुरीवेमादिकेन सह पटस्य समवायसम्बन्धो नास्ति, पटस्य समवायिकारणे तन्तौ च तुरीवेमादिकं न प्रत्यासन्नमिति पटं प्रति तुरीवेमादिकं निमित्तकारणम्। कर्ता च करणं च कार्ये न दृश्येते इति कर्तृकरणयोर्निमित्तकारणत्वमिति बोध्यम्।

निमित्तकारणं साधारणासाधारणभेदेन द्विविधम्। तत्र कार्यसामान्यं प्रति साधारणनिमित्तकारणानि—ईश्वरः, ईश्वरस्य ज्ञानम्, ईश्वरस्य इच्छा, ईश्वरस्य कृतिः, दिक्, कालः, अदृष्टं, प्रागभावश्चेत्यष्टविधानीति केचित्। प्रतिबन्धकसंसर्गाभावो नवमं साधारणकारणमिति प्राचीनाः। प्रतिबन्धकात्यन्ताभाव एव साधारणं कारणमिति केचन। असाधारणनिमित्तकारणानि कार्यभेदेन अनेकविधानि।

अयमत्र विशेषः—ये सांख्यादयो दार्शनिका उपादानं निमित्तञ्चेति कारणद्वयमेव मन्यन्ते, ते असमवायिकारणं निमित्तकारणात् पृथङ् न स्वीकुर्वन्ति। किञ्च नैयायिकानां सम्मतं समवायिकारणमुपादानरूपं यथाकथञ्चित् स्वीकर्त्तुं शक्यते। वस्तुतस्तु उपादानं मृदादयः कार्पासादयः समवायिकारणरूपात् कपालात् तन्तोश्च भिन्ना इत्यलं विस्तरेण।

●

१. का.व. १८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तन्त्रागमप्रामाण्यविमर्शः

डॉ. परमात्मादुबे
उपाचार्यः, सांख्ययोगतन्त्रागमविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

* * *

अभ्युदयनिःश्रेयससाधनतया श्रुतिस्मृतिपुराणागमेषु विहिताः पन्थानो धर्मपदेन व्यपदेश्यतां प्राप्नुवन्ति। स्मृतिपुराणयोश्च प्रामाण्यं वेदमूलकतया स्वीक्रियते। पाशुपतशाक्तगाणपतवैष्णवाद्यागमानां प्रामाण्यं कथमिति विचारः प्रस्तूयते। ननु तन्त्रागमस्य धर्मशास्त्रान्तर्गतत्वेन धर्मशास्त्रस्य स्मृत्यन्तर्गतत्वाद् वेदमूलकतयैव प्रामाण्यं सिद्धमिति कथं विचारस्यावसरः? अवसरोऽस्ति विचारस्य। स्मृतिशास्त्रस्य तत्तदृषिप्रणीतत्वात् पौरुषेयत्वेन न साक्षाद् धर्माधर्मप्रमितिजनकत्वेन प्रामाण्यसम्भव इति तस्याकामेनापि वेदमूलकतया प्रामाण्यं स्वीकार्यम्। स्मृतिप्रवर्तका आचार्या षट्त्रिंशदिति पैठीनसिनोक्तम्[१]—

तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः।
वसिष्ठदक्षसंवर्तशातातपपराशराः॥१॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः।
प्रचेता नारदो योगी बौधायनपितामहौ॥२॥
सुमन्तुकाश्यपौ बभ्रुः पैठीनो व्याघ्र एव च।
सत्यव्रतो भरद्वाजो गार्ग्यः कात्यायनस्तथा॥३॥
जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसम्भवः।
इति धर्मप्रणेतारः षट्त्रिंशदृषयो मताः॥४॥ इति।

अत्र षट्त्रिंशदिति न परिसंख्या। तेन विश्वामित्रादीनामपि धर्मप्रणेतृत्वं सिद्धम्। एवं तन्त्रागमस्य शिवनारायणादिसाक्षात्परमेश्वरप्रोक्तत्वेनानादितया

---

१. भगवन्तभास्करे संस्कारमयूखे सङ्कलितम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदतुल्यमेव प्रामाण्यमायाति। अत एव वैदिकी तान्त्रिकीति उभयप्रकारा श्रुतिर्भवतीति केचन प्रतिपादयन्ति।

वेदानां विशेषतो विधिप्रतिषेधयोश्च प्रामाण्यमनधिगताबाधितार्थनिश्चायकत्वलक्षणं मीमांसायां प्रसाधितमेवेति तद्विषये न वितत्योच्यते। यदि तन्त्रागमस्यापि वेदतुल्यं प्रामाण्यं तदा वेदविरोधेऽपि पाक्षिकानुष्ठानं सिद्ध्यति। तन्त्रागमग्रन्थसमालोचनेनेदमेव निश्चीयते यत् तद्बोधितवर्त्मनां निःश्रेयसाख्यमेव मुख्यं फलम्। तदेव ब्रह्मनिर्वाणमपवर्गो मोक्ष इत्येवमादिसंज्ञां भजते। अन्यानि फलानि तावदन्वाचयशिष्टान्येव। तथा ह्युक्तं गुप्तसाधनतन्त्रे[1]—

'ब्रूहि मे जगतां नाथ! तत्त्वं परमदुर्लभम्।
येन ज्ञानप्रसादेन निर्वाणपदमीयते' ॥ इति।

अनेन देवीकृतप्रश्नोपक्रमेण परमतत्त्वोपासनाप्रकारैरेव सिद्ध्यत्यपवर्गो न तज्ज्ञानमात्रेणेति निश्चीयते। प्रश्नानन्तरमुपासनाप्रकाराणामेव शिवेन प्रकाशनात्। यदि ज्ञानमात्रेणैव स सिद्ध्येत्, तदा भगवान् शिवः सिद्धं वस्त्वेवोपदिशेत्। यस्योपासनाप्रकारः प्रतिपाद्यते, तस्यापि स्वरूपं प्रतिपाद्यत एव तथैव यथा वेदेषु आत्मज्ञानादेव कैवल्यमिति मते किं वा 'आत्मानमुपासीत' इति विधिशेषतया किंरूप आत्मेत्यपेक्षायां 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिवाक्यैः स समर्प्यते। क्रियाकलापविशेषः केवलं वेदात् तन्त्रागमेषु। अभीप्सितन्तु तयोरेकमेव। यद्यपि वेदविरोधिनां बौद्धादीनामपि तदेवाभीप्सितम्, तथापि तद्ग्रन्थानां प्रामाण्यं निरस्तम्। पुरुषकल्पितासद्मार्गप्रचुरत्वात्तेषाम्। साक्षाद्वेदैकगम्यशिवादिपरमेश्वरप्रोक्तत्वात् तन्त्रागमस्याप्रामाण्यं न सम्भवति। अतस्तस्य वेदमूलकतया प्रामाण्यस्वीकारे यत्र साक्षाद्वेदविरोधस्तत्र विरोधाधिकरणन्यायेनाप्रामाण्यं प्राप्यते यथा वामागमानाम्। अत्र कथं प्रामाण्यस्वीकारस्तस्येति प्रतिपाद्यते। अत्र केचित् तन्त्रागमानां स्वातन्त्र्येणैव वेदतुल्यं प्रामाण्यं समर्थयन्ति। तत्र तेषां युक्तिरियमेव यत् परमशिवादेवागमस्य समुत्थानम्, ततः पूर्वमदृष्टत्वात्। एवं शिवादिदृष्टत्वमागमानां सिद्ध्यति, यथा वेदानां तत्तदृषिदृष्टत्वम्। ततः गुरुपरम्परयोरुभयोरपि वेदतन्त्रागमयोः सम्प्राप्तिः। साक्षात्परमेश्वरदृष्टत्वाच्च तन्त्रागमानामप्रामाण्यं न सम्भवति यथा बुद्धादीनाम्। वेदस्य च प्रामाण्ये नास्ति विवाद इत्युक्तप्रायम्। वेदेष्वेव परमेश्वरस्य शिवादिनाम्ना प्रसिद्धिरस्ति। अत एव महेश्वरविष्णुनारायणपरमशिवाद्यभिख्यया प्रसिद्धो महेश्वरो वेदसमधिगम्य एव। तथा हि श्रुतिः—

---

१. गुप्तसाधनतन्त्रे–७.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च[१]।।

विष्ण्वादिसूक्तेषु सर्वमेतत् समुपलभ्यते। नात्र विशेषतो वक्तव्यम्। इत्थं परमेश्वरदृष्टत्वाङ्गीकारेण तन्त्रागमानां वेदतुल्यमेव प्रामाण्यम्। वेदे यथा परस्पर-विरुद्धानामपि पदार्थानां विकल्पेन पाक्षिकानुष्ठानमङ्गीकृत्य प्रामाण्यव्यवस्थितिस्तथा तन्त्रागमेष्वपि। एवं तन्त्रागमेष्वपि ये पदार्थाः श्रुतिस्मृतिशिष्टाचारपरम्पराविरुद्धाः समाम्नातास्तेषामपि प्रामाण्यात् सिद्ध्यति समादरपूर्वकमनुष्ठानम्। ते च पदार्थाः सुरापानवेश्यारजस्वलायोनिदर्शनपूर्वकजपतरुणीप्रत्यक्षयोनिपूजाप्रभृतयः। सुरापान-विधिर्यथा—

'पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले।
उत्थाय च पुनः पीत्वा मुक्तः कोटिकुलैः सह।।
तत्रैव व्याप्तिमाप्नोति न पुनर्जायते भुवि।
पीत्वा च पूजयेद् देवीमीशत्वं लभते ध्रुवम्।।
तत्रैव लयमाप्नोति पुनर्नैव निवर्तते।
पीत्वाऽग्निहोत्री भूत्वा च त्रैलोक्यैश्वर्यभाजनम्।।
जायते साधकः श्रेष्ठो महायोगी महासुखी।
पीत्वा योगी भोजयित्वा सोऽहं हंसस्ततः परम्'[२]।। इति।

एतत्कर्मसमाश्रयादश्वमेधादप्यधिकं फलं भवतीत्युक्तं तत्रैव। यथा—

'परस्त्रीघर्षणाच्चैव मद्यपानाच्च नित्यशः।
अश्वमेधादप्यधिकं लभन्ते फलमुत्तमम्'[३]।।इति।

एते सर्वे पदार्थाः श्रुतिस्मृतिसदाचारविरुद्धा एव। सुरापानं महापातकेषु गण्यते। त्रैवर्णिककर्तृकसुरापानस्य पातित्यप्रयोजकत्वमप्यवगम्यते। तथा हि पतितसङ्ग्रहे गौतमः[४] —

---

१. श्वेताश्वतरोपनिषद्—६/८;
२. चीनाचारतन्त्रे तृतीयपटले-३६-३९।
३. तत्रैव–५.२७;
४. गौतमधर्मसूत्रे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'ब्रह्महासुरापगुरुतल्पगमातृपितृयोनिसम्बद्धागस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यापतितत्यागिनः पतिताः, पातकसंयोजकाश्च'।

भगवान् मनुरपि सुरापानं महापापेषु गणयति[१]—

'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संयोगं चैव तैः सह'।। इति।

सुरापानस्य प्रायश्चित्तमप्याह योगी याज्ञवल्क्यः[२]—

'बालवासा जटी वाऽपि ब्रह्महत्याव्रतं चरेत्'।। इति।

एवमन्यान्यपि प्रायश्चित्तानि श्रुतिस्मृतिषु समुपदिष्टानि। एवं परस्त्रीगमनान्यपि। वेश्या यद्यपि साधारणस्त्री। तथा च गुरूपभुक्तास्वपि साधारणस्त्रीषु गमने गुरुतल्पदोषो नास्ति। यथोक्तं व्याघ्रपादेन[३]—

'जात्युक्तं पारदार्यञ्च कन्यादूषणमेव च।
साधारणस्त्रियो नास्ति गुरुतल्पत्वमेव च'।। इति।

तथापि परस्त्रीगमनस्य प्रतिषिद्धत्वात् सदाचारविरोधिता भवत्येव।

एवं रजस्वलायोनिदर्शनं तथा अनेकस्त्रीभिः सहैव कुचमर्दनप्रभृतयः पदार्था ये तन्त्रागमेषु प्रतिपादितास्ते शिष्टविगर्हितत्वादेव स्मर्तुमपि न शक्यन्ते। एतेषां सर्वेषामनुष्ठानं प्राप्तमेव वेदतुल्यप्रामाण्ये तन्त्रागमानाम्। कर्तव्यमेवेति ते ब्रुवते। पुरुषार्थत्वेन प्रतिषिद्धत्वेऽपि क्रत्वर्थत्वेन तन्त्रागमेषु विहितत्वात्। यथा सुराया वेदेन पुरुषार्थत्वेन प्रतिषिद्धत्वेऽपि सौत्रामण्यादौ विहितत्वेनानुष्ठानं यथा वा प्राणिहिंसाया 'मा हिंस्यात् सर्वा भूतानि' इति सामान्यात्मना प्रतिषेधेऽपि अग्नीषोमीयादौ विहितत्वेन तदनुष्ठानं भवति, तद्वदत्रापि द्रष्टव्यम्। यथोक्तम्[४]—

पूजाकालं विना नैव पश्येत् शक्तिं दिगम्बरीम्।
पूजाकालं विना नैव सुरा पेया च साधकैः।।
आयुष्यं हीयते दृष्ट्वा पीत्वा तु पशुतां व्रजेत्।
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम्।।

---

१. मनुस्मृतौ–११.५४; २. याज्ञवल्क्यस्मृतौ–३.२५४।
३. भगवन्तभास्करे प्रायश्चित्तमयूखे; ४. चीनाचारतन्त्रे–३.२१-२३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यत्र कामतः पीत्वा प्रायश्चित्ती भवेन्नरः।
भार्गवेण पुरा शप्तां श्रुत्वा देवीञ्च वारुणीम्।।इति।

क्रत्वर्थत्वादेव तरुणीयोनिपूजाऽपि विहितत्वेन कर्तव्यैव। अत एव योनिपूजाविधिरप्युपलभ्यते तन्त्रागमेषु। तथा हि[1]—

सर्वेषामेव पीठानां प्रधानं योनिपीठकम्।
तत्र सम्पूजिता देवी झटित्येव प्रसीदति।।
अणिमाद्यष्टसिद्धीनां कारणं परमं मुने।
योनिपूजाविधिं वक्ष्ये मम सर्वार्थसाधकम्।।
नटी कापालिकी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।।
मालाकारस्य कन्या च नव कन्याः प्रकीर्तिताः।
प्रशस्ता सर्वजातीनां विदग्धा लक्षणान्विता।।
गुरुपादगता ग्राह्या नान्यथा वरवर्णिनि।
अन्यथा तु वरारोहे नरके पतति ध्रुवम्।।
आनीयान्यतमां भद्रां सर्वाभरणसुन्दरीम्।
सुन्दरीं यौवनोन्मत्तां निर्लज्जां चारुहासिनीम्।।
कृत्वा दिगम्बरां तां तु गन्धकुङ्कुमचन्दनैः।
अनुलिप्तां मुक्तकेशीं ततस्तद्योनिमण्डले।।
गुरुशक्तिं समाराध्य पूजयित्वा षडङ्गकम्।
पीठपूजां विधायाथ तन्मध्ये पूजयेच्छिवाम्।।इति।

महापातक्यपि स एव भवति यदि क्रत्वर्थव्यतिरेकेणैवं करोति। अत एवात्र काश्यामपि तान्त्रिकप्रवराः स्त्रीसङ्ग्राहकाः पीठसमाश्रयाः कुर्वन्त्येव योनिपूजाविधिं क्रत्वर्थत्वेन। तत्र न महापातकप्रसक्तिः। उक्तमेतत् सर्वम्—

'वृथा पानं यत् क्रियते सुरापानं तदुच्यते।
स महापातकी चैव वेदादिषु निरूपितः[2]'।।इति।

---

१. चीनाचारतन्त्रे, ३.८-१५; २. तत्रैव-४.२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इयमेव योगभोगात्मकव्यवस्थोच्यते। यथोक्तं तत्रैव—

'योगी चेन्नैव भोगी स्याद् भोगी चेन्न तु योगवान्।
योगभोगात्मकं कौलं तस्मात् सर्वाधिकं त्विदम्'[१]।।इति।

इत्थं क्वचिदपि विरोधाभावात् तन्त्रागमानां वेदतुल्यमेव प्रामाण्यं सिद्ध्यति, तेषामपि वेदवत् श्रुतित्वानपायात्।

तन्त्रागमानां वेदमूलकतया प्रामाण्यसमर्थनम्—

नैतदिति शास्त्रतत्त्वज्ञाः। तन्त्रागमेषु गुरुपूर्वकस्याध्ययनस्याभावात्। वेदाध्ययनं यथाऽनादिगुरुपरम्परया व्यवतिष्ठते, न तथा तन्त्रागमः। शिवात् पूर्वं तदनुपलब्धेः। अत एव तेषां श्रुतित्वमपि न सिद्ध्यति। वेदेष्वेव श्रुतिव्यवहारो नान्यत्र। न च तेषामपि वेदत्वमेवेति समीचीनम्, तत्र वेदमुद्राभावात्। अत एव शिवादिप्रणीतत्वमेव तेषामायाति। वेदेषु यथा स्वरनियमस्तथा न तन्त्रागमेषूपलभ्यते। स्वराणां तत्रानादरात्। अनादिगुरुपरम्परया श्रूयमाणत्वादेव वेदानां श्रुतित्वं न, तथा तन्त्रागमेषु सम्भवति। न हि शिवादयस्तन्त्रप्रवक्तारः श्रोतारोऽपि। केवलं ते वक्तार एव। अत एव स्मृतिरूपत्वं पौरुषेयत्वञ्च शिवादिप्रोक्तानां तन्त्रागमानामायाति। तथा सति तेषां प्रामाण्यं वेदमूलकतयैव स्मृत्यधिकरणन्यायेन सिद्ध्यति। अत एव तेषामपि धर्मशास्त्रत्वेन व्यवहारः शिष्टलोके।

न केवलं न्यायेन अपि तु तन्त्रागमग्रन्थेभ्योऽपि वेदानां ज्यायस्त्वमवगम्यते। तथा हि षडाम्नायतन्त्रे[२]—

'सर्वेभ्यश्चोत्तमो वेदो ब्रह्मचर्यसुसंयतः'।।इति।

वातुलोत्तरतन्त्रेऽपि भक्तेरुत्तमत्वप्रतिपादनावसरे तन्त्रागमस्य श्रुतिमूलकत्वं निश्चीयते। तथा हि तत्रोक्तम्[३]—

'मुक्तेः परतरा भक्तिरिति सत्यपरा श्रुतिः'।।इति।

अन्यत्रापि वेदोक्तस्यैव परिपालनेऽनुज्ञा श्रूयते ययापि तदेव सिद्धं भवति।

'वेदे बौद्धविवादोऽस्ति वेदोक्तं प्रतिपालयेत्'[४]।।इति।

तत्रैव गङ्गास्नानविधिप्रतिपादनावसरे वेदोक्तविधिस्वीकारोऽपि तदेव द्रढयति। तथा हि निगदितं तत्र—

---

१. चीनाचारतन्त्रे, ४.४२;
२. रहस्यषडाम्नायतन्त्रे, ४-३।
३. वातुलोत्तरतन्त्रे, ५.१६;
४. गायत्रीतन्त्रे, ५.२४०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'इयं मन्दाकिनी गङ्गा जलरूपा सनातनी।
वेदोक्तविधिना राजन् स्नानमत्र कुरु द्रुतम्'[१]।।इति।

अपि च यदि वेदमूलकतया प्रामाण्यं न स्यात् तन्त्रागमानां तदा केषुचिदाचारेषु वेदवादविरोधोद्भावनं न घटेत। तथा ह्युक्तम्—

'किमिदं क्रियते कर्म विष्णुना बुद्धरूपिणा।
वेदवादविरुद्धोऽयमाचारः सम्मतो मम'[२]।। इति।

अपि च तन्त्रागमेष्वेवोपदेशप्रकारकथने भगवान् वेदानुशासनमेव हेतुत्वेनोपन्यस्यति। यत्तदपि आगममार्गस्य वेदानुगामित्वं ध्वनति। तथा चोक्तम्—

'इति परमरहस्यं वेदवेदान्तसारं
हृतभवभयबाधं षट्स्थलब्रह्मबोधम्।
गुरुशिवपदभक्त्या प्राप्तविद्याय देयं
विरहितघनभक्तिश्रेयसे नैव देयम्।।

नाशिष्येभ्यश्चैतेभ्यो वा नाभक्तेभ्यः कदाचन।
ग्राहयेदीदृशानर्थान् इति वेदानुशासनम्'[३]।।इति।

किं बहुना, तत्त्वप्रवचनं कुर्वता श्रीभगवतैव आगमप्रतिपाद्यस्य स्मरणविषयत्वमेवेति निरूपितम्। तथा हि—

'षडङ्गमङ्गभेदाश्च षट्त्रिंशदिति ते स्मृताः।
एभिर्भेदैः समायुक्तमङ्गं षट्त्रिंशदुच्यते'[४]।।इति।

एतत् सर्वं समीक्ष्यैव परशुरामकल्पसूत्रीयरामेश्वरवृत्तौ तन्त्रागमानां स्मृतिरूपत्वमङ्गीकृत्य स्मृत्यधिकरणन्यायेनैव मूलभूतश्रुत्युपस्थापकतयैव प्रामाण्यमङ्गीकृतं वर्तते। अयमेव पक्ष औचित्यमावहति। न चैवं वक्तव्यं यत् तन्त्रागमोक्तानां पदार्थानां वेदेष्वनुपलम्भ इति, सकलरहस्यविद्यानिधानभूतत्वाद् वेदानाम्। चत्वारो वेदाः स्वस्वलक्षणसमुपेता नैकशाखाप्रभेदप्रभिन्ना अनाद्यध्ययनपरम्परया यत्र विराजन्ते, तत्रागमोक्ताः पदार्था न सन्तीति कथनं साहसमात्रम्। यदि ते पदार्था न सन्ति, तर्हि मूलभूतवेदोपस्थापकत्वाभावात्तेषां प्रामाण्यमपि बाधितं भविष्यति। न हि शिवप्रोक्तत्वमात्रेण पदार्था अनुष्ठीयन्ते। किन्तर्हि? वेदोदितत्वेनैव ते तथा।

१. गायत्रीतन्त्रे, आगमसन्दर्भे, ५.२७२; २. चीनाचारतन्त्रे, २.७।
३. श्रीवातुलोत्तरतन्त्रे शिवानुभवसूत्रे, ८.८६-८७।
४. वातुलशुद्धाख्यतन्त्रे, ८.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवान् शिवोऽपि न वेदमर्यादां व्युदस्य व्यवहरति तत्त्वमुपदिशति वा। तन्त्रागममूलत्वेन प्रमाणमणिभूता त्रिपुरोपनिषत् त्रिपुरतापिनी कौलोपनिषद् अरुणोपनिषद् इत्येवमादय: पर:शता मन्त्रब्राह्मणभागा विद्यन्त एव, ये च मन्त्रोपासनादिरहस्यानि यथार्हशब्दैर्ध्वनन्त्येव। इत्थमिदमेव वक्तुं शक्यते यद् यथेतिहासपुराणानि वेदार्थोपबृंहणरूपाणि भवन्ति, तथैव तन्त्रागमा अपि वेदोदितरहस्यविद्योपबृंहणरूपा एवेति। सर्वथा तेषां प्रामाण्यं वेदमूलकतयैव सम्भवति। तन्मूलकत्वाभावादेव वामागमानामप्रामाण्यमेवाभीप्सितं यथा औदुम्बरीसर्वस्पर्शविषयकप्रत्यक्षश्रुत्या विरुद्धाया औदुम्बरीसर्ववेष्टनविषयकस्मृतेर-प्रामाण्यम्। ये च श्रुतिस्मृतिसदाचारविरुद्धास्तन्त्रागमावबोधितपदार्था: श्रवणपथं निपतन्ति, ते सर्वे परस्त्रीनिषेवणरजस्वलायोनिदर्शनतच्चुम्बनसुरापानाभक्ष्य-भक्षणास्नानप्रभृतय: शिष्टसम्प्रदायविगर्हिता हेया एव पिशाचघटिकेव। प्रायो नि:श्रेयसोपपत्तये श्रुतिस्मृतीतिहासपुराणशिष्टाचारैरविरुद्धा एव पदार्थास्तन्त्रागमेषु विलोक्यन्ते। यतो हि तेऽन्त:पूजाप्रधाना एव सन्ति। वेदादिषु ये निन्दिता: प्रतिषिद्धाश्च ते तथैव तन्त्रागमेष्वपि सन्ति। तथा हि चीनाचारतन्त्र एव—

> कामं क्रोधं च मात्सर्यं विकारं चिन्तनोद्भवम्।
> निद्रां लज्जां दौर्मनस्यं घातयेदष्टकं प्रिये।।
> कन्यायोनिं पशुक्रीडां नग्नां स्त्रीं प्रकटस्तनीम्।
> द्यूतविग्रहपापार्थान् सर्वथा न विलोकयेत्।।
> अगम्यागमनञ्चैव धूर्तगोष्ठीञ्च वर्जयेत्।
> अनृतं पापगोष्ठीञ्च वर्जयेत् कुलनायक:[१]।।इति।

अत्रापि सुरापानगुर्वङ्गनागमनादेर्महापातकत्वं प्रतिपाद्यते। तथा हि गायत्री-तन्त्रे—

> 'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागम:।
> महान्ति पातकान्यस्य स्मरणान्नाशमाप्नुयु:'[२]।।इति।

इत्थं श्रुतिस्मृतिशिष्टाचारैरविरुद्धानां पदार्थानामनुष्ठाने न कोऽपि विरोधो भवतीति सिद्धं भवति। तद्विरुद्धपदार्थानुष्ठानञ्च शिष्टविगर्हितत्वात् प्रामाण्यविरहाच्च नैव कर्तव्यम्। तन्त्रागमैरपि तदनुष्ठानविरोध: प्रागेव प्रतिपादित:। किं बहुना, ये श्रौतविरुद्धा: पदार्था: पूर्वमुदाहृतास्त एव तत्रैव प्रतिषिद्ध्यन्ते।

---

१. चीनाचारतन्त्रे, ५.३,६,९; २. गायत्रीतन्त्रे, ९.२७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रुत्यनुकूलत्वादेतत्सर्वस्य त्याज्यतैव, न ग्राह्यता, श्रुतिविरुद्धत्वात्। अत्र केचित् प्रबदन्ति—

विहितत्वादेकत्र प्रतिषिद्धत्वादुभयोर्विकल्प एवोचितो यथा षोडशी-ग्रहणाग्रहणयोः। अतस्त्यागपक्षो न समीचीन इति।

नेति तत्त्वज्ञा आहुः। श्रुतिविरुद्धपदार्थस्य पाखण्डिविषयत्वेन व्यवस्थापनात्। तेषां बुद्धिविमोहनाय शम्भुना प्रतिपादनमपि तस्य घटते। यथोक्तम्—

बाह्यपूजारताः केचित् पाखण्डा वेदनिन्दकाः।
कौलाः कापालिका नूनमागमैरविधानतः।।
निषिद्धाचरणात्पातस्तेषामिति हि मे मतिः।
तस्मात् पीठार्चनादीनि वैदिकानां न विद्यते।।
अन्तःपूजारताः सन्तो वशिष्ठसनकादयः।
वाञ्छितां सिद्धिमापन्नास्तस्मादधिकमान्तरम्[१]।।इति।

अन्यत्राप्येतदेव प्रतिपादितं वर्तते—

'बाह्यपूजा न कर्तव्या कर्तव्या बाह्यजातिभिः।
सा क्षुद्रफलदा नृणामैहिकार्थैकसाधनात्।।
बाह्यपूजारताः कौलाः क्षपणाश्च कपालिकाः।
दिगम्बरा ऐतिहासा नामकास्तन्त्रवादिनः।।
अन्तराराधनपरा वैदिका ब्रह्मवादिनः।
जीवन्मुक्ताश्चरन्त्येते त्रिषु लोकेषु सर्वदा'[२]।।इति।

अत एव तन्त्रागमरहस्यवेदिभिः श्रीरामानन्दयतिभिरपि तत्त्यागपक्ष एव समर्थ्यते—

'तस्माद् बाह्यत्रिकोणपूजा तरुणीत्रिकोणपूजा च दूरत एव निरस्तेति ध्येयम्'[३] इति।

अयं निष्कृष्टार्थ आयात्युपर्युक्तविचारेण यत् तत्रागमानां वेदमूलकतयैव प्रामाण्यस्वीकारे वेदविरुद्धानां वामागमानां दुर्मेध्यपदार्थभक्षणसुरापान-

---

१. सुभगोदये कौलशिक्षापटले—;

२. सनत्कुमारसंहितायाम्—; ३. त्रिपुरोपनिषद्भाष्ये, ११।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्मशानादिनिषिद्धदेशनिषेवणपरस्त्रीरजस्वलास्त्रीयोनिदर्शनपूजनाद्यसत्पदार्थप्रधानानां विरोधाधिकरणन्यायेनाप्रामाण्यमेवेति। अत एव तादृशासत्पदार्थानुष्ठापकानां नरकपातोऽपि नियत एवेति।

अत्रेयमाशङ्का जायते यत् ते पदार्था यदि घोरतमनरकसाधनभूता एव सन्ति, तदा परमकारुणिकेन भगवता शिवेन तेषामुपदेश एव कथं कृत इति। न हि साक्षात् प्रभुर्जीवानामेवमुपदेष्टा भवितुमर्हति। तस्य वैदिकपदार्थविषयकभ्रान्तिसम्भावनाऽपि न विधातुं शक्यते। मनुष्याणां हि भ्रान्तिः सम्भवति नेश्वराणाम्। ऋषीणामपि मनुष्यत्वेन तद्भ्रान्तिसम्भावनया युक्तं तदीयस्मरणानां साक्षाद् वेदविरुद्धानामप्रामाण्यम्। नैवं परमशिवस्य सम्भवतीति। सत्यम्। नैवं साक्षात्परमेश्वरे भगवति शिवे भ्रान्तिसम्भावना, तथापि तस्य विरुद्धोपदेशः सम्भवति। एतत् सर्वमत्रोदाहरणेन व्यक्तप्रायमेव, तथापि स्पष्टप्रतिपत्तये उच्यते। त्रयीमार्गप्रद्वेषकाः पाखण्डिनः कथ्यन्ते। तेषामधःपातो नियत एव। अतः सिद्धिपिण्डप्रदानप्रलोभनद्वारा तेषां घोरतमतमिस्रापातनाय भगवता तथाविध उपदेशः कृतः। ये खलु वेदशास्त्रानुगामिनः सन्ति, ते गुरूपदेशद्वारा प्राप्तरहस्या न कुपदार्थजातमनुतिष्ठन्तीति सर्वं सुस्थम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वेशाङ्गीकारे सांख्यदर्शनस्याक्षेपानौचित्यम्

डॉ. (श्रीमती) बीना श्रीवास्तवा
उपाचार्या, संस्कृत-विद्या-विभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❋❋❋

'प्रकृतिः' जगदुपादानकारणमस्ति—इति सांख्यदर्शने वर्णितं वर्तते। तत्र प्रकृतेरधिष्ठातृत्वेनापि 'विश्वेशो' न स्वीक्रियते। विश्वेशास्वीकृतत्वेन सांख्यदर्शनं निरीश्वरमुच्यते। सांख्यकारिकायाः (५६) सांख्यतत्त्वकौमुद्यामुल्लिखितं यत्— 'आरम्भः सर्गः महदादिभूतान्तः प्रकृत्यैव कृतो, नेश्वरेण....।' स्वमतस्य सिद्ध्यर्थं सांख्यदर्शनं विविधाक्षेपान् उपस्थापयति।

(क) सांख्याक्षेपाः

प्रथमाक्षेपः—यदि ईश्वरः प्रकृतेरधिष्ठातास्ति—इति स्वीक्रियते, तदा अस्माकं समक्षं प्रश्न उत्तिष्ठति यद् ईश्वरस्य सृष्टिप्रयोजनं किमस्ति? ईश्वरश्चेतनोऽस्ति, चेतनस्य 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इति लोकोक्तितः स्वार्थप्रयुक्तप्रवृत्तिः, अथवा करुणाप्रयुक्तप्रवृत्तिर्भवतीति दृश्यते। ईश्वरस्तु अवाप्तसमस्तकामोऽस्ति। अतोऽवाप्तसमस्तकामत्वात् सृष्ट्यर्थमीश्वरस्य प्रवृत्तिर्न सम्भवति। ईश्वरस्य यदि स्वस्य किमपि प्रयोजनं भवेत्, तदा स तन्निर्माणे प्रवृत्तो भवेत्, किन्तु नास्ति किमपि प्रयोजनम्। अतः सृष्ट्यर्थं तस्य प्रवृत्तिर्न सम्पद्यते[१]।

स्वातिरिक्तानां चेतनानां दुःखेभ्यः करुणाभिभूतो भूत्वापि ईश्वरः सृष्टिं कर्तुं न शक्नोति। इतरेषां दुःखानि दृष्ट्वैव करुणाया आविर्भावो भवति। सृष्टेः पूर्वं सुखदुःखानुभवसाधनानां शरीरेन्द्रियाणामभावान्न तदानीं दुःखानि आसन्। अतो दुःखनिवृत्त्यर्थमीश्वरो नाङ्गीकर्तव्यः। दुःखसत्त्वे एव करुणाया आविर्भावो दृश्यते; किन्तु सृष्टेः पूर्वं दुःखाभावात् करुणाया अपि ईश्वरेऽभावात् करुणयापि सृष्टेराविर्भावो न सम्भवति।

---

१. अवाप्तसकलेप्सितस्य भगवतो जगत् सृजतः किमप्यभिलषितं न भवति।
('सांख्यतत्त्वकौमुदी', सांख्यकारिका, ५७)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदि जीवानां भाविदुःखानि समवलोक्य करुणया प्रेरित ईश्वरः सृष्टिं करोति, तदा अन्योन्याश्रयदोषो जायते। अस्यामवस्थायां 'सृष्टिः करुणया एवं करुणा सृष्ट्या' इति भवति अन्योन्याश्रयदोषः[१]।

ईश्वरस्य परमकारुणिकताविषयेऽपि प्रश्नो जायते यद् यदि ईश्वरः परमकारुणिकोऽपि, तदा सदैव स सुखबहुलां सृष्टिं करोतु, न तु दुःखबहुलाम्। अतो दयालुना ईश्वरेण रचितायां सृष्टौ सुखिन एव प्राणिनः स्युः, न तु केऽपि दुःखसन्तप्ता भवेयुः[२]। लोकेऽपि कस्यचित् कृपा दुःखाय न भवति, अपि तु सुखायैव जायते।

द्वितीयाक्षेपः—यदीदं स्वीक्रियेत यज्जीवानां पूर्वजन्मकर्मभिर्विविध-सुखदुःखमोहात्मिका सृष्टिर्जायते। अतः कर्मैव सृष्टौ अथवा प्रकृतेः प्रवृत्तौ प्रयोजकं भवति, न तु ईश्वरः, निष्प्रयोजकत्वात्[३]। जीवकृतधर्माधर्माभ्यां विरूपसृष्टिः प्रादुर्भवति। अतः सुखदुःखमोहात्मिका सृष्टिर्धर्माधर्मकारणिकास्ति[४]।

तृतीयाक्षेपः—अहंभावेन युक्तो जीवः स्वभावतोऽकर्ता सन्नपि कर्ता (अधिष्ठाता) भवति, तथा तत्संयोगात् प्रकृतेः सङ्क्षोभो भवति। गुणप्रधानभावेन विचित्रसृष्टिराविर्भवति। अत एवेयं सृष्टिः परमेश्वराधीना न वर्तते[५]।

चतुर्थाक्षेपः—प्रमाणाभावान्नास्ति ईश्वरः। अतः प्रमाणाभावात् प्रकृतेरधिष्ठातृत्वेन, कर्मफलनियन्त्रकत्वेन चेश्वरो न सिद्ध्यति[६]। चक्षुरिन्द्रियातीतत्वान्नास्ति ईश्वरसिद्धौ प्रत्यक्षप्रमाणम्[७]। हेत्वभावाद् व्याप्त्यभावाच्चानुमानप्रमाणमपि ईश्वरसिद्धौ नास्ति[८]।

शब्दप्रमाणमपि तस्य सिद्धौ न वर्तते। श्रुतिरपि त्रिगुणात्मिका

---

१. (क) सां.त.कौ., सां.का., ५७।
(ख) उमाशङ्कर ऋषिः-सर्वदर्शनसङ्ग्रहः, पृ. ६४५।

२. अपि च करुणया प्रेरितः ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान्।
(सा.त.कौ., सां.का., ५७)

३. 'नेश्वराधिष्ठिते फलनिष्पत्तिः कर्मणा तत्सिद्धेः'। (सांख्यसूत्रम्, ५.२)

४. कर्मवैचित्र्यात् सृष्टिवैचित्र्यम्। (सां.सू. ६.४१)

५. अहङ्कारकर्त्रधीना कार्यसिद्धिः नेश्वराधीना, प्रमाणाभावात्। (सां.सू. ६.६४)

६. प्रमाणाभावान्न तत्सिद्धिः। (सां.सू. ५.१०)

७. यदीश्वरसिद्धौ प्रमाणमस्ति तदा तत्प्रत्यक्षचिन्ता उपपद्यते, तदैव तु नास्ति।
(अनिरुद्धवृत्तिः, सां.सू. १.९२)

८. (क) 'सम्बन्धभाषानुमानम्'। (सां.सू. ५.११)
(ख) प्रत्यक्षपूर्वकत्वाद् व्याप्तेस्तदभावात् कुतः सम्बन्धग्रहः, न चासाधारणस्य सम्बन्धग्रहः।
(अनि.वृ., सां.सू. ५.११)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अव्यक्तस्वरूपा प्रकृतिरेव जगत: कारणमस्तीति वदति। ईश्वरो जगत: कारणं न वर्तते। ईश्वरसाधकं प्रमाणं तु आभासमात्रमेवास्ति[१]।

ईश्वरस्य तात्त्विकत्वे नास्ति किञ्चित्प्रमाणम्। डॉ. राधाकृष्णन् कथितवानस्ति यद् ईश्वरपक्षे युक्तियुक्तं प्रमाणं नास्ति, अथवा आनुमानिकं ज्ञानं नास्ति, अथवा श्रुतिविहितं प्रमाणं नास्ति[२]।

स (विश्वेश:) सर्वेषां ज्ञाता एवं स्रष्टा अस्ति—इति बोधिका श्रुतिरपि अर्थवादरूपास्ति। मुक्तपुरुषयोगिपुरुषप्रशंसकत्वेन चरितार्थत्वात्[३]। ईश्वरस्तद्विषयो नास्ति।

अत: सांख्यशास्त्रे विश्वेशस्य सत्त्वं नाङ्गीक्रियते। पुरुषस्योपभोगार्थमपवर्गार्थञ्च अचेतना 'प्रकृति:' स्वत: प्रवर्तते। परार्थ एव प्रकृतेरयं व्यापारो वर्तते। स्वप्रयोजनसिद्ध्यर्थं प्रकृतिर्न प्रवर्तते[४]।

अतो जगतोऽधिष्ठातृत्वेन 'विश्वेश:' न स्वीकार्य:। इयं प्रकृति: पुरुषाणां प्रयोजनसाधनाय सृष्टिप्रलयौ करोति।

(ख) सांख्याक्षेपानौचित्यम्

१. सृष्टिरचनायामवाप्तसमस्तकामत्वाद् विश्वेशस्य किमपि प्रयोजनं (स्वार्थ:) नास्ति—इति तात्त्विकं वर्तते। परन्तु यदि विश्वेश: परमकारुणिकत्वात् करुणयैव सृष्टिं करोति, तदा सृष्टे: करुणाया जायमानत्वात् सर्वे प्राणिन: सुखिनो भवेयु:; परन्तु इत्थं न भवति। जगति सुखिदु:खिरूपद्विविधप्राणिदर्शनाद् विश्वेशे पक्षपातदोष आयाति।

किन्तु मतमिदं युक्तियुक्तं नास्ति[५]। जीवानां कर्मानुसारेण दण्डपुरस्काररूपफलदातृत्वाद् विश्वेशस्य जीवोपरि अनुकम्पा एवास्ति[६]। यद्यपि

---

१. (क) 'श्रुतिरपि प्रधानकार्यत्वस्य'। (सां.सू. ५.१२)
(ख) प्रधानाज्जगदुत्पत्तेरिति श्रुतिरस्ति। तस्मादीश्वरसाधकप्रमाणानामाभासानि।
(अनि.वृ., सां.सू. ५.१२)
(ग) 'अजामेकां लोहितशुक्लकृष्णां बह्वी: प्रजा: सृजमानां सरूपाम्।
(श्वेताश्वतरोपनिषद्, ४.५)

२. डॉ. राधाकृष्णन्, भारतीयदर्शनम्, द्वितीयो भाग:, पृ. ३१३।

३. 'मुक्तात्मन: प्रशंसा उपासासिद्धस्य वा'। (सां.सू. १.५)

४. औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोक:।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्।। (सां.का. ५८)

५. 'संसारे सुखिदु:खिरूपद्विविधप्राणिदर्शनाद् ईश्वरे वैषम्यनैर्घृण्यदोष आपततीति न वाच्यम्'।
(सांख्ययोगकोश:, आचार्यकेदारनाथत्रिपाठी, पृ. २२)

६. "Our Criminal cases law of punishment and prisons have for their final object the improvement of men" (P. Nagaraja Rao, Essays in Indian Philosophy and Religion, P. 86).

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वेशः परमकारुणिको वर्तते, तथापि मर्यादामतिक्रम्य न कस्यापि कृते सुखदुःखात्मकं फलं ददाति। तस्य करुणापि न्यायोचिता भवति। न्यायोचितकरुणयैव जीवानामाध्यात्मिको विकासो भवति, अधर्मात्। निवृत्त्यर्थं विश्वेशो दुःखं दत्त्वा जीवेभ्यः पुनः शिक्षामपि ददाति, येन कुत्सितकर्मणि स (जीवो) न प्रवर्तेत।

इदमवधेयमस्ति यद् विश्वेशः करुणया सृष्टिं करोति। विश्वेशस्य प्रयोजनं समष्ट्यैव वर्तते, कारुणिको विश्वेशः सर्वेषां जीवानामुद्धारकोऽस्ति[१]। जीवानां मुक्ततायामेव तस्य करुणा वर्तते। सांख्यदर्शने 'करुणया सृष्टिः, सृष्ट्या करुणा' इत्यन्योन्याश्रयदोषो दत्तो वर्तते; परन्त्वत्र समीचीनत्वं न वर्तते, ईश्वरसृष्टिपरम्परयोरनादित्वात्।

२. जीवकृतधर्माधर्माभ्यां प्रकृतितो विरूपायाः सृष्टेः प्रादुर्भावो भवति। इदमपि सांख्यकथनं नास्ति समीचीनम्, चेतनपुरुषस्य धर्माधर्मावपि अचेतनौ स्तः। यतोऽनयोरपि कश्चिदधिष्ठाता वर्तते, अचेतनस्य चेतनाधिष्ठितत्वात्, अतो धर्माधर्मयोरधिष्ठातृत्वेन पुरुषविशेषस्येश्वरस्य सिद्धिर्भवति। अयमीश्वरः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषरूपोऽस्ति।

३. अहम्भावेन युक्तः पुरुष एव स्वभावतोऽकर्ता भूत्वापि कर्ता (अधिष्ठाता) भवति, एवं तत्संयोगेन सृष्टेः प्रादुर्भावो भवति; किन्तु इदं सांख्यकथनं समीचीनं नास्ति। अचेतना प्रकृतिरीश्वरेणाधिष्ठिता भूत्वैव सृष्ट्यर्थं प्रवृत्ता भवति। ईश्वरं विना अचेतना प्रकृतिः स्वतः स्वार्थाय परार्थाय वा सृष्ट्यर्थं प्रवत्ता न भवितुं शक्नोति। अतो जडायाः प्रकृतेः प्रवर्तकत्वेन कश्चिद् एकः, सर्वशक्तिसम्पन्नः, सदैव मुक्तौ विलक्षण ईश्वरः स्वीकरणीयोऽस्ति। जीवस्तु अधिष्ठाता न भवितुमर्हति, असमर्थत्वात्। सुखदुःखयोरुपभोक्ता, अल्पज्ञोऽल्पशक्तिमाँश्च जीवः (पुरुषः) वस्तुतोऽधिष्ठाता भवितुं न शक्नोति। सांख्यकारिकायाः (५७) सांख्यतत्त्वकौमुद्यां श्रीवाचस्पतिमिश्रस्य कथनमपि समीचीनमस्ति यत् 'न च क्षेत्रज्ञा चेतना अपि प्रकृतिमधिष्ठातुमर्हन्ति, तेषां प्रकृतिस्वरूपानभिज्ञत्वात्। प्रकृतिलीनानाम् (जन्येश्वराणां) अधिष्ठातृत्वमपि युक्तं न भवति, तेषामनेकत्वात्। अस्मिन् कालविशेषे प्रकृतौ सङ्क्षोभो भवेत्, विषयेऽस्मिन् विप्रतिपत्तिर्भवितुं शक्नोति, परिणामतस्तेषामिच्छावैषम्यरूपसङ्घर्षो भवति।

---

१. तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनं, ज्ञान्धर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति। तथा चोक्तम्—
'आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच इति'। (व्यासभाष्यम्, योगसूत्रम्-१.२५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कश्चिन्मुक्त आत्मा अधिष्ठाता भवितुं नार्हति, बद्धापेक्षया तस्य शक्तिप्राबल्ये सत्यपि जगदुत्पत्तौ सामर्थ्यासम्भवात् तस्य मुक्तावस्थायाः प्रागपि जगतो विद्यमानत्वात्, सकृदेवान्यमुक्तात्मनापि जगदधिष्ठातृत्वप्रसक्तेः सत्स्वनेकेषु मुक्तात्मसु कस्यैकस्यानेकेषां वा केषाञ्चिदधिष्ठातृत्वं स्यादिति नियामकाभावाच्च। अत एकस्तु सदैव सर्वज्ञानैश्वर्यसम्पन्नो नित्यमुक्तो सर्वार्थदर्शी प्रकृतेरधिष्ठाता भवेत्। स च विश्वेशोऽस्ति।

४. ईश्वरसिद्ध्यर्थं प्रमाणानि उपन्यस्तानि सन्ति। बुद्धिवादिनां ज्ञानार्थं प्रमेयत्वेन ईश्वरो ज्ञातव्य एव वर्तते। अत ईश्वरस्य प्रमेयरूपत्वात् 'प्रमेयसिद्धिः प्रमाणाद्धि' इत्यादिन्यायाद् ईश्वरसाधकत्वेन प्रमाणमवश्यमपेक्ष्यते। अत ईश्वरे प्रमाणाभावकथनं युक्तिसङ्गतं नास्ति।

पाश्चात्त्यविद्वान् इलायडोऽपि इदमेव स्वीकरोति[१]। ईश्वरे प्रत्यक्षप्रमाणं नास्तीत्यपि न समीचीनम्। योगसूत्रकारो भाष्यकारश्च उभावपि ईश्वरस्य योगजप्रत्यक्षत्वमङ्गीकुरुतः[२]। अनेन प्रकारेण योगशास्त्रं योगजप्रत्यक्षेणेश्वरस्य सिद्धिमङ्गीकरोति, अन्यत्रापि ईदृशमेव वर्णनं मिलति[३]। सांख्यस्यायमाक्षेपो वर्तते यद् अनुमानप्रमाणेनेश्वरसिद्धिर्न सम्भवति, हेतुव्याप्त्योरभावात्। इदमपि नास्ति समीचीनम्। सांख्याक्षेपं खण्डयित्वा उदयनाचार्य ईश्वरसिद्ध्यर्थं हेतूनामुपन्यासं कृतवानस्ति[४]। न्यायदर्शने अनुमानप्रमाणेन ईश्वरस्य सिद्धिः कृता वर्तते। तत्र हेतुर्व्याप्तिश्चेति द्वयमपि वर्तते।

'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवत्' इत्यनेन पक्षसाध्यनिर्देशो भवति। 'कार्यत्वात्' इत्यनेन हेतुर्निर्दिश्यते। 'यद्यत् कार्यं तत्तत् सकर्तृकम् इत्यनेन व्याप्तिर्निर्दिश्यते। 'घटवत्' इत्यनेनोदाहरणं दीयते।

योगदर्शनेऽपीदं प्रतिपादितं यद् यत्र निरतिशयसर्वज्ञबीजं वर्तते, स ईश्वरोऽस्ति। यथा योगसूत्रमस्ति—'तत्र निरतिशयं सर्वज्ञबीजम्' (१/२५)। अत्र

---

१. M. Eliade-"Yoga-immortality and freedom." P. 377.

२. (क) स्वाध्यायादिष्टदेवतासम्प्रयोगः। (योगसूत्रम्, २.४४)

(ख) देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति।
कार्ये चास्य वर्तन्त इति। ('व्यासभाष्यम्', योगसूत्रम्, २.४४)

३. उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथग् विदुः पुरातनं त्वा प्रथमं पुराविदः॥
(शिशुपालवधमहाकाव्यम्, प्रथमसर्गः, ३३ श्लोकः)

४. 'न्यायकुसुमाञ्जलिः'-५.१, उदयनाचार्यः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्य' इति साध्यनिर्देशोऽस्ति। 'सातिशयत्वात्' इति 'हेतुः' निर्दिश्यते। 'परिणामवत्' इति दृष्टान्तोऽप्यस्ति[1]।

शब्दप्रमाणेनापि (श्रुत्या) ईश्वरस्य सिद्धिर्न सम्भवति। अयमपि सांख्यस्याक्षेपः समीचीनो नास्ति। भगवद्गीतायामुक्तमस्ति[2] यन्मदधिष्ठिता भूत्वा प्रकृतिश्चराचरात्मकस्य जगतः सर्जनां करोति। अव्यक्तात्मिका त्रिगुणात्मिका प्रकृतिरेव जगतः कारणमस्तीत्यपि सांख्यकथनं सम्यक् नास्ति। सांख्यमतसाधिकाः स्वल्पाः श्रुतयः प्रमाणभूताः सन्ति।

'अजामेकां लोहितशुक्लकृष्णाम्' इति श्रुतिरव्यक्तरूपां त्रिगुणात्मप्रकृतिं जगत्कारणत्वेन प्रतिपादयति, न त्वीश्वरो जगतः कारणमिति सांख्या वदन्ति, तन्न सम्यक्। श्रीशङ्कराचार्यः 'अजाशब्दात् मायाया ग्रहणं भवति' इति स्वीकरोति। माया तु ईश्वराधीना वर्तते।

सांख्यस्य विचारोऽयं यत् पुरुषस्य भोगायापवर्गाय च प्रकृतेः स्वतः प्रवृत्तिर्भवति। प्रकृतेर्व्यापारः परार्थायैव भवति, न तु स्वार्थायेत्यपि कथनं न युक्तियुक्तम्, प्रकृतेरचेतनत्वात्। अचेतनस्य ज्ञानाभावात् परार्थप्रवृत्तिर्न भवितुमर्हति। चेतन एव परार्थं ज्ञात्वा कस्यचित् परोपकारार्थं प्रवर्तते। अतः प्रकृतिः परार्थं प्रवर्तत इति सांख्यकथनं न युज्यते। अतः प्रकृतेरधिष्ठातृत्वेन विश्वेशोऽवश्यमङ्गीकार्यः। अत एव योगदर्शनेऽपि निरीश्वरसांख्यस्य न्यूनतामवलोक्यैव विश्वेशः (परमेश्वरः) स्वीकृतो वर्तते। डॉ. एस.एन. दासगुप्तामहोदयोऽपि[3] सांख्यमतमालोचयन्[4] सांख्यदोषपरिहारार्थं विश्वेशस्वीकारे स्वमतमुपन्यस्तवान्। श्रीविज्ञानभिक्षुरपि विश्वेशास्वीकरणे सांख्यदर्शनस्य दुर्बलत्वं मन्यते।

आलोचनानिष्कर्षः—स्पष्टमिदमस्ति यन्निरीश्वरवादिसांख्यदर्शने विश्वेशास्तित्वं न स्वीक्रियते। सृष्टिदृष्ट्या अपि विश्वेशो नाङ्गीक्रियते। एतत्प्रसङ्गे विश्वेशस्य स्वीकरणे सांख्यदर्शनेन आक्षेपा उपस्थाप्यन्ते। वस्तुतः सांख्याक्षेपाणामौचित्यं न प्रतिभाति। मन्येऽहं विश्वेशस्य स्वीकरणे सांख्यदर्शनस्याक्षेपेषु दुर्बलत्वं वर्तते। वस्तुत इदमेव कारणमस्ति यद् विश्वेशप्रतिषेधांशमधिकृत्य सांख्यदर्शनमालोच्यत इति।

●

---

१. 'अस्ति काष्ठाप्राप्तिः सर्वज्ञबीजस्येति साध्यनिर्देशः।
निरतिशयत्वं काष्ठा, यतः परमतिशयवत्ता नास्तीति'॥
तेन नावधिमात्रेण सिद्धसाधनं सातिशयत्वादिति हेतुः, यद् यत् सातिशयं तत्तत्सर्वं निरतिशयं यथा कुवलयामलकविल्वेषु सातिशयं महत्त्वमात्मनि निरतिशयमिति व्याप्ति दर्शयति—'परिमाणवदिति'। ('तत्त्ववैशारदी', योगसूत्रम्, १.२५, पृ. ७४-७५)

२. 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्'। ('श्रीमद्भगवद्गीता', ९.१०)

३. S.N. Dasgupta-"A History of Indian Philosophy". Vol, I P. 258-59.

४. 'सांख्यमेवेश्वरप्रतिषेधांशे दुर्बलमिति'। ('सांख्यप्रवचनभाष्यम्', उपोद्घातात्, पृ. ४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

औचित्यप्रस्थानसमीक्षणम्

डॉ. छोटेलालत्रिपाठी
उपाचार्यः
साहित्यविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

***

'शब्दः काव्यम्', 'शब्दार्थौ काव्यमि'ति लक्षणविधायिनामुभयवादिनामपि मते शब्दः शब्दार्थौ वा काव्यशरीरमात्रम्। आवश्यकमात्मतत्त्वं तु किञ्चिदन्यदेव। किमिदमात्मतत्त्वमित्यपेक्षायाम्—रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्यमिति नामभिः षड्वादाः क्रमशो भरत-वामन-दण्डि-आनन्दवर्धन-कुन्तक-क्षेमेन्द्रप्रभृत्याचार्याणां प्रथिता वर्तन्ते। तत्र काव्यस्य जीवितं स्थिरमनश्वरमौचित्यमेवेति क्षेमेन्द्रस्याभिमतमस्ति[१]। यतो ह्यौचित्यमूलकमेव गुणालङ्कारादीनाञ्चारुत्वाधायकत्वं तिष्ठति। यद्यपि लक्षणविधायिभिराचार्यैः काव्यत्वं रमणीयत्वं रसत्वं वेत्यात्मतत्त्वम्, गुणालङ्काराणामुत्कर्षकत्वमुपकारकत्वञ्चेति[२], तथा च रीतिवृत्त्यादीनामपि तदात्मतत्त्वानुकूलस्वरूपनिर्धारकत्वं लक्षणेषु लक्ष्येषु चाभिहितम्। तत्किं नामौचित्यमपरः पदार्थः, लक्ष्यलक्षणाभ्यामतिरिक्तो वा, कथं न काव्यज्ञशिक्षयाऽभ्यासान्तर्गतं तस्यौचित्यस्यान्तर्भाव इत्येपक्षामुद्दिश्य स धर्मो वा धर्मी वा ताभ्यां व्यतिरिक्तो वेति विवेचनधिया विषयोपस्थापनं क्रियते। अपरमप्यौचित्यं प्रतिभाकारणीभूतायां लोकशास्त्रकाव्याद्यवेक्षणादधिगतायां निपुणतायां कथं नान्तर्भवति। कथं वास्यानुगतधर्मत्वमित्यपि विचारणीयम्।

अत्र शब्दार्थयोः काव्यशरीरघटकयोर्गुणालङ्कारादयः सौन्दर्यविवर्धकाः, परञ्चौचित्येनोपनिबन्धनमेव तेषां कृतकृत्यतां प्राप्नोति। तद्व्यतिरिक्ता गुणालङ्कारादय उत्कर्षका उपकारका वा न स्वाभाविकतां लभन्ते। सुन्दरमपि वस्तु यावदुचितस्थाने सन्निविष्टं न भवति, तावत्तस्य शोभाकरत्वं व्याहतमेव भवति।

---

१. औचित्य. ४-५ का.; २. काव्य- प्र., उ. ८, सू. ८६-८७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपि चानुचितस्थानसन्निवेशेन वस्तुनः स्वाभाविकमपि सौन्दर्यं हास्यायैवेति। अनुभवसिद्धमपीदं तथ्यं यदनुचितस्थानसन्निवेशिता गुणालङ्कारादयोऽपि काव्यगतं स्वाभाविकं सौन्दर्यमपकर्षन्त्येव[१]। सङ्क्षेपतो वक्तुं शक्यते यत् समुचितस्थानसन्निवेशितानां गुणानां गुणत्वमलङ्काराणाञ्चालङ्कारत्वं सिद्ध्यति। यतो हि परुषवर्णगता अनुप्रासादयः शृङ्गारादिरसान्, माधुर्यादयो गुणा वीरबीभत्सादीन् रसाँश्च परिहापयन्त्येव। एवं सत्स्वप्येतेषु गुणालङ्कारादिषु यावदौचित्येन न समावेशस्तावन्न तेषां सौन्दर्यस्योत्कर्षकत्वं न चोपकारकत्वम्। अतः काव्यस्य जीवातुभूतं यत्किमपि तत्त्वमस्ति तदौचित्यमेव।

सर्वान् गुणालङ्कारादीनतिशय्य वर्तमानं काव्यात्मस्थानीयं यत्किमपि तत्त्वं तदौचित्यमेव। औचित्यानुसरणशीलानामेव गुणानां गौरवभरत्वमुपकारकत्वञ्चालङ्काराणां सार्थक्यं निर्वक्ष्यते। काव्यजीवनं केवलं गुणैः केवलं वाऽलङ्कारैर्न प्रतिष्ठते, प्रत्युत येन केन प्रकारेण काव्ये प्रयुज्यमाना गुणालङ्कारादयस्तस्यानुत्कर्षकत्वं घटयन्ति। एवमनौचित्येन प्रयुक्ता गुणालङ्कारादयो लोकजीवने वैपरीत्येन प्रयुक्तानि कटककुण्डलाद्याभूषणानीव काव्यसौन्दर्यान्तरायभूतानि रसमपकर्षन्ति। अनेन स्वातन्त्र्येण गुणालङ्कारादीनां विनिवेशमात्रेण न काचिच्छोभा विवर्धते। अतः स्पष्टं भवति यद्गुणालङ्कारादयो नात्मस्थानीयाः, अपि त्वौचित्यमेव तत्स्थानं लभते। यद्यपि काव्ये प्रत्यक्षतो गुणालङ्कारादीनामेव सौन्दर्याधायकत्वं मनस्यवतरति, तथापि प्रविवेके कृते सति कटककुण्डलादिवदुत्प्रेक्षोपमादीनां बाह्यशोभाधायकत्वात्तथा[२] च माधुर्यौजःप्रसादादीनां करुणाक्षमासत्यशीलादीनामिव प्रतीतिपथमवतरणाद् गुणत्वमेव सिद्ध्यति। अत औचित्यस्यात्मस्थानीयत्वमव्याहतम्।

औचित्यं साहित्यशास्त्रे प्रस्थानपदं लभते। प्रस्थानं नाम परम्परया प्राप्तमाम्नातं वेति स्वार्वाचीनत्वं साधयति। तत्र भारतीयवाङ्मये न केवलमौचित्येन सृष्टिसमुद्भवः परञ्चेश्वरस्याप्यवताराणां पुनः पुनः प्रभवस्तदौचित्यमेव पुष्णाति। मन्ये, औचित्यपरिपालनादेवाच्युत इत्यपरं नाम भगवतः कल्प्यते। परमौचित्यकारकत्वं परमेश्वरस्य भगवतः प्रथितम्[३]। सृष्टिसंरचना तस्यौचित्यपूर्णैव। औचित्यपूर्णञ्च सामाजिकं जीवनम्। चतुर्वर्गफलप्राप्तिरपि तत्तदौचित्यपरिपालनादेव

---

१. औचित्य, सू. ६।

२. का.प्र., उ. ६, वामनीटीका, पृ. २५८; ३. औचि.वि. मङ्गलपद्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जायत इत्यौचित्यं परमं तत्त्वं निश्चीयते। यथेश्वरसम्पर्कादकिञ्चनोऽपि जनः कृतकृत्यो भवति, तथैवासाध्वपि वस्तु तदौचित्यसम्बन्धात् सौन्दर्यमाप्नोति। तत्त्वतो वक्तुं शक्यते यदीश्वरीयव्यापारतो लोकव्यापारपर्यन्तं सर्वत्रौचित्यस्यैव प्रतिष्ठाऽस्ति। लोकवृत्तं हि काव्यवृत्तं भवति। प्रवृत्तयस्तु काव्ये लोकादेव गृह्यन्ते। काव्ये नाट्ये वा यानि चाङ्गोपाङ्गानि वर्तन्ते, तानि सर्वाण्यपि लोकानुसारीण्येव प्रथितानि। एवमौचित्यं सर्वत्र व्याप्तमिति जीवातुभूतं मन्यते।

कविपरम्परायां यद्यपि क्षेमेन्द्रस्तदौचित्यस्य प्रबलोद्घोषकः, तथापि न तस्मादेव तस्य प्रतिष्ठा, अपि तु भरतमुनेः कालादेव सङ्केताः समुपलभ्यन्ते। नाट्ये लोकधर्मिताया ग्रहणमौचित्यमेवानुसरति[१]। चतुर्ष्वपि कायिकवाचिकसात्त्विकाहार्येष्वभिनयेषु औचित्यानुसरणं विना न काव्यकलावाप्तिरिति मुनिमतम्। नाट्यप्रयोक्तृभिरौचित्यपरिपालने निश्चयेन सावधानैर्भाव्यम्। अन्यथानौचित्यदर्शनात्तद्विरसतायाः प्राबल्यान्न लोकैरभिनन्द्यते। गुणदोषनियामकमौचित्यमेव परमं तत्त्वमिति निर्दिशन् भामहाचार्योऽपि मुनिसम्मतस्यौचित्यस्य महिमानमङ्गीकरोति[२]। गुणदोषनियामकमौचित्यमेव सर्वत्र गुणादिकानुत्कर्षति। कृष्णं कज्जलं लोके नाभिनन्द्यं तथापि रमणीनेत्रसम्पर्कात् तदेव काञ्चिद्रमणीयां नेत्रकौमुदीं जनयति।

यतो हि रमणीलोचनप्रान्तविन्यस्तं विलसच्च कज्जलं कामपि चमत्कृतिमुल्लासयति। विदुषां सहृदयानां यस्मिन् परितोषस्तदौचित्यम्, यस्मिंश्चापरितोषस्तदनौचित्यमिति विज्ञाप्यैव नाट्यशास्त्रं प्रवर्तते। श्रव्यकाव्यपरम्परायां चम्पूकाव्यपरम्परायामपि गुणालङ्कारादिकानां सन्निवेश औचित्येनैव युज्यते। एवं नाट्याचार्येण भरतमुनिनाऽथ चालङ्कारसम्प्रदायस्याद्यगुरुणा भामहाचार्येण नैतेषां गुणालङ्कारप्रभृतीनामवद्यतानवद्यता च स्वाश्रयत्वेन स्वीकृता, अपि तु तदौचित्यानुगतत्वेनैव प्रख्यापिता[३]। न केवलं गुणालङ्कारादीनामियं व्यवस्था, दोषाणामपीयमेव स्थितिः। उचितस्थानविन्यस्तास्तेऽपि दोषत्वं विहाय गुणतामुपयान्ति। एवमेव गुणालङ्कारा अपि क्वचिदौचित्येन विनिवेशिता भवन्त्युत्कर्षोपकारहेतवः, अन्यत्र चातथाप्रयुक्ताः काव्यं तदात्मभूतं रसं चापकर्षन्ति। एवमौचित्यस्य परमं महत्त्वं स्वत एव सिद्धं भवति। अत्रेदं विचारणीयं यत् किमपि वस्तु दुष्टमपि सन्निधिवशादाश्रयौचित्याद्वा स्वयं चमत्कृतिमादधाति[४]।

---

१. नाट्यशास्त्रम्, २६.११६-१७; २. भामहः, काव्याल., १,३७।
३. तत्रैव- ४,५,७; ४. ध्वन्या., पृ. ३३०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'सर्वे भवन्तु सुखिनः' इति मङ्गलकामनायाः सार्थक्यमभिलक्ष्यैव काव्यशास्त्रसमुद्भवः। नाट्यवेदस्य समुद्भवौचित्यं समेषां सुखलाभे पर्यवस्यति। यस्मिंश्च सर्वे वर्णाः प्रवृत्ता भवेयुस्तन्नाट्यं स्वयं स्वौचित्यं पुष्णाति। काव्यशास्त्रस्य प्रयोजननिरूपणावसरे सत्स्वन्येषु शास्त्रेषु किमस्य शास्त्रस्यौचित्यं प्रयोजनं वेत्याशङ्कामुद्भाव्य सुकुमारमतीनां राजकुमारादीनाञ्च सुखपूर्वकं सद्यो लाभायेत्यौचित्यं प्रतिष्ठापितं काव्यतत्त्वविद्भिः। भरतभामहादिकालादेव क्वचिच्छब्दतः क्वचिच्च फलतस्तस्यौचित्यस्य प्रतिष्ठा वर्तते।

दण्डिमहाभागा अप्यौचित्यान्न केवलं परिचिताः, किन्तु तेषां दोषनियामकत्वमौचित्यमाश्रित्यैव तिष्ठति[१]। अन्यथा नित्यदोषव्यवस्थायामाक्षेपः स्यात्। दण्डिमहोदयानामौचित्यानुमोदनं लौकिकौचित्यमिव सर्वत्र काव्यौचित्यमावश्यकमनुभवसिद्धञ्च वर्तते। रूपवर्गरहितानामङ्गेषु यान्याभूषणानि हास्यं जनयन्ति, यानि च विपरीतस्थानविनिवेशेनासौन्दर्यं जनयन्ति, तान्येवौचित्यमाश्रित्य परां शोभां विस्तारयन्ति। बालानां प्रमत्तानां व्यवहारे चापार्थ एव शोभते। लोकजीवने शास्त्रपरम्परायां वा विरुद्धा विषयाः कविप्रतिभौचित्येन कमनीयतां जनयन्ति। तत्त्वज्ञा फलत उपमाया निर्दुष्टं दुष्टञ्च स्वरूपं विवृण्वन्तः प्रमाणभूतं धीमतामुद्योगरूपमौचित्यमेव साधनत्वेन निर्धारयन्ति। औचित्यस्यैतादृशीं पराकाष्ठां समधिगम्य दण्डिमहाभागा दोषत्वव्यवस्थापनावसरे काञ्चिद्विशिष्टामवस्थां स्वीकुर्वंति। विरुद्धमपि वस्तु कविकौशलात् कामप्यनिर्वचनीयां शोभामादधाति। एवमनुचितस्थानगता गुणालङ्कारादयो शब्दा दोषोद्भावका भवन्ति, उचितस्थानविन्यस्तास्त एव काव्योत्कर्षका भवन्तीत्यौचित्यरहितं काव्यं निष्प्रमाणकम्।

कान्यकुब्जाधिपतिविरचिते रामाभ्युदयनाटके—

औचित्यं वचसां प्रकृत्यनुगतं सर्वत्र पात्रोचिता।

अत्रैव प्रथमं यशोवर्मणा शब्दतः प्रयुक्तमौचित्यं दृश्यते। नाट्ये भोजराजविरचिते शृङ्गारप्रकाशे वर्तमानं पद्यमिदं तत एवोद्धृतमित्यैतिहासिकविद्वांसो[२] वदन्ति। अस्मिन् पद्ये पात्रानुरूपं वचसामौचित्यं नाट्यरसाभिव्यक्तये परममावश्यकं ख्यापितम्। अतः परं रुद्रटेन अलङ्कारौचित्यं निर्दिशता तेषां शब्दार्थालङ्काराणामौचित्यानुगतत्वं निर्धारितम्। भरतमुनिकालादारभ्य

१. काव्यादर्शः, ४-५,१०,५७; २. शृङ्गारप्रकाशः, भागः-२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रुद्रटपर्यन्तं नाट्याभिमुखस्यौचित्यस्य प्राधान्यं प्रतीयते। यतो हि प्रायशो दृश्यकाव्यमुद्दिश्य तस्य परिपालनं निर्दिष्टम्। यद्यपि साहित्यशास्त्रपरम्परायां काव्यनाट्ययोः समानरूपेण विकासक्रमः साक्षितया वर्तते, तथापि श्रव्यकाव्यस्य सहृदयजनसेवितत्वात्, दृश्यकाव्यस्य च सर्वजनसेवितत्वात् तदुद्दिश्य प्राधान्येनौचित्यस्वरूपं प्रतिष्ठापितम्।

श्रव्यदृश्योभयफलसामान्यादुभयत्राप्यौचित्यसामान्यस्यान्वयः कल्पनीयो भवति। उभयत्रापि रसास्वादः समानः, समानञ्च प्रयोजनम्। अतस्तस्य व्यापकं स्वरूपमुत्कर्षयताऽऽनन्दवर्धनाचार्येण सर्वत्र सर्वेषु च काव्यभेदेषु सत्सु गुणालङ्कारेषु लक्षणप्रयोजनानुगतत्वं काव्यस्यौचित्याधीनमेव तिष्ठतीति प्रतिपाद्यते। यथा कुशलश्चित्रकारो विभिन्नाभिश्चित्रणसामग्रीभिः समन्वितः सन् रचनानुरूपां निर्माणसामग्रीमौचित्येन चिनोति, तथैव शब्दचित्रणकुशलः कविचित्रकारः पात्रौचित्यसमन्वितैः शब्दसम्भारैर्भावचित्रणं करोति। शब्दादेव भावाभिव्यक्तिः, शब्दादेव रसोत्कर्षकाणां रसोपकारकाणाञ्च गुणालङ्कारादीनां सन्निवेशः, अतः शब्दप्रयोगौचित्यपुरस्सरं गुणालङ्कारादीनामौचित्यमादृतं ध्वन्यालोककारेणोभयत्र दृश्यश्रव्यकाव्ययोः।

आनन्दवर्धनाचार्या औचित्यसिद्धान्तस्य विकासपरम्परायां भित्तिकां निर्मान्तीति कथनं सर्वथा तदनुकूलतां भजते। औचित्यतत्त्वं समीक्ष्य तैः स्वध्वन्यालोकाख्यग्रन्थे क्वचित् सङ्केतद्वारा क्वचिच्च शब्दतो विषयमुपस्थाप्य स्वोत्तरवर्तिनां कृते सोपानपरम्परा निर्मितास्ति[१]। भरतमुनिकालादारभ्य क्षेमेन्द्रपर्यन्तमौचित्यतत्त्वं प्रथमं स्थूलतया रुद्रटादिभिः प्रस्तुतम्। आनन्दवर्धनाचार्येणानन्तरञ्चात्मस्पर्शपुरस्सरं साङ्गं स्वरूपमुपस्थापितम्। यतो हि—

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा[२]॥

अस्य पद्यस्य समीक्षणेन ध्वन्यालोककारस्य काव्यभूमेर्दर्शनसहकृतमौचित्यचारुत्वं प्रति बोधदृष्टिः प्रतिभाति। काव्यस्य प्रधानतत्त्वं सारभूततया 'रस' एवास्ति। स च रसो न कदापि वाच्यः, सर्वदैव व्यङ्ग्यः। ध्वननव्यापारेण तस्य निष्पत्तिर्भवतीत्यपि सिद्धान्तः। रसभङ्गस्य कारणीभूतमनौचित्यमुपदर्श्य

१. एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थाम्। (काव्या. २.३२)
२. ध्वन्यालोकवृत्तिग्रन्थः, उद्द्योतः ३, पृ. ३६२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काव्यादावौचित्यगर्भां रसस्य परां निष्पत्तिं निरूप्य तस्यैव तत्त्वतयोपस्थितिः पद्येऽस्मिन् कल्प्यते। अत्र रसस्तु ध्वनिरूपः। स सर्वदैव व्यङ्ग्यः। औचित्यादप्रच्युतत्वात्तस्य व्यङ्ग्यत्वमप्रतिहतम्। परञ्च गुणालङ्कारादीनामन्येषा-मुपकरणभूतानां ध्वनेः (रसस्य) उपकारकत्वादौचित्यनिकषोपलपरीक्षणमपेक्षत इत्याशयो व्यज्यते। अलङ्कार्यमुत्कर्षयितुं, तमुपकर्तुं वा काव्ये गुणालङ्कारादीनां स्थितिर्भवति। पानकरसोपकरणानामिव रसोपकरणानां स्थितिरपेक्षितेति तेषां परस्परं सम्बन्धे गुणप्राधान्यभावं निर्धारणायौचित्यमाश्रीयत इत्यभिप्रायः। काव्ये काव्योपकरणानां सम्बद्धताऽसम्बद्धता वा स्यात्, उपादेयतानुपादेयता वा स्यात्, आहोस्विदुपकरणानां सुन्दरताऽसुन्दरता वा स्यात्, सर्वास्वप्यवस्थासु तेषां रसोद्भावकत्वमेव गृह्यते। प्रकृतरसानुरूपत्वमेवैतेषां शोभते। रसस्तु पदैकदेशरचनावर्णादिभिरपि व्यज्यते। तस्माद् ध्वनिकारो वर्णपदादारभ्य वक्तृवाच्यप्रबन्धादिष्वप्यौचित्यं स्वीकरोति। यतो हि—गुणा रसधर्माः, अलङ्काराश्च शब्दार्थधर्माः, रीतिवृत्त्यादीनामपीयमेव स्थितिः। अतस्तेषां परस्परं प्रथमं सम्बन्धमवधार्यैवानन्तरं सङ्ग्रथनमौचित्यपूर्णमिति ध्वनिकारो विषयं ग्रथ्नाति।

यद्यपि पूर्वाचार्यैः साक्षात्सङ्केतेन वा व्यङ्ग्यव्यञ्जकयोर्मध्ये वा सङ्क्रमरूपेणौचित्यं प्रस्तुतम्, परमार्थतस्तु प्रस्थानपरम्परायां परिसीमनमस्य क्षेमेन्द्रमहाकवेर्वैदुष्येण जातम्। तथा हि—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते[१]॥

उपमालङ्कारे सदृशपदार्थः साधर्म्यनिरूपकः। अत्र तु स साधर्म्यान्निष्पद्यते। अत्रोक्तस्य सदृशपदार्थस्यानुरूपतार्थत्वादलङ्कारत्वमित्यभिप्रायः। काव्यशास्त्रे गुणालङ्काररीतिवृत्त्यादयः स्व-स्वोपस्थित्याऽनुरूपतां भजमाना आत्मतत्त्वं रसमेवोत्तम्भयन्ति। यतो हि—रसाद्युत्कर्षे समेषां पर्यवसानं भवति। रसस्त्वलङ्कार्यः, अन्ये चालङ्कारभूताः। एवमलङ्कार्यानुरूपस्यालङ्कारस्य तदनुरूपत्वमौचित्यं वक्तव्यं भवति। अथवा यस्य सन्निधानेन सौन्दर्यविस्तारः, तत्र तयोर्मध्ये यः पोष्यपोषकभावरूपः, उपकार्योपकारकरूपः, अथवाऽलङ्कार्यालङ्काररूपः सम्बन्धविशेषः, स एव औचित्यपदाभिधेयो भवति। एवमुपमासाधकः सदृशशब्दः साधारणधर्मसादृश्यबोधकः, औचित्यसाधकश्च सदृशशब्दश्चमत्कृत्या-

१. औचित्य., का. ७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धायकानुकूलसम्बन्धप्रकाशक इत्याशयः प्रतीयते। अस्तु, यथा तथा वा समीक्षणेनेदं निश्चीयते यद् यस्य सदृशं सच्छोभामातनोति तदुचितम्। आचार्य-क्षेमेन्द्रमहाभागो लौकिकं न्यायमाश्रित्य कामिनीनां कमनीयं कलेवरमलङ्कुर्वतां कण्ठाद्यङ्गेषु धारितानामाभूषणानामौचित्यं पुरस्कृत्य कविताकामिन्या अलङ्कारौचित्यं साधु निर्धारयति। तत्र काव्यशरीरं कविताकामिन्याः काञ्चनीं देहयष्टिमपि विभिन्नेष्वङ्गेषु विभज्य प्रत्यङ्गमौचित्येन तत्तत्सामग्र्या समलङ्कृत्यालौकिकरूपेण प्रस्तूयते। शैवलेन कमलिन्याः शोभा वितन्यते, न तु काशादिना। वल्कलेनापि शकुन्तलाया मनोज्ञता सोत्कर्षं तिष्ठति। अतो लोकवत् काव्येऽपि गुणालङ्कारादयः समुचितस्थानविन्यस्ताः काव्यात्मतत्त्वमुल्लासयन्तः सहृदयान् तर्पयन्ति। एवं लोकवत् काव्येऽपि औचित्यस्यावश्यकतां प्रतिष्ठापयन्तस्तस्य सर्वत्र ध्वनिवद् व्यापकत्वं साधयन्त्याचार्याः। पूर्वाचार्यैः 'पदैकदेशरचनावर्णेष्वपि रसादयः' इत्यादिना रसनिष्पत्तिस्थानानि यानि चोक्तानि, तत्र सर्वत्रौचित्यस्य प्रवृत्तिर्निरूप्यते। पदौचित्यं यथा—

कृशाङ्ग्यास्सन्तापं वदति विसिनीपत्रशयनम्[1]।

अत्र 'कृशाङ्ग्याः' इति पदस्यौचित्येन नायिकाया विरहव्यथाया उत्तरोत्तरोत्कर्षः सहृदयहृदयेऽवतरति, येन च विप्रलम्भशृङ्गाराभिव्यक्तिः साधु निष्पद्यते। एवमेव नायकमुखेन मन्मथोद्दीपकस्य चन्द्रस्य वर्णनेन वाक्यौचित्यं साध्यते। यथा—

'सम्बन्धी पुरुभूभुजां मनसिजव्यापारदीक्षागुरुः'[2]।

इत्यादिपद्ये नायकश्चन्द्रवर्णनद्वारा नायिकाया रतिभावमुद्दीपयितुं प्रयतते। येन च सहृदयहृदि रसनायकः शृङ्गार उज्जृम्भते। कारकौचित्यं हि—

स्तनयुगमश्रुस्नातं समीपतरवर्तिहृदयशोकाग्नेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्[3]॥

अत्र कस्यचित्पराक्रमशालिनो राज्ञः प्रतापवर्णनपुरस्सरं तस्य पौरुषेणाहृतानां रिपूणां स्त्रियः क्लेशमनुभवन्त्यो रोदनं कुर्वन्ति, तेन च निर्गलितेन वाष्पसलिलेन स्तनयुगलं स्नाति, शोकाग्नौ तपश्चरति, विमुक्ताहारञ्च वर्तत इत्यत्र कारकौचित्यं काव्यश्रियं पुष्णाति।

---

१. औचित्य, पृ. १५; २. तत्रैव, पृ. १९।
३. तत्रैव, पृ. १०२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपसर्गौचित्यं संसाधयति कालिदासस्य पद्यमिदम्—

'नीवाराः शुकगर्भकोटरमुखा भ्रष्टास्तरूणामधः।
प्रस्निग्धं क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः'[1]॥

अत्र 'प्रस्निग्धम्' इत्यत्र प्रयुक्तमुपसर्गात्मकं 'प्र'पदम् आश्रमवासिनां क्रियाशीलताया निरन्तरतां पोषयद् विच्छित्तिविशेषमभिव्यनक्ति। एवं लिङ्गौचित्यं यथा—

निद्रां न स्पृशति त्यजत्यपि धृतिं धत्ते स्थितिं न क्वचित्।
दीर्घां वेत्ति कथां व्यथां न भजते सर्वात्मना निर्वृतिम्[2]॥

अत्र स्त्रीलिङ्गस्य प्रकर्षत्वं प्रदर्शितम्, एवमन्यान्यप्यौचित्योदाहरणानि प्रस्तूय कविवरेण तस्य रसनिष्पत्तौ बीजभूतत्वं संसाधितम्। अनेनैव क्रमेण वक्तृवाच्यप्रबन्धौचित्यं तथा च गुणालङ्कारादीनामौचित्यं निरूप्यायं महाकविः काव्यस्यात्मसर्वस्वभूतत्वेन तत् प्रतिष्ठापयति।

औचित्यस्यात्मतत्त्वरूपेण प्रतिष्ठापनं यद्यपि महाकविना क्षेमेन्द्रेण स्व-प्रतिभया सम्यक् संसाधितम्, तथापि सूक्ष्मेक्षिकयाऽनुशीलनेन न तस्य तथाभूतत्वं सिद्ध्यति। काव्यात्मतत्त्वं तु रसः, तस्यैवो'पनिषत्परा' इत्युच्यते। अपि च शब्दशक्तिनिरूपणप्रकरणे 'पातु वो दयितामुखम्' इत्यत्र कामिजनं प्रत्युक्तत्वात् 'पातु' इति पदस्यौचित्याद् योग्यत्वाद् अथवाऽर्हत्वादनुकूलतां भजत्वित्यर्थे पर्यवसानं भवति। सर्वैरप्यालङ्कारिकैः प्रायश औचित्यस्य योग्यतार्थे प्रयुक्तत्वान्न तस्य ध्वन्यतिरिक्तत्वं सिद्ध्यति। आनन्दवर्धनाचार्याणां तत्पूर्वालङ्कारिकाणाञ्च नये न क्वाप्यौचित्यमात्मपदं लभते। तेषां तेषां नये कश्चिदपर एव पदार्थः काव्यस्यात्मस्थानीयः। तत्र प्रथमं भरतमुनिना रसप्रस्थानमुल्लासितम्। भामहादारभ्य वामन-रुय्यकप्रभृतिभिः काव्यस्यातिशयत्वमलङ्कारकर्तृकमभ्यूहितम्। दण्डिमहाभागाः 'रीतिरात्मा काव्यस्य' इत्युक्त्वा रीतिप्रस्थानं प्रतिष्ठापयन्ति। आनन्दवर्धनाचार्यास्तु रसमेव काव्यात्मतत्त्वमामनन्ति। तदनुयायिनो मम्मटमहाभागा अपि—

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित्।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते[3]॥

इत्युक्त्वा रसपोषकत्वेनैवौचित्यं स्वीकुर्वन्ति। केचित्तु वक्रोक्तावेवौचित्य-मन्तर्भावयन्ति। एवमाचार्याणां काव्यतत्त्वविदां स्व-स्वमतानुरूपं काव्यसर्वस्वं यद्यपि

---

१. अभिज्ञानशा. १.१४; २. औचित्य., पृ. १२३।
३. का.प्र., उ. ८, सू. १०२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भिन्नं भिन्नं तथापि सहृदयैकगम्यश्चमत्कारविशेषः सर्वानतिशय्य वर्तमानो रसपदेनैवाभिधीयते। आनन्दवर्धनाचार्यस्तु—अर्हता यतो हि सम्बन्धरूपा भवति, अतोऽत्र चोभयोरुपकार्योपकारकभावः। सदृशप्रयोगे गुणालङ्कारादयो रसस्योत्कर्षका भवन्तीति। रसस्यैव परनिर्वृतिरूपत्वमङ्गीकरोति। यदि च रसो नास्ति, तर्हि किमर्थमेतेषां विचारः, निष्फलत्वात्। काव्यजीवातुभूतं रसमवलम्ब्यैवात्मस्थानीयमलङ्कर्तुं पदोपसर्गनिपातादीनां तदाश्रयीभूतानां गुणालङ्कारादीनामौचित्यं विवेचनीयं भवति। औचित्यमूलिका रचना रसमुल्लासयन्ती काव्यस्य राजादिगतोचिताचारपरिज्ञानरूपं तृतीयं प्रयोजनञ्च साधयति। तथा च काव्यरचनायामौचित्यपरिपालनोपदेशाय लक्षणग्रन्थानामभ्युदयः। मम्मटस्तु मङ्गलपद्ये समुचितामेव देवतां नमस्करोति।

महाकविक्षेमेन्द्रेण स्वीये 'औचित्यविचारचर्चा'नाम्नि ग्रन्थे परमौचित्यकारिणे अच्युताय (मोहिनीरूपाय) नमस्कारः कृतः। अच्युतस्तु रसनायकः। रसेषु शृङ्गारो रसनायकः। शृङ्गं मन्मथोन्मेषः। तत्रालम्बनविभावं विना नानन्दोन्मेषः, अतः अच्युतो मोहिनीरूपमवधार्यात्मानमालम्बनविभावरूपेण प्रस्तूय तान् दैत्यान् वञ्चयति। तत्र मोहिनीस्वरूपस्याप्रतिमसौन्दर्यमनुभावयितुं तेनाञ्जनमलीमसा दृष्टिः कृता। औचित्यादच्युतिरेवाच्युतत्वम्। क्रियाया आश्रयीभूतमौचित्यं कर्तुरपेक्षा वर्तते। स चौचित्यकारी अच्युतः। एवं फलमपि तस्माद्भिन्नमेव। काव्यस्य पार्यन्तिकं फलमौचित्यमित्यनुभवविरुद्धम्। मोहिनीरूपस्याच्युतस्य मलीमसे नेत्रे दैत्यानां हृदि तथाविधान् भावान् जनयितुं समर्थे याभ्यां ते सारल्येन वञ्चिता भवेयुः। आञ्जस्येन वञ्चनमेवात्र फलम्, न त्वौचित्यम्। भावानां जननात्प्रागेवौचित्यस्य विश्रान्तिः। अपि च गुणालङ्काररीतिवृत्त्यादीनाश्रित्यैवौचित्यमनौचित्यं वा तिष्ठति। तथा हि श्रुतिकट्वादयो ये खलु दोषास्ते शृङ्गारादीन् रसान् दूषयन्ति (अपकर्षयन्ति), अतो रसास्वादान्तरायभूतत्वात्तत्र तेषां सर्वानुभवसिद्धमनौचित्यमव्याहतम्। त एव च वीरबीभत्सादौ चित्तविस्तारात्मके रसे तस्योद्दीपकत्वादौचित्यमावहन्तीति। अनेनेदं प्रतिभाति यत्—परुषवर्णरूपा ध्वनयो न स्वत एव दुष्टाः, अपि तु समुचितस्थानविन्यासाद् यथा गुणतामुपयान्ति, तथैवानुचितस्थाने प्रयुक्तत्वाद्दोषाय भवन्ति। अतो रस्यमानतासारैकप्राणस्य रसस्यास्वादे तस्यानुकूलप्रतिकूलरूपेणोपस्थापनेनैवौचित्यमनौचित्यञ्च प्रतिपद्यते। अपि चाचार्यक्षेमेन्द्रस्य—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना[१]।।

इत्यपि कथनमसङ्गतं प्रतिभाति। न ह्यौचित्यं रसं विनाऽवतिष्ठते। 'रस्यते इति रसः' रस्यते=आस्वाद्यते। एवं रस आस्वादरूपः। तं विना केवलमौचित्यं नाह्लादवत्तां प्राप्नोति। अपि च साहित्यदर्पणकारादिकानामभिमतमिदं यत् प्रथमं विधेयवस्तुसत्ता कल्प्यते, अनन्तरञ्च तद्विषयकमलङ्कारमाश्रित्य किमनुचितं किञ्चोचितमिति विचारणीयं भवति। इयं स्थितिः काव्यस्वरूपनिर्धारणकालादेव प्रक्रियां प्राप्नोति। अथ च—

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना।।
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्[२]।।५।।

रसे सारः चमत्कारः सर्वत्राप्यनुभूयते[३]। चमत्कारजनकभावनाविषयार्थप्रतिपादकत्वं शब्दत्वं काव्यम्[४]। लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्[५]। 'ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी रसः'[६] इत्यादिप्रसिद्धालङ्कारिकवाक्यसन्दर्भेषु रसास्वादनसमकालमेव विगलितवेद्यान्तरानन्दोऽनुभवविषयतां प्राप्नोति, न त्वौचित्यम्। अपि च 'विभावानुभावसञ्चारिसंयोगाद् रसनिष्पत्तिर्भवतीति विषये तु न केवलं शास्त्राणि प्रमाणम्, अपि तु सहृदयानामनुभवोऽपि प्रमाणं वर्तते। यतो हि स च रसः स्थायितया हृदि तिष्ठत्येव। न च क्वचिदौचित्यं संस्काररूपेण वर्तमानमस्तीति श्रूयते। औचित्यपरिज्ञानं तु लोकशास्त्रकाव्याद्यवेक्षणादेव भवति। अग्निपुराणकारस्तु 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितमि'त्यत्र रसमेव पार्यन्तिकं फलं मनुते। रसस्य न काचिद् बाह्यानुभूतिः, स सर्वदैवाभिव्यक्तो भवति। औचित्यं तु लोकसम्बन्धेषु प्रत्यक्षतयानुभूयते। तद्विना जगतः प्रक्रियैव नाग्रेसरति। रसस्तु ब्रह्मानन्दसहोदरः। औचित्यं नामाच्युतस्य कर्तुः

१. औचित्य., का. ३; २. तत्रैव, का. ५।
३. साहित्यदर्पणः, परि. ३, का. ३।
४. रसगङ्गाधरे काव्यलक्षणस्य प्रथमपरिष्कारः; ५. काव्य-प्र., १.१ वृत्तिग्रन्थः।
६. काव्यप्र., च.उ., सू. २८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कर्मत्वमेव। मरणस्यामङ्गलत्वेऽपि श्रेयसे वीरगतिः प्रशस्यते। एवं सर्वत्र बाह्याभ्यन्तरं प्रत्येकस्मिन् वस्तुनि वर्तमानो योगात्मकः सम्बन्धविशेषः।

अन्विताभिधानवादिनां मीमांसकानां वाक्यार्थज्ञानमिव प्रारम्भत एव प्रत्यक्षमिवानुगम्यमानमौचित्यं क्वचिदुपकारकत्वेन क्वचिदुत्कर्षकत्वेन नियमनं करोति। यद्यपि रसनिष्पत्तिपर्यन्तमौचित्यं विभावादिकानामिव भासमानं प्रतीयते, तथापि तत्र केवलं तटस्थरूपेण तस्य प्रतीतिमात्रम्। एवमेव मम्मटभट्टेन सप्तमोल्लासे रसदोषनिरूपणप्रसङ्गे वृत्तिग्रन्थे—

'एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनामप्यन्यथावर्णनं विपर्ययः' इत्यत्रौचित्यं यथानिर्दिष्टा परिपालनीया प्रक्रियैव गम्यते[१]।

उपर्युक्तपरिशीलनप्रक्रियायामिदमवगम्यते यदन्यैः पूर्वाचार्यैर्निर्दिष्टमौचित्यं रसभावादिकानुद्दिश्य गुणालङ्कारादिकानां निबन्धने सम्बन्धमात्रमेव। अयं सम्बन्धः क्वचिन्नियमपरिपालनमात्रम्, क्वचिच्चातिशयानुकूलकाव्यघटनाघटितत्वादलङ्कारानाश्रित्योपकारकत्वेनापि च गुणानाश्रित्योत्कर्षकत्वेन च साहाय्यमाचरति।

अन्विताभिधानवादिनां मीमांसकानां वाक्यार्थज्ञानमिव प्रतीतौ लोके शास्त्रे च सोपानपरम्परां सम्प्राप्तमौचित्यं कविप्रतिभाविषयतां पूर्वं भजते। श्रोतॄणां सहृदयानां काव्यज्ञानां बुद्धौ काव्यश्रवणानन्तरमुदेति। अन्यथा दोषाणामाशङ्कया तत्र प्रवृत्तिरेव न भवति। वस्तुनो रसनिष्पत्त्यभिव्यक्त्यनुकूलं विभावादिकानां सङ्घटनसौष्ठवमौचित्यमिति वक्तुं शक्यते। यतो हि—काव्यघटनानुकूलशब्दार्थोपस्थितिसापेक्षं समुचितललितसन्निवेशचारुत्वं रसास्वादे हेतुभूतमस्ति। तदर्थं काव्ये भाषायाः सौन्दर्यं ललितपदानां परस्परं मैत्रीसम्बन्धः, नवीनकल्पनाचातुर्यमथ च वर्णनावैचित्र्यं प्रधानतयानुरुध्यन्ते। औचित्यस्यात्मतत्त्वव्यवस्थापकश्रुतिप्रमाणाभावात्, तथा च पार्यन्तिकानुभवाविषयत्वाद् दोषदर्शनसमकालमेव भङ्गुरत्वादपरत्र च **'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति'** (तैत्ति.उ. २/७) इत्यादिश्रुतिस्वारस्यात्, सहृदयानुभवसिद्धत्वात् पार्यन्तिकाह्लादविशेषस्यौचित्यमात्रे परिसीमनमसम्भवमेव। औचित्यं तु तादृशी सम्बन्धरूपा सोपानपरम्परा वर्तते, यस्यामधिरूढः सहृदयो रसाभिव्यक्तिरूपं पार्यन्तिकं फलमश्नुते।

एवं प्राचामालङ्कारिकाणां नये रसाद्भिन्नमौचित्यं गुणालङ्कारादिकानां रसाद्यनुकूलं सम्बन्धमात्रं सामान्यावस्थायां वस्तुनः स्वरूपोद्घाटने पर्यवसितं

---

१. का.प्र., वाम., पृ. ४४४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवति, अथ च पराकाष्ठां प्राप्तस्सन् चमत्कृतिमुन्मेषयन्नभिन्नत्वेन भासते। महाकविक्षेमेन्द्राभिमतमौचित्यं प्रतिभाप्रसूतं काव्यतत्त्वं रसाभिन्नमलौकिकत्वेनानुभूयते। वस्तुतो विभिन्नानामवयवानामङ्गानां वा सङ्घटने स्नुहीकल्पमौचित्यं 'विभावादिजीवितावधिचर्व्यमाणो रसः' इति निष्कर्षपर्यन्तं परिव्याप्य तिष्ठति। वस्तुतः क्षेमेन्द्रात्पूर्वं लक्षणग्रन्थकारैर्यद्यपि काव्यशास्त्राङ्गान्यङ्गिनश्चाश्रित्यानेके ग्रन्था विरचिताः। परञ्चौचित्यविषयकं विवेचनं स्वरूपतः, गुणतश्च केवलं क्षेमेन्द्रेण कृतं वर्तते। यद्यप्यौचित्यस्यान्यैरालङ्कारिकैरिव किमपि स्वतन्त्रं लक्षणं क्षेमेन्द्रेणापि नोल्लिखितम्, तथापि काव्यात्मत्वेन तस्य प्रतिष्ठापनाय तेन साधु विवेचनमुपस्थापितमस्ति। मद्दृष्ट्या तु—औचित्यं नामालङ्कारिकाणां राजमार्गः। यस्य शरीरसौष्ठवमिव प्रतीतिः काव्यदर्शनश्रवणसमकालमेव भवति। निर्माणञ्चास्य स्वयं कविभिः काव्यानुरूपैर्मञ्जुलैः, सरसैः सरलैश्च वचोभिः क्रियते। अथवा कवीनां कृतिषु तारतम्येन तत् स्वयमेव भासते। भासनमिदमविच्छिन्नतया रसाभिव्यक्तिपर्यन्तं भवतीति तस्य काव्यात्मस्थानीयत्वमपि सिद्धं भवतीति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

औपम्यविवेकः

डॉ. विजयकुमारपाण्डेयः
प्राध्यापकः, साहित्यविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य
वाराणस्याम्

❋ ❋ ❋

देववाणीनिबद्धे वैदिकवाङ्मये समग्रविद्यानां प्रतिपादनं सङ्केतनञ्च विराजेते। अत एव विविधविधानां मूलतत्त्वानुसन्धानं वेदेषु कर्तुं शक्यते। अनया दृष्ट्या साहित्यशास्त्रीयतत्त्वानामपि रसालङ्कारध्वनिरीतिप्रभृतीनामनुसन्धानं भारतीयैः पाश्चात्त्यैश्च विद्वत्तल्लजैर्वेदेषु कृतमस्ति। तत्र श्रुतिवाक्यमिदं निदर्शनम्—

'देवस्य पश्य काव्यं न ममार न जीर्यति'।

उपरितनवाक्येन ज्ञायते यद् वैदिकवाङ्मयं खलु देवकाव्यमस्ति। परमात्मापि अनेकत्र कविशब्देन व्यवहृतोऽस्ति, 'कविर्मनीषी परिभूः स्वयम्भूः' (शुक्लयजुर्वेद संहिता, म. ४० म. ८) इत्यादिरूपेण। वेदाविर्भावकः परमात्मा कविः वेदश्च देवकाव्यम्, अत एव वैदिकवाङ्मये समग्रकाव्य-सौन्दर्यतत्त्वानि बुद्धिगोचरीभवन्ति। वैदिकपदेषु माधुर्यादिगुणानां रीत्यलङ्कारध्वन्यादितत्त्वानाञ्च प्रभूतानि निदर्शनानि दृश्यन्ते, उपमारूपकाद्यलङ्काराणां तु प्रभूतानि उदाहरणानि तत्र पदे पदे लभ्यन्ते। यथा—

उत त्वः पश्यन् न ददर्श वाचम्।
उत त्वः शृण्वन् न शृणोत्येनाम्।।
उतो त्वस्मै तन्वं विसस्रे।
जायेव पत्ये उषती सुवासा।। (ऋग्वेदे, १.७१.४)

अहो, अत्र कीदृशं चमत्कारकमौपम्यचित्रणमस्ति। वाग्देवी केषाञ्चन पश्यतामपि जनानां समक्षं नायाति, केषाञ्चिच्च शृण्वतामपि जनानां कृते न श्रवणगोचरीभवति। केषाञ्चित् तु सौभाग्यरञ्जितमानसानां समक्षं भगवती वाग्देवी समग्रं स्वीयं सौन्दर्यं तथैव समुन्मीलयतितराम्, यथा काचन सुन्दरी तरुणी

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कमनीयवस्त्राद्यलङ्कृता पत्युः समक्षं समग्रं सौन्दर्यं पूर्णतया प्रदर्शयति। उदाहृते मन्त्रे पूर्वार्धे प्रसादगुणगुम्फितविरोधाभासस्य चित्रणं चित्तं चमत्करोति। उत्तरार्धभागस्तु उपमायाः स्वरूपं प्रकटीकरोति, क्वचिच्च उषादेवी स्वकीयं सौन्दर्यं सौन्दर्यवती नारीव व्यनक्ति—

'उषा हस्नेव निर्णीते अप्सः'।

सादृश्यमूलकरूपकालङ्कारचित्रणं निम्नाङ्किते वेदमन्त्रे कस्य चित्तं न समावर्जयेत्—

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।।

(ऋग्वेदे- १/१६४/२०)

अत्र परमात्मा जीवात्मा च रूपकालङ्कारद्वारा पक्षिद्वयरूपेण वर्णितौ। प्रकृतिश्च वृक्षरूपेण निरूपिता, फलोपभोक्ता जीवश्च पिप्पलवृक्षफलभोक्तृपक्षीव प्रतिपादितः, अभोक्ता तटस्थः परमात्मा च अनश्नन् पक्षीव स्वीयसौन्दर्यप्रकाशकत्वेन निरूपितोऽस्ति। अत्र मन्त्रे अनश्नन्नन्य इत्यत्र नकारानुप्रासमाधुर्यं पूर्वार्धे तु सकारानुप्रासमाधुर्यं व्यज्येते। चरमचरणे तु हेतुं विनापि कार्योत्पत्तिर्विलोक्यते। अभोक्ताऽपि परमात्मा परितः प्रकाशमातनोति, अत एव विभावनालङ्कारः प्रकाशितो विभाति। साहित्यदर्पणकारदृष्ट्या तु अत्र विशेषोक्त्यलङ्कारो विभाव्यते।

एकस्मिन्नेव निरुक्ते मन्त्रे विभावनाविशेषोक्तिरूपकानुप्रासोपमादयोऽलङ्कारा विभान्ति। जीवात्मपरमात्मनोः नित्यता, सच्चिदानन्दरूपता, स्वप्रकाशता, परस्पर-सम्बद्धता इत्यादीनि तत्त्वानि व्यज्यन्ते। तेनात्र पदध्वनिरपि ध्वन्यते, स्थालीपुलाकन्यायेन वक्तुमिदं शक्यते यद् वैदिकवाङ्मयं साहित्यशास्त्रीयविविध-तत्त्वोपपादकमस्ति।

निरुक्ते उपमा

निरुक्तवाङ्मये तु उपमायाः प्रायोगिकानि निदर्शनानि पदे पदे विवेचितानि सन्ति। उपमालक्षणादीनामपि शास्त्रीयं विवेचनं तत्र क्वचित्-क्वचित् प्राप्यते, यथा—

'यद् अतत् तत्सदृशं तदासां कर्म इति गार्ग्यः'। (निरुक्ते, ३.३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवान् यास्काचार्य: पूर्ववर्तिनो गार्ग्याचार्यस्य उपमालङ्कारलक्षणसम्मतं मतं विवृण्वन् व्याचष्टे यद् भिन्नमपि सद् यत् समानतया विभाव्यते तत् तत्त्वमौपम्यरूपं भवति। अत्र तु अर्वाचीनानामाचार्याणां सादृश्यलक्षणमिदं जाघटीति—'तद् भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यमिति'।

सादृश्यमूलकमौपम्यं तु अधस्तने निरुक्तवाक्ये विलोक्यते—

'ज्यायसा वा गुणेन प्रख्याततमेन वा।
कनीयांसं वा अप्रख्यातं वा उपमिमीते'।।

अर्थाद् यत्र प्रख्यातेनोपमानेन साकमप्रख्यातस्योपमेयस्य सादृश्यं प्रतिपाद्यते तत्रोपमा भवति। उपमाया: सामान्यलक्षणमिदं परवर्तिसाहित्यशास्त्रीयग्रन्थेषु कृतमस्ति। निरुक्तकारदृष्ट्या वेदमन्त्रेषु उपमारमणीयता विविधरूपेण प्रकाश्यते। यथा—

'तनुत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम्।
इत्यन्ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गः'।।

(ऋग्वेदे, १०.४.६)

अस्मिन् मन्त्रे लौकिकप्रेयोमार्गपथिका जना वन्यतस्करवत् प्रतिपादिता: सन्ति। यथा तस्करा परधनापहरणपूर्वकं जीवन्ति, तथैव लौकिका जना अपि कठोरतया दशेन्द्रियसंयमनपूर्वकं स्वजीवनं यापयन्तु इत्याद्यात्मिक-तत्त्वविवरणमुपमामाध्यमेन चमत्कारपूर्वकं चित्रितमस्ति।

वेदे खलु उपमावाचकेषु पदेषु इव-वत्-आ-चित्-थाप्रभृतिपदान्यपि प्रयुज्यन्ते। यथा—

'जार आ भगम्'
'तं प्रत्नथा पूर्वथा विश्व थेमथा'। (रुद्राष्टाध्यायी, ४.५)

उपमावाचकं यथापदं तु बहुधा तत्र प्रयुक्तमस्ति—

'यथा वातो यथा वनं यथा समुद्र एजति'।

(ऋग्वेदे, ५.७८.८)

सादृश्यसूचकं वत् पदमपि वेदे पदे पदे दृष्टिगोचरं भवति।
'प्रियमेधवदसिवज्जातवेदो विरूपवत्'।। (ऋग्वेदे, १.४५.३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निरुक्तकारेण उपमाया विविधभेदाः कर्मोपमा-भूतोपमा-रूपोपमा-सिद्धोपमा-लुप्तोपमादयः प्राचुर्येण निरूपिता निदर्शिताश्च। लुप्तोपमा च निरुक्तकारेण अर्थोपमात्वेन क्वचिन्निरूपिता यथा—'सिंहपुरुषः' इत्यत्र सिंहपदं प्रशंसनपरकं प्रयुक्तम्। काकः पुरुष इत्यत्र तु काकपदं निन्दाव्यञ्जकम्। परवर्तिनि काले तु उदाहरणद्वयमिदं रूपकालङ्काररूपं सञ्जातम्।

व्याकरणशास्त्रे उपमा

नवव्याकरणेषु प्रधानतमे पाणिनीयव्याकरणेऽपि उपमातत्त्वानि सुस्पष्टतया व्यज्यन्ते। विविधानि पाणिनिसूत्राणि औपम्यतत्त्वानि समुन्मीलयन्ति—

(क) तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।

(अष्टाध्यायीग्रन्थे, २.३.७२)

(ख) उपमानानि सामान्यवचनैः। (अष्टाध्यायीग्रन्थे, २.१.५५)

(ग) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (अष्टाध्यायीग्रन्थे, २.१.५६)

उक्तसूत्रेषु उपमोपमानोपमेयशब्दानां निरूपणेन ज्ञायते यद् व्याकरणशास्त्रे उपमालङ्कारस्य सम्मानजनकं स्थानमस्ति। श्रौती आर्थी चोपमे साहित्यदर्पण-प्रतिपादिते व्याकरणरीत्यैव समर्थिते प्रकाशेतेतराम्—

श्रौती यथेव वा शब्दा इवार्थो वा वतिर्यदि।
आर्थी तुल्य-सामानाद्या तुल्यार्थो यत्र वा वतिः।।

(सा.द., १०.१६)

श्रौत्रीनाम्नी उपमा तत्र भवति यत्र उपमानपदैः सह इव-यथा-वा-प्रभृतिपदानि प्रयुज्यन्ते, अथवा 'तत्र तस्येव' (अष्टाध्यायी, १.५.११६) सूत्रेण कृतो वतिप्रत्ययः (वत् इति) दृश्यते। आर्थीनाम्नी उपमा तत्र भवति, यत्र तुल्य-समानादय उपमावाचकाः शब्दाः प्रयुज्यन्ते, अथवा 'तेन तुल्यं क्रिया चेद्वतिः' (अष्टा., ५.१.११५) सूत्रेण कृतो वतिप्रत्ययो विलोक्यते।

काव्यप्रकाशकारेण वाग्देवतावतारस्वरूपेण मम्मटाचार्येणापि पूर्णोपमा श्रौत्यार्थी रूपद्वयवती निरूपिता—

'श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा'।

(का.प्र., का. ८७, सू. १२७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वे अपि उपमे वाक्यसमासतद्धितगतत्वेन प्रकारत्रयशालिन्यौ इति कृत्वा पूर्णोपमा षोढा प्रतिपादिता, यथा वादिपदघटिता श्रौती तुल्यादि-समानार्थकपदघटितार्थीति काव्यप्रकाशाकूतं चकास्ति। 'यथेववादिशब्दाः यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथापि शब्दशक्ति-महिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा तथैव (अष्टा., १.५.११६) तत्र तस्येव इत्यनेनेवार्थे विहितस्य वतेरुपादानेऽपि'।

'तेन तुल्यं मुखम्' इत्यादावुपमेय एव 'तत्तुल्यमस्य' इत्यादौ चोपमान एव 'इदञ्च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिशब्दोपादाने आर्थी। तद्वत् तेन 'तुल्यं क्रिया चेद्वतिः' इत्यनेन विहितस्य वतेः स्थितौ।

(का.प्र., द.का. ८७ सू. १२६ वृत्तौ)

उपमालङ्कारस्य वाक्यसमासतद्धितगतं भेदत्रयमपि व्याकरणशास्त्राधृतमस्ति। यथा—

'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले'।। (सा.द., पृ. ८१४)

अत्र अम्भोरुहवत् पदे 'तत्र तस्येव' इति सूत्रेण विहितो वतिप्रत्ययो विलोक्यते, तेन तद्धितगता श्रौती उपमा सिद्ध्यति। कुम्भाविव इति पदे 'इवेन (सि.कौ., पृ. १६०) नित्यसमासः विभक्त्यलोपश्च' इति नियमेन 'कुम्भ'शब्दस्य 'इव'शब्देन नित्यसमासे कृते समासगता श्रौती उपमा भवति। 'शरदिन्दुर्यथा' इति वाक्ये यथापदघटिते वाक्यगता श्रौती उपमास्ति। एवमेव आर्थीनाम्न्यामुपमायामपि भेदत्रयं निम्नाङ्कित पद्ये द्रष्टुं शक्यते—

'मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः। (सा.द., पृ. ८१५)
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः'।।

उदाहरणपद्येऽत्र सुधया तुल्यं सुधावद् इति लौकिकविग्रहे 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण वतिप्रत्यये निष्पादिते सति निष्पन्ने सुधावत् पदे तद्धितगतार्थी उपमा विलोक्यते। पल्लवेन तुल्यः पल्लवतुल्य इति पदे समासगतार्थी उपमा विभाति। 'मृगलोचनाभ्यां सदृशी चपले' इति वाक्ये तु वाक्यगतार्थी उपमा सुस्पष्टैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं रीत्या पूर्णोपमायाः श्रौत्यार्थीरूपभेदद्वयं सर्वथा व्याकरणसूत्रनियन्त्रितं बाभास्यते। लुप्तोपमायामपि पञ्चभेदाः सर्वथा व्याकरणायत्ता विभान्तितमाम्।

'आधारकर्मविहिते द्विविधे च क्यचि क्यङि।
कर्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः'।। (सा.द. १०/१९)
'वादेर्लोपे समासे सा कर्माधारे क्यङि।
कर्मकर्त्रोर्णमुलि'।। (का.प्र., का. १०, सू. १३०)

धर्मलुप्तोपमायाः पञ्चापि भेदा एकस्मिन्नेव पद्ये द्रष्टुं शक्यन्ते—

'अन्तः पुरीयसि रणेषु सुतीयसि त्वं पौरं जनं तव सदा रमणीयते श्रीः।
इष्टः प्रियाभिरमृतद्युतिदर्शमिन्दुसञ्चारमत्र भुवि सञ्चरसि क्षितीश'।।

(सा.द., पृष्ठ ८१९)

अत्र अन्तःपुरे इव आचरसि = अन्तःपुरीयसि इति पदे आधारार्थे 'अधिकरणाच्च' (सिद्धान्त कौ., पृ. ४४६) इति वार्तिकद्वारा क्यच्प्रत्ययो विधीयते, सुतमिव आंचरसि=सुतीयसि इति पदे आचारार्थे 'उपमानादाचारे' (अष्टा. ३/१/१०) इति सूत्रेण क्यच्प्रत्ययो विभावनीयः। रमणी इव आचरति=रमणीयते इति पदे आचारार्थे 'कर्तुः क्यङ् सलोपश्च' (अष्टा.३/१/११) इति सूत्रेण क्यङ्प्रत्ययो विधीयते। अमृतद्युतिदर्शं दृष्ट इति वाक्ये इन्दुसञ्चारं सञ्चरति इति वाक्ये च 'उपमाने कर्मणि च' (अष्टा. ३/४/४३) इति सूत्रेण क्रमशः कर्मणि कर्तरि चोपपदे णमुल्प्रत्ययो ज्ञातव्यः। किं बहुना समस्तोऽपि सोऽयमुपमाप्रपञ्चो व्याकरणशास्त्राधीन एव प्रतिभाति।

काव्यप्रकाशसम्मता उपमा

मम्मटेन काव्यप्रकाशस्य दशमोल्लासे अर्थालङ्कारप्राणभूतोपमा लक्षिता— 'साधर्म्युपमा भेदे'।

भेदे सत्यपि उपमानोपमेययोः समानेन धर्मेण सम्बन्धे (साधर्म्ये) सति उपमा भवति। उपमाया अङ्गचतुष्टयं सर्वविदितमस्ति। उपमानोपमेयसाधारण-धर्मोपमाप्रतिपादकरूपम्। अङ्गचतुष्टयवती उपमा पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे सति लुप्तोपमा भवति। पूर्णा चेयं द्विविधा—श्रौती आर्थी चेति। वाक्यसमासतद्धितगता त्रिविधा, एवंरूपैव आर्थी अपि त्रिविधेति कृत्वा षड्विधा पूर्णा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लुप्तोपमा तु धर्मलुप्तायाः पञ्चभेदैः, वाचकलुप्तायाः षड्भेदैः, उपमानलुप्तायाः द्वाभ्यां भेदाभ्यां, धर्मवाचकलुप्तायाः प्रकारद्वयेन, वाचकोपमेयलुप्ताया एकेन भेदेन, उपमानोपमावाचकसाधारणधर्मलुप्ताया एकेन भेदेन करम्बिता सती एकोनविंशतिभेदवती चकास्तितराम्। इत्थं षड्विधां पूर्णोपमामेकोनविंशविधां लुप्तोपमाञ्च सम्मेल्य पञ्चविंशतिविधा सेयमुपमा प्रपञ्चिता मम्मटेन।

आचार्यरुद्रटप्रतीते काव्यालङ्कारे तु निरुक्तभेदातिरिक्ता उपमा भेदद्वयी सोदाहरणं प्रतिपादिता—मालोपमा रशनोपमा चेति।

आचार्यमम्मटेन तु रुद्रटनिरूपितभेदद्वयमिदं पञ्चविंशतिभेदभिन्नाया-मुपमायामेवान्तर्भावितम्।

साहित्यदर्पणप्रतिपादिता उपमा

साहित्यदर्पणकारेण कविराजविश्वनाथेन दशमपरिच्छेदे उपमालक्षणं विततमस्ति—

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः'।

(सा.द. १०.१४)

एकस्मिन्नेव वाक्ये वैधर्म्यरहिते साम्ये वाच्ये सति उपमानोपमेयघटिता उपमा विभावनीया। सेयं पूर्णा-लुप्तेति भेदद्वयेन विभक्ता द्विविधा भवति। मम्मटरीत्यैव तद्धितसमासवाक्यगते उपमे इमे षड्विधे प्रतिपादिते। पूर्णाया एव श्रौत्यार्थी चेति भेदद्वयं मम्मटरीत्या प्रपञ्चितं तेन। मम्मटेन पञ्चविंशतिविधोपमा प्रतिपादिता, साहित्यदर्पणकारेण तु सप्तविंशतिविधोपमा निरूपिता।

मम्मटसम्मता पञ्चविंशतिविधोपमा विश्वनाथसम्मताभ्यां द्वाभ्यामुपमाभ्यां सहिता सप्तविंशतिभेदप्रभिन्ना प्रकाशते। विश्वनाथसम्मता च भेदद्वयी अस्ति बिम्बोपमा, एकदेशविवर्तिन्युपमा चेति।

अत्रेदमनुशील्यते—सर्वप्रथममाचार्यभरतेनोपमालङ्कारस्यान्यालङ्काराणाञ्च निरूपणं कृतम्। अग्निपुराणेऽपि उपमा सभेदं प्रपञ्चिता। भामह-रुद्रट-प्रतिहारेन्दुराजजयदेवाप्पय्यदीक्षितादिप्रतिपादितेषु काव्यालङ्कारचन्द्रालोकादिग्रन्थेषु उपमायाः सुविस्तृतं प्रतिपादनं वर्तते। आचार्यदण्डी काव्यादर्शे सम्राज्ञीमिवोपमां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समलङ्करोति। अधुनातनेन पर्वतीयेन पं. विश्वेश्वरभट्टेनाऽपि अलङ्कारकौस्तुभे नूतनप्रतिभोन्मीलिता बहुभेदविभक्ता स्वरचितोदाहरणैः सम्पोषिता सा। हिन्दीभाषारचितेष्वपि अलङ्कारशास्त्रग्रन्थेषु उपमा ससम्मानं प्रतिष्ठापिता। 'उपमैका शैलूषी' इति सूक्त्या मायारूपिणी उपमा समस्तमपि अलङ्कारजगत् चारुतया नर्तयति इत्यहो अलङ्कारसंसारे उपमासाम्राज्यं सर्वैरपि विद्वद्वरैः स्वीकृतमस्ति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघु-ग्रन्थमाला
[६६]

श्रीजीवानन्दविद्यासागरभट्टाचार्यसङ्कलितः

सामान्यनिरुक्तिवादार्थः

सम्पादकः
डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वि.सं. २०६३

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नैवेद्यम्

जीवानां परमपुरुषार्थस्तावदपवर्गः 'आत्मा वाऽरे द्रष्टव्यः.....' इत्यादिश्रुतेः। तदर्थमेव हि सर्वाणि दर्शनानि प्रणीतानि परमकारुणिकैर्मुनिभिः, आन्विक्षिक्या अपि तदेव प्रयोजनम्। तथा चाह मणिकारः प्रामाण्यवादस्यारम्भे **'जगदेव दुःखपङ्क-निमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः. प्रणिनाय'** इति। इन्द्रियादीनामेकविंशतेर्दुःखानामात्यन्तिकी निवृत्तिरेव अपवर्गः। दुःखनिवृत्तौ आत्यन्तिकत्वञ्च दुःखप्रागभावासमानकालीनत्वम्। सा च तत्त्वज्ञानात् मिथ्याज्ञाननिवृत्तिमुखेन। तथा हि सूत्रं—**दुःखजन्मप्रवृत्तिदोषमिथ्या-ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः** (न्या.सू. १.१.२) इति। तत्त्वज्ञानञ्च प्रमाणादीनां षोडशपदार्थानामिति प्रथम एव सूत्रे प्रतिपादितम्— **'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः** (न्या.सू. १.१.१) इति। तेषु प्रमाणानां प्राथम्यं, तेष्वपि चानुमानस्य प्रामुख्यम्। अत एव नव्यन्यायशास्त्रमनुमानशास्त्रमिति नाम्नाऽपि प्रसिद्धम्। अनुमानाङ्गेषु हेत्वाभासानामस्ति प्रमुखं स्थानम्। यावद् व्याप्तिपक्षधर्मताविरहविशिष्ट-हेतावसद्धेतुत्वज्ञानं न भवति तावदनुमित्यात्मकस्तत्त्वनिर्णयो न भवति। अनुमित्यात्मकतत्त्वनिर्णय एवानुमानस्य फलम्। अत एव हेत्वाभासानामपि तत्त्वनिर्णयप्रयोजकत्वम्। तथा चोक्तं मणिकृता **'अथ हेत्वाभासास्तत्त्व-निर्णयविजयप्रयोजकत्वान्निरूप्यन्ते'**[१] इति। हेत्वाभासाश्च सव्यभिचारविरुद्ध-सत्प्रतिपक्षासिद्धबाधिताः पञ्च। तेषां सामान्यलक्षणान्याश्रित्य रचितः **तत्त्वचिन्तामणेः** प्रकरणविशेषः **सामान्यनिरुक्तिरि**ति नाम्ना प्रसिद्धः। तत्र हेत्वाभासानां त्रीणि सामान्यलक्षणानि समुपन्यस्तानि—१. अनुमितिकारणी-भूताभावप्रतियोगियथार्थज्ञानविषयत्वम्, २. यद्विषयकत्वेन लिङ्गज्ञानस्यानुमिति-प्रतिबन्धकत्वं तत्त्वम्, ३. ज्ञायमानं सदनुमितिप्रतिबन्धकं तत्त्वमिति।

तत्र प्रथमे लक्षणे प्रामुख्येन विषयद्वयं विवेचितमस्ति। प्रथमतो लक्षणघटकानुमितिपदार्थो विवेचितः। पक्षे साध्यवत्ताज्ञानमनुमितिशब्दस्य मुख्योऽर्थो भवति। किन्तु तावन्मात्रस्य लक्षणे प्रवेशे कृतेऽनुमित्यविरोधिज्ञानविषये

१.द्र. सामान्यनिरुक्तिसौगन्ध्यम्, सं.सं.वि.वि., पृ.सं. ९१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यभिचारादावव्याप्तिः स्यात्। तथा हि हेत्वाभासास्त्रिप्रकारा दृश्यन्ते। केचन अनुमितिविरोधिज्ञानविषयाः, यथा—बाधसत्प्रतिपक्षौ। केचन परामर्शविरोधिज्ञान-विषयाः, यथा—सव्यभिचारविरुद्धव्याप्यत्वासिद्धिस्वरूपासिद्धयः। अन्ये तूभयविरोधिज्ञानविषयाः, यथा—पक्षाप्रसिद्धिसाध्याप्रसिद्धी। अतोऽनुमितिपदस्य परामर्शलक्षकत्वेऽपि न निस्तारः, परामर्शाविरोधिज्ञानविषये बाधादावव्याप्तेः। इत्थं विशेषतो विविच्य पक्षः साध्यवान् साध्यव्याप्यहेतुमांश्चेति समूहालम्बनानुमित्यभिप्रायेण **'साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारकानुमितिपरं वा'**[१] इत्युक्तं दीधितिकृता।

ततः पर्वतो वह्निमान् धूमादित्यादावनुमितिप्रतिबन्धकं पर्वतो वह्न्यभाववानिति भ्रमात्मकं ज्ञानमादाय तद्विषये वह्न्यभावादावतिव्याप्तिमाशङ्क्य यथार्थपदसार्थक्यमुपपादितम्। पर्यन्ततस्तस्य वैयर्थ्यमेव प्रतिपाद्य तदघटितं द्वितीयं लक्षणमारब्धं यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं तत्त्वमिति।

इदमेव लक्षणं प्रधानम्। अत्र अनेके विषयाश्चर्चिताः। तत्र लिङ्गांशनिवेशविचारः, अवच्छेदकत्वविचारः, अव्यापकविषयताशून्यत्वविचारः, विशिष्टद्वयाघटितत्वविचारः, विशिष्टान्तराघटिततत्वविचारः, नचचतुष्टयविचारः, अत्रवदन्तिकल्पविचारस्तथा चान्ये विषया मुख्यतया चर्चिताः सन्ति। ततस्तृतीयं लक्षणं सामान्यतया विमृष्टम्।

प्रकरणमिदमाश्रित्य नैकानि क्रोडपत्राणि रचितानि। क्रोडपत्रकाराणामपि द्वितीय एव लक्षणे निर्भरो दृश्यते। अत एव केचन क्रोडपत्रकारा द्वितीयलक्षणमात्रमाश्रित्य क्रोडपत्राणि रचितवन्तः।

नव्यन्यायस्य परिष्कारपद्धतेः पराकाष्ठा क्रोडपत्रेषु साक्षात्कर्तुं शक्यते। विषयविशेषमाश्रित्य लम्बायमानाः परिष्काराः, तदुपरि सुदीर्घस्थलकल्पनपुरस्सरं दोषाविष्करणं तन्निवारणाय परिष्कारान्तरञ्चेत्येतत्सर्वं तत्त्वं क्रोडपत्राणाम्। भारतीयदर्शनस्य कृते नव्यनैयायिकानामनितरसाधारणं हीदं योगदानं क्रोडपत्राणि नाम। एतेषामध्ययनाध्यापनादिपरम्परा प्रायशो लुप्तैव। क्वचित् काश्यां दक्षिणभारते च क्वचित् क्वचित् मठादिषु मठपोष्यासु पाठशालासु चेदानीमपि यथाकथञ्चित् प्रचलदेतदध्ययनं परम्परया अस्या जीवितत्वं सूचयति। परन्तु एतत्तात्पर्यस्यावबोद्धारोऽवबोधयितारश्च दुर्लभा जाताः। अत एव पूर्वतः प्रकाशितान्यपि क्रोडपत्राणि क्वचित् पुस्तकालयेषु क्वचित् प्राचीनपण्डितानां गृहेषु स्थापितानि प्रायशो जीर्णतां प्राप्तानि क्रमशः प्राप्नुवन्ति च। ये केचनोत्साहशीला

१.सा.नि.सौ. पृ.सं. ९२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अध्येतारस्तान्यालोडयितुमिच्छन्ति ते दुर्लभत्वाद् ग्रन्थान् अपि प्राप्तुं न प्रभवन्ति। यथाकथञ्चित्प्राप्ता अपि ते ग्रन्था मुद्रणदोषभूयिष्ठाः सर्वथाऽसंशोधिताश्च वर्तन्ते। अतो हेतोस्तान् सम्यक् संशोध्य यथावसरं टिप्पण्यादिभिः सम्भूष्य क्रमेण प्रकाशयितुं निरचयिष्म।

तदस्मिन्नेव क्रमे सामान्यनिरुक्तेरयं क्रोडपत्रविशेषो **वादार्थो** नाम प्राकाश्यमानीयते। अयं हि इतः पूर्वं १८९७ वर्षे कलिकातानगरे सिद्धेश्वरयन्त्रे मुद्राप्य प्रकाशितोऽपि सर्वथा शीर्णपुटो निरुक्तसमस्याग्रस्तश्चास्माभिः क्वचिदाप्तः। अत्र सर्वा अपि कोटयो नूतना एवेति वक्तुं न शक्यते। कालीशाङ्कर्यादिषु क्रोडपत्रेषु विद्यमाना नैकाः कोटयो यथावद् आंशिकपरिवर्तनेन वा सहात्र प्राप्यन्ते। परन्तु कतिचन तादृशा अपि कोटयः सन्ति या अस्माभिर्दृष्टेषु क्रोडपत्रेषु क्वचिन्नोपलभ्यन्ते। अस्मात्कारणाद् अस्य विदुषां पुरस्तात् प्रकटनमावश्यकमुपयोगि च मन्यामहे।

पूर्वप्रकटितग्रन्थस्य पुष्पिकाया अवलोकनेनेदं स्पष्टं प्रतीयते यद् इमाः कोटयो **जीवानन्दविद्यासागर**नामकेन विदुषा सङ्कलिताः सन्ति। परमेतासां किंकर्तृकत्वमिति ज्ञातुं किमपि चिह्नं न प्राप्यते। अतोऽपि हेतोरस्य समीक्षकाणां पुरस्तात् प्रकटनमावश्यकमभूत्।

अत्र संशोधनक्रमेऽस्माभिः प्रदत्ताः चिह्नविशेषाः पाठकानां सौकर्याय प्रदर्श्यन्ते—

१. अधिकाक्षरयोजनाय [ ] एतच्चिह्नं प्रदर्श्य तत्र तदक्षरं सूचितम्। यथा 'अवच्छेदका[न]वच्छिन्न....।' अर्थात् अवच्छेदकावच्छिन्न....इत्यादिपाठो मुद्रितपुस्तके दृश्यते, किन्तु स न युक्तः, तत्स्थाने अवच्छेदकानवच्छिन्न.... इत्यादिपाठो युक्त इति।

२. परिवर्तनाय () एतच्चिह्नं प्रदर्श्य परिवर्तनीयांशः सूचितः। यथा 'साध्यव्यापक (व्याप्य)......'। अर्थाद् 'व्यापक' इत्यस्य स्थाने 'व्याप्य' इति पठनीयम्।

३. अनावश्यकत्वद्योतनाय (?) एतच्चिह्नं प्रदत्तम्। यथा 'अवच्छेदका-(न?) वच्छिन्न......'। अर्थाद् 'अवच्छेदकानवच्छिन्न' इति पाठो मुद्रितपुस्तके दृश्यते किन्तु तत्र नकारोऽनावश्यकः। 'अवच्छेदकावच्छिन्न' इति पाठ एव युक्त इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथापरिज्ञानं संशोधितेऽपि ग्रन्थेऽस्मिन् बहुत्र पङ्क्त्यर्थावगमेऽत्यन्तं काठिन्यमनुभूतम्। तेंऽशविशेषा विशेषज्ञैः समीकरिष्यन्त इति धिया तथैव संस्थापिताः। आशासे, कृपालवो विद्वांसस्तत्समीकरणं विधाय अनुग्रहीष्यन्तीति।

इत ऊर्ध्वमपि एतादृशानि क्रोडपत्राणि प्रकटयितुं प्रयासो विधास्यते। तदर्थं सुधीजनानां मार्गनिर्देशाः प्रार्थ्यन्ते।

ग्रन्थस्यास्य प्रतिलिपिकरणे संशोधनकर्मणि च मम साहाय्यं विहितवन्तौ न्यायशास्त्राध्येतारौ ममान्तेवासिनौ आयुष्मन्तौ **मनोजकुमारमिश्ररघुनाथमिश्रौ** अनेकैः शुभाशीर्वचोभिर्महयामि। भगवतः काशीविश्वनाथस्य परमानुग्रहेण तावुभावपि श्रेयःपरम्पराभिः समेधिषीयास्तामिति तमेव भवानीजानिं प्रार्थये।

अन्ते ग्रन्थरत्नमिदं सुधीवराणां करकमलेषूपायनीकुर्वन् एतस्य यशस्वितायै भगवतीं शारदाम्बां विनिवेदयामि।

इत्थं विद्वद्विधेयः

राजारामशुक्लः

निदेशकः

अनुसन्धान-संस्थानस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामान्यनिरुक्तिवादार्थः

प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितिनिष्ठकार्यतानिरूपकसम्बन्धिग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेतुविषयत्वमिति कल्पे पर्वतो वह्निमान् ह्रदश्च तथा इत्यादिसमूहालम्बनानुमितिमादाय पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकस्थले वह्न्यभाववद्ध्रदादावतिव्याप्तिरिति **भट्टाचार्येणो**क्तम् (पृ.सं.१५६)।[१]

तत्रेयमाशङ्का—ननु स्वावच्छेदकत्व-स्वनिरूपितकारणतावच्छेदकत्वान्यतरसम्बन्धेन प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितित्वावच्छिन्नकार्यत्वोपलक्षितं यद् विषयत्वं तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वनिवेशान्नैष दोष इति चेत्, न, परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वे पक्षादिविषयितायाः प्रयोजनविरहेण कायर्तावच्छेदककोटावनिवेशकल्पे बाधादेरसङ्ग्रहापत्तेः।

एतेन परामर्शजन्यतावच्छेदककोटिप्रविष्टविषयत्वावच्छिन्नत्वं प्रतिबध्यतायां निवेश्य पूर्वदोषवारणमिति परास्तं, यत्पक्षसाध्यकस्थले एकेनैव लिङ्गेनानुमितिः, तत्र परामर्शाव्यवहितोत्तरत्वस्यापि कार्यतावच्छेदककोटावनिवेशे व्यभिचारादावव्याप्तेश्च।

न च प्रकृतपक्षसाध्यकानुमितित्वव्यापकं यत्प्रतिबध्यत्वं यच्च प्रकृतपक्षसाध्यकप्रकृतलिङ्गकपरामर्शत्वव्यापकप्रतिबध्यत्वम्—एतदन्यतरनिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वनिवेशान्न कोऽपि दोष इति वाच्यं, व्यापकत्वादेर्द्विधा निवेशे गौरवादित्यालोच्य प्रकृतपक्षसाध्यकसाध्यव्याप्यप्रकारकसमूहालम्लबनानुमितित्वव्यापकत्वं प्रतिबध्यतायां निवेश्य कल्पान्तरमनुसृतं **दीधितिकृता**। न च तत्कल्पेऽपि वह्निव्याप्याभाववद्ध्रदादावतिव्याप्तिः, तस्य हेतुमत्त्वग्रहाविरोधितया स्वरूपासिद्ध्यनात्मकत्वादिति वाच्यं, तस्य व्याप्यत्वासिद्धित्वेन लक्ष्यतयाऽ(ताया अ) सिद्धि-ग्रन्थे **मथुरानाथेन** लिखितत्वात्। अत एव पक्षः साध्यवान् साध्यव्याप्यो हेतुर्हेतुमान् पक्ष इत्याकारकानुमितिः खण्डशो निवेशनीया, अतो न कोऽपि दोष इति [पक्षः] प्रायशोऽनुपादेयः, आचार्यमते तादृशानुमितेरप्रसिद्धेश्च।

---

१. अत्र ग्रन्थे सन्दर्भग्रन्थविवरणं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशितात् 'सामान्यनिरुक्तिसौगन्ध्यम्' इति ग्रन्थाद्गृहीतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ यत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारताकत्वम् अनुमितिप्रतिबन्धकतावच्छेदकं तत्सम्बन्धेन तद्वत्त्वस्य दुष्टत्वव्यवहारनियामकत्वोपगमे धूमत्ववान् पर्वतो वह्निमान् धूमादित्यादौ धूमादेर्दुष्टतानुपपत्त्या न तादृशशङ्कासम्भवः, स्वरूपसम्बन्धेन धूमत्वाभावादेर्धूमादावसत्त्वात्।

न च धूमत्वस्य पर्वतावृत्तित्वप्रकारकज्ञानस्य विरोधितया समवायसम्बन्धावच्छिन्नपर्वतवृत्तित्वादेरभावस्य स्वरूपसम्बन्धेन धूमे सत्त्वेन न दुष्टत्वानुपपत्तिरिति वाच्यं, तावतापि रूपत्ववान् पर्वतो वह्निमान् तद्रूपादित्यादावव्याप्तिः। यदि तत्र रूपत्वनिष्ठाधेयतायां पर्वतनिरूपितत्वाभावज्ञानस्यापि प्रतिबन्धकत्वात् तमादाय हेतोर्दुष्टत्वोपपत्तिः, तदा पर्वतनिरूपिताधेयत्वनिरूपिताधेयत्ववान् पर्वतो वह्निमान् पर्वतनिरूपिताधेयत्वादित्यादौ हेतोर्दुष्टत्वानुपपत्तिः, तत्र निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिताकतादृशपक्षतावच्छेदकाभावस्य पक्षतावच्छेदकनिष्ठनिरूपकत्वसम्बन्धावच्छिन्नपर्वतवृत्तित्वाभावस्य तादृशपक्षतावच्छेदकनिष्ठाधेयतायां पक्षनिरूपितत्वाभावस्य च प्रकृतहेतोरसत्त्वात्।

न च तत्रापि पक्षनिष्ठाधारतायां पक्षतावच्छेदकनिरूपितत्वाभावस्य तथात्वात् तद्वत्त्वस्य हेतौ सत्त्वात् नानुपपत्तिरिति वाच्यं, तावतापि पर्वततादृशाधेयत्वान्यतरस्य पक्षतावच्छेदकस्थले प्रकृतहेतौ तादृशान्यतरनिरूपितत्वाभावासत्त्वादनुपपत्तेरिति चेत्?, न, रूपत्वाभावव्याप्यः पर्वतवृत्तिरिति ज्ञानप्रकारतापन्नपर्वतवृत्तित्वमादाय तद्रूपस्य दुष्टत्वसम्भवात्। एवं तादृशाधेयत्वनिरूपिताधेयत्वाभावव्याप्यः पर्वतवृत्तिरिति ज्ञानप्रकारतापन्नपर्वतवृत्तित्वमादाय तत्र दुष्टत्वसम्भवात्।

न चैवं वह्न्यभावव्याप्यः पर्वतवृत्तिरिति पक्षविशेषणकज्ञानमादायापि सद्धेतोर्दुष्टत्वप्रसक्तिरिति वाच्यं, तावता बाधभ्रमस्थले पक्षविशेष्यकभ्रममादायैवातिव्याप्तिर्भवतीति **अणुरपि विशेषोऽध्यवसायकर** इति न्यायेन तथोक्तिसम्भवात्।

परे तु तादृशतादृशदुष्टस्थले पक्षतावच्छेदकविशिष्टे पक्षनिष्ठभेदप्रतियोगित्वबुद्धेरपि पक्षतावच्छेदकवत्ताग्रहविरोधितया तादृशप्रतियोगित्वमादाय दुष्टत्वसम्भवान्नानुपपत्तिरिति। परन्तु ईदृशरीत्या साध्यवान् पक्षनिष्ठभेदप्रतियोगीति भ्रममादाय पक्षविशेषणकज्ञानमादाय दोषसम्भवेऽपि अणुरपीत्यादिन्यायेन प्रसिद्धबाधस्थले न सम्भवतीति बोध्यम्।

केचित्तु सद्धेतुस्थले असद्धेतुमात्रे च साध्याभावत्वेन गगनाभावादेरपि भानसम्भवेनासद्धेतोर्गगनाभावरूपप्रकारवत्त्वमादाय दुष्टत्वसम्भवे ईदृशकुसृष्टिर्वृथेति पर्वतप्रकारकज्ञानमादाय स्वरूपसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन कस्यापि धूमेऽसत्त्वेन न पक्षविशेषणकभ्रममादाय दोषप्रसक्तिरिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टाचार्यानुयायिनस्तु पक्षविशेष्यकभ्रमविषये इत्यत्र एवकारः प्रामादिक एव। एवञ्च आदिपदग्राह्यपक्षविशेषणकभ्रमविषयोऽपि **दीधितिकार**सम्मतः। अत एव हेतुविशेष्यकव्यभिचारभ्रमविषयस्य सङ्ग्रहः। एवञ्च भ्रमपदमपि निश्चयसामान्यपरम्, आदिपदेनैव प्रमाविषयसाध्याभावस्य सङ्ग्रहादिति वदन्ति॥

[1]**स्वव्यधिकरण**प्रकारावच्छिन्ना या या विषयतेति **गादाधरी** (पृ.सं. १६१)। स्वावच्छिन्नाभाववद्वृत्तित्व-स्वनिरूपितत्वैतदुभयसम्बन्धेन प्रकारता-विशिष्टविषयत्वानिरूपकत्वमात्रनिवेशे विशिष्टसत्तावान् गुण इति ज्ञानस्यापि प्रमात्वापत्तिः। स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्व-स्वनिरूपितत्वैतदुभयसम्बन्धेन वैशिष्ट्यनिवेशे गुणो द्रव्यमित्याकारकस्वरूपतो द्रव्यत्वप्रकारकभ्रमस्य प्रमात्वापत्तिः। अतः स्वावच्छिन्नाभाववद्वृत्तित्वस्वनिरूपितत्वैतदुभयसम्बन्धावच्छिन्नस्वाश्रयत्व-स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्व-स्वनिरूपितत्वैतदुभयसम्बन्धावच्छिन्न-स्वाश्रयत्वैतदन्यतरसम्बन्धेन प्रकारताविशिष्टविषयत्वानिरूपकत्वस्य निवेशेऽपि विशिष्टसत्तावद् द्रव्यमितिज्ञानस्य विशिष्टसत्तात्वविशिष्टवैशिष्ट्यावगाहितया तादृशप्रकारतावच्छेदकविशिष्टनिरूपितसमवायस्य प्रकारत्वावच्छिन्नाप्रतियोगिकत्वेन तादृशसम्बन्धेन तादृशप्रकारत्वावच्छिन्नाभाववद्वृत्तित्व-स्वनिरूपकत्वैतदुभय-सम्बन्धेन प्रकारताविशिष्टविषयतावत्त्वात् प्रामाण्यानुपपत्तिः।

एवं घट इत्याकारकज्ञानधर्मिकविषयितया घटवानिति ज्ञानस्य प्रामाण्यानु-पपत्तिः, घट इति ज्ञाने घटत्वेनैव घटस्य सत्त्वात्, प्रकारत्वेन घटस्यासत्त्वात्। एवं प्रकार इत्याकारकप्रकारत्वेन घटत्वावगाहिज्ञानधर्मिकस्येदं ज्ञानं विषयितया घट इति ज्ञानस्यापि प्रमात्वापत्तिः, घट इति धर्मीभूतज्ञाने विषयितया प्रकारत्वावच्छिन्ना-भावासत्त्वादिति चेत्?, न, स्वावच्छेदकसम्बन्धावच्छिन्नस्वावछेदकावच्छिन्ना-भाववद्वृत्तित्व-स्वनिरूपितत्वैतदुभयसम्बन्धेन प्रकारताविशिष्टविषयत्वानिरूपकत्वे सति स्वावच्छिन्नाभाववद्वृत्तित्व-स्वनिरूपितत्वैंतदुभयसम्बन्धेन विषयित्वसम्बन्धा-नवच्छिन्ननिरवच्छिन्नप्रकारताविशिष्टविषयत्वानिरूपकत्वे सति स्वाश्रयनिष्ठनिरवच्छिन्न-स्वावच्छेदकसम्बन्धावच्छिन्ननिरूपकताकाधिकरणत्वाभाववन्निष्ठत्व-स्वनिरूपितत्वैत-दुभयसम्बन्धेन निरवच्छिन्नप्रकारताविशिष्टविषयत्वानिरूपकत्वमेव प्रमात्वमिति निष्कर्षः॥

यादृशविशिष्टविषयकत्वेनेत्यस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थः (पृ.सं. १६४)। अथात्र यद्रूपपदेन दोषतावच्छेदकमुपादेयम्। तच्च यदि वह्न्यभावह्रदत्वोभयरूपं तदा एकत्र द्वयमितिरीत्या ह्रदत्ववह्न्यभावोभयावगाहिज्ञाने

१.अयं विषयः पूर्वमुद्रितपुस्तके द्वितीयलक्षणव्याख्यानक्रमे निवेशितः।स च क्रमः प्रामादिकः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वह्न्यभावधर्मितावच्छेदकीभूतह्रदत्वावगाहिज्ञाने च यद्रूपावच्छिन्नविषयकत्वसत्त्वात्, तत्र च प्रकृतानुमितिप्रतिबन्धकत्वविरहादसम्भवः। यदि च सामानाधिकरण्यसम्बधेन वह्न्यभावविशिष्टह्रदत्वरूपं तत्, तथा हि ह्रदो वह्न्यभाववान् इति ज्ञाने विशिष्टानुयोगिकवैशिष्ट्यावगाहितया ह्रदत्वविशिष्टे वह्न्यभावभाने सामानाधिकरण्यसमबन्धेन ह्रदत्वांशेऽपि वह्न्यभावस्य भानमिति यद्रूपावच्छिन्नविषयकत्वं तत्राक्षतमिति ब्रूयात्, तदा सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्रदत्वावगाहिवह्न्यभाववत्त्वानितिज्ञाने यद्रूपावच्छिन्नविषयकत्वसत्त्वेन तत्र च प्रकृतानुमितिप्रतिबन्धकताविरहादसम्भव इति चेत्?

अत्र केचित्-ह्रदत्वावच्छिन्नानुयोगिताकत्वविशिष्टविशेषणताविशेषेण वह्न्यभावो ह्रदत्वं द्वयमेव यद्रूपपदेनोपादेयम्। तद्धर्मविशिष्टानुयोगिकवैशिष्ट्यबुद्धावेव तद्धर्मावच्छिन्नानुयोगिताकत्वं संसर्गांशे भासत इति नियमादिति न कोऽपि दोषः।

परे तु यद्रूपपदेन सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्रदत्वमेवोपादेयं, यद्रूपावच्छिन्नविषयकत्वञ्च यद्रूपनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकप्रकारतानिरूपितं यद् यद्रूपावच्छिन्नविषयत्वं तन्निरूपकत्वरूपमिह विवक्षितम्। वह्न्यभाववत्त्वानिति ज्ञानीयं यद्वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयत्वं तस्य न ह्रदत्वनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकप्रकारतानिरूपितत्वं, पारतन्त्रीयप्रकारतयोरेवावच्छेद्यावच्छेदकभावस्वीकारादिति तमादाय न दोषः। न चैवं वह्न्यभाववत्त्वान् प्रमेय इति ह्रदत्वविशिष्टानुयोगिकप्रमेयत्ववैशिष्ट्यावगाहिज्ञानीयं यद् वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयत्वं तस्य तादृशप्रकारतानिरूपितत्वसम्भव इति वाच्यम्, अव्यापकीभूतविषयिताशून्यत्वदलेनैव तज्ज्ञानवारणात्।

वस्तुतस्तु यद्रूपावच्छिन्नविषयकत्वपदेन यद्रूपावच्छिन्नपर्याप्तिकावच्छेदकताकविषयत्वं विवक्षणीयम्। यद्रूपपदेनेह ह्रदो वह्न्यभाववान् इति ज्ञानीयविषयितानिरूपकतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं वह्न्यभाववद्ध्रदत्वघटकवृत्तिसमुदायत्वमुपादेयम्। तद्रूपवत्त्वमित्यनेन च तद्रूपावच्छिन्नपर्याप्तिकावच्छेदकताकप्रतियोगितावच्छेदकवत्त्वमेव विवक्षणीयम्। वह्न्यभावधर्मितावच्छेदकह्रदत्वावगाहिज्ञाने तादृशसमुदायत्वावच्छिन्नपर्याप्तिकावच्छेदकविषयित्वं नास्ति। ह्रदो वह्न्यभाववानिति ज्ञानीयविषयितानिरूपकतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकवह्न्यभाववान् ह्रद इति ज्ञानीयविषयतानिरूपकतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकयोर्धीविशेषविषयत्वरूपयोर्वैलक्षण्यात्। जातिमान् वह्न्यभाववान् इति ज्ञानीयविषयतानिरूपकतावच्छेदकत्वस्य वह्न्यभाववद्ध्रदत्व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घटकेतरावृत्तित्वविशिष्टस्य पर्याप्त्यनुयोगितावच्छेदकं तादृशसमुदायत्वमेव नातोऽव्यापकीभूतविषयिताशून्य[त्व]दलवैयर्थ्यमिति सर्वं चतुरस्रम्।।

यादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टत्वमिति **भट्टाचार्येण** व्याख्यातम् (पृ.सं. १६५)। अत्रेयमनुपपत्तिः- यादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमित्यवृत्ति तादृशत्वमित्यस्यैव सम्यक्त्वेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वप्रवेशो व्यर्थ इति चेत्?, न, पर्वतस्तद्वह्न्यभाववान् वह्न्यभावव्याप्यादित्यत्र वह्निमत्पर्वतेऽतिव्याप्तिः, वह्निमत्पर्वतविषयकनिश्चयत्वस्य तादृशसमूहालम्बनात्मकानुमित्या सहाहार्यत्वेनैकज्ञानासम्भवात्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे वह्निमत्पर्वतविषयकनिश्चयत्वस्यानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वविरहान्नातिव्याप्तिरिति ध्येयम्।

अथ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वम् अनुमित्यवृत्ति तादृशविशिष्टद्वयाघटितत्वनिवेशेनैव सामञ्जस्ये कृतं गुरुतरनिवेशेनेति। न च वह्न्यभाववद्ध्रदत्वादिविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रत्वविशिष्टविषयकनिश्चयत्वस्य प्रकृतानुमित्यवृत्तितया बाधादसम्भव इति वाच्यं, ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतावच्छेदकविषयिताशून्यत्वनिवेशेनैवासम्भववारणसम्भवादिति। न च ह्रदो वह्निमान् वह्निव्याप्यधूमवान् जलवांश्चेति समूहालम्बनानुमित्युत्तरं जलवान् वह्न्यभाववान् इति ज्ञानोत्पत्तौ बाधकाभावेन ह्रदो वह्निमान् वह्निव्याप्यधूमवान् जलवान् वह्न्यभाववान् इत्यनन्तरञ्च जलवान् ह्रद इति ज्ञानोत्पत्तौ बाधकाभावेन च वह्न्यभाववद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिरिति वाच्यं, यादृशविशिष्टपदेन वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादिकमादाय तत्रातिव्याप्तिवारणसम्भवादिति चेत्? अत्राहुः—

ह्रदः प्रतियोगित्वाभावव्याप्यवज्जलकालीनवह्निमान् जलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्ये ह्रदो वह्निमान् जलादित्यत्र वह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्ये च यादृशविशिष्टपदेनासाधारण्यमादायाव्याप्तिः, अतोऽनुमित्यवृत्तित्वमुपेक्ष्यानतिरिक्तवृत्तित्वनिवेशः। अत एव निश्चयत्वविशिष्टनिश्चयत्वेऽनुमित्यवृत्तित्वनिवेशेनापि सामञ्जस्ये गुरुतरनिवेशो व्यर्थ इति परास्तं, यादृशाङ्कुरविशेषविषयकसाध्यकस्थलेऽसाधारण्यघटकपदार्थविषयकप्रकृतानुमितिर्न जाता तादृशस्थलीयासाधारण्येऽव्याप्तेश्च। अथ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वम् अनुमितिप्राक्क्षणज्ञानावृत्ति तादृशविशिष्टाघटितत्वमित्यस्य सम्यक्त्वेऽनतिरिक्तवृत्तित्वनिवेशो व्यर्थ इति चेत्?, ह्रदो वह्निमान् जलाद् इत्यादौ वह्निव्यापकीभूताभावप्रतियोगिजलरूपासाधारण्येऽव्याप्तिः, तादृशासाधारण्यविषयकज्ञानस्यानुमितिप्राक्क्षणे कारणविरहेणानुत्पत्त्या

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तादृशासाधारण्यविषयकनिश्चयत्वस्य तादृशानुमितिप्राक्क्षणावृत्तित्वादिति। एवं प्राक्क्षणघटितत्वेन तदपेक्षया लाघवानवकाशाच्च।

अथ विशिष्टान्तराघटितस्य स्वावच्छिन्नाविषयकप्रतीतिविषयतानिरूपकतावच्छेदकीभूतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकीभूतं यद्रूपं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वमित्यर्थकत्वं **भट्टाचार्येण**ोक्तम् (पृ.सं. १६९)। अत्रेयमनुपपत्तिः—स्वावच्छिन्नाविषयकप्रतीतिविषयतानिरूपकतावच्छेदकीभूतानुमित्यवृत्तिविषयतानिरूपकतावच्छेदकीभूतं यद्रूपं तदवच्छिन्नाघटितत्वनिवेशेनैव सामञ्जस्ये कृतं गुरुतरनिवेशेनेति चेत्?, न, पर्वतः कपिलवह्न्यभाववान् वह्न्यभावव्याप्यात् इत्यत्र कपिलवह्निमत्पर्वतरूपबाधेऽव्याप्तिः, स्वावच्छिन्नाविषयकप्रतीतिविषयितानिरूपकतावच्छेदकीभूतं यद् वह्निमत्पर्वतत्वं तदपि प्रकृतानुमित्यवृत्तिविषयितानिरूपकतावच्छेदकमिति तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य कपिलवह्निमत्पर्वतादावसत्त्वात्। अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वनिवेशे च वह्निमत्पर्वतत्वस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वविरहात् तज्ज्ञानस्य तादृशसमूहालम्बनानुमित्यप्रतिबन्धकत्वान्नातिव्याप्तिरिति ध्येयम्।

अथ स्वानवच्छिन्नप्रकारतावच्छेदकत्वरूपतदितरत्वनिवेशेनैव सामञ्जस्ये स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वपर्यन्तनिवेशनं **भट्टाचार्यस्य** सन्दर्भविरुद्धमिति चेत्?, न, यत्र स्थलविशेषे दोषविषयकज्ञानं नियताङ्कुरविषयकं सदैव जनितं न तु स्वातन्त्र्येण, अङ्कुरविशेषस्य च ज्ञानं दोषविषयकं सदैव जनितं न तु स्वातन्त्र्येण तत्र स्वानवच्छिन्नप्रकारतावच्छेदकं यदङ्कुरत्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकेऽभावात् तादृशदोषेऽव्याप्तिः, अतः स्वानवच्छिन्नप्रकारतावच्छेदकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकप्रतीतिविषयतानिरूपकतावच्छेदकत्वपर्यन्तानुधावनम्। **जगदीशेन** तादृशस्थलमस्वीकृत्य तादृशनिवेशनं कृतमिति सुधीभिर्भाव्यम्। इदन्तु चिन्त्यं, स्वानवच्छिन्नप्रकारतावच्छेदकं यत् तादृशं तदनवच्छिन्नप्रकारतावच्छेदकत्वस्य विशिष्टान्तराघटितत्वार्थकत्वे न दोष इति।

अत्र कश्चित्-व्यभिचारकालीनह्रदत्वविशिष्टेऽतिव्याप्तिः। वस्तुतस्तु स्वत्वस्याननुगतत्वेन स्वानवच्छिन्नप्रकारतेत्यत्र स्वावच्छिन्ना या या प्रकारता तत्तद्भेदकूटवत्प्रकारता इत्यर्थो वाच्यः। एवञ्च एकज्ञानीयनानाप्रकारताभेदनिवेशापेक्षया लाघवात् स्वावच्छिन्नविषयकज्ञानव्यक्तिभेदनिवेश इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथानुमितिप्रतिबन्धकतानवच्छेदकविषयताशून्यज्ञानवृत्तियद्रूपावच्छिन्नविषयताशालिनिश्चयत्वव्यापकमनुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वमित्युक्तावेव सामञ्जस्ये कृतं विशिष्टद्वयाघटितत्व-अव्यापकीभूतविषयिताशून्यत्वनिवेशेनेति। न चैवं वह्न्यभावाद्येकदेशेऽतिव्याप्तिः, वह्न्यभाववान् ह्रद इत्यादिज्ञानीयवह्न्यभावत्वावच्छिन्नविषयिताया एव तादृशप्रतिबन्धकतानवच्छेदकविषयिताशून्यज्ञानीयत्वेन तस्यास्तादृशप्रतिबन्धकतानतिरिक्तवृत्तित्वादिति वाच्यं, वह्न्यभावकालीनजलवान् वह्न्यभाववान् तादृशवह्न्यभाववांश्च ह्रद इत्यादिज्ञानस्याप्यनुमितिप्रतिबन्धकतया तादृशप्रतिबन्धकतानवच्छेदकविषयिताशून्यवह्न्यभावकालीनजलवान् वह्न्यभाववान् इत्यादिज्ञानम(नेऽ)पि वह्न्यभावत्वाद्यवच्छिन्नविषयितायाः सत्त्वेनानुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वादिति चेत्?, न, वह्न्यभाववज्जलवत्कालीनत्वाभाववद्ध्रदपक्षकवह्निसाध्यकस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादावतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वस्य, एकत्र द्वयमिति रीत्या वह्न्यभावधूमाभाववद्ध्रदादावतिव्याप्तिवारणाय विशिष्टान्तराघटितत्वस्य [च] सार्थक्यात्।

न च यत्किञ्चित्प्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वविवक्षणेनैवोक्तातिव्याप्तिद्वयस्य वारणं सम्भवतीति वाच्यम्, एवमपि ह्रदो वह्निमान् धूमाद् इत्यादौ वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादावतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वस्य मेयत्वविशिष्टवह्न्यभाववद्ध्रदादावतिव्याप्तिवारणाय च विशिष्टान्तराघटितत्वस्यावश्यकत्वात्, वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयितामात्रस्य मेयत्वविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितामात्रस्य च वह्न्यभाववज्जलवद्वृत्तिजलवान् धूमाभाववान् तादृशजलवांश्च ह्रदः, मेयत्वविशिष्टवह्न्यभाववान् धूमाभाववान् मेयत्वविशिष्टवह्न्यभाववांश्च ह्रद इत्यादिज्ञाननिष्ठं यदनुमितिप्रतिबन्धकत्वं तदनवच्छेदकविषयिताशून्यज्ञानीयत्वात्।

न च यत्प्रतिबन्धकतानतिरिक्तवृत्तित्वं तत्प्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वविवक्षणात् नोक्तदोष इति वाच्यं, तथा सति गोत्वाभावो गोत्वाभाववान् इत्यादौ बाधप्रतिबन्धकतामादाय बाधभ्रमविषये गोत्वाभावेऽतिव्याप्त्यापत्तेः। न च स्वानवच्छेदकविषयिताशून्यज्ञानीयविषयितावच्छेदकयद्रूपावच्छिन्नविषयित्वव्यापकं यत् स्वं तद्रूपवत्त्वमित्युक्तौ नोक्तदोषः, उक्तबाधप्रतिबन्धकतानवच्छेदकविषयितावच्छेदकं यद्गोत्वाभावत्वं तदवच्छिन्नविषयित्वाव्यापकत्वात् तत्प्रतिबन्धकत्वस्येति, स्वपदम् अनुमितिप्रतिबन्धकतापरमिति वाच्यम्, एवमपि ह्रदो वह्निमान् इत्यादौ एकत्र द्वयमिति रीत्या वह्न्यभाववह्न्यभाववद्ध्रदे बाधप्रतिबन्धकतामादायातिव्याप्त्यापत्तेरिति। अत एव स्वानवच्छेदकविषयताशून्यत्वरूपोभयसम्बन्धेन यद्रूपावच्छिन्नविषयताव्यापकमनुमितिप्रतिबन्धकत्वमित्युक्तावेव सामञ्जस्ये विशिष्टद्वया-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घटितत्वविशिष्टान्तराघटितत्वनिवेशो व्यर्थ इति परास्तम्। वस्तुतो निरवच्छिन्न-वह्न्यभाववद्ध्रदस्य दोषत्वेन तत्राव्याप्तेर्न तादृशः कोऽपि प्रकारः साधुरिति चिन्त्यम्।

अथ तादृशसमूहालम्बनानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वाव्यापकीभूतप्रतिबन्धकताशून्यज्ञानीययद्रूपावच्छिन्नविषयिताव्यापकमनुमिति-प्रतिन्धकत्वं तद्रूपवत्त्वमित्युक्तौ नोक्तदोषः। उक्तबाधप्रतिबन्धकतानवच्छेदकत्वस्यैव सम्यक्त्वे व्यर्थं (कृतं) विशिष्टिद्वयाघटितत्वविशिष्टान्तराघटितत्वविशेषणेनेति। न च सर्वस्या एव प्रतिबन्धकताया ज्ञानभेदेन भिन्नतया तादृशप्रतिबन्धकत्वाव्यापकत्वेन बाधप्रभृतावसम्भव इति वाच्यम्, अव्यापकप्रतिबन्धकतापदेन व्यापकत्वसम्बन्धेन तादृशप्रतिबन्धकताविशिष्टान्यप्रतिबन्धकत्वस्य विवक्षितत्वात्।

न चैवमपि वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादावतिव्याप्तिः, वह्न्यभाववज्जलवद्वृत्तिजलाभावात्मकविशेषापरबुद्धेः प्रतिबन्धकतायाः साध्यवत्ता-बुद्धिप्रतिबन्धकताव्यापकत्वेऽपि वह्न्यभाववज्जलवद्वृत्तिजलवान् धूमाभाववान् तादृशजलवांश्च ह्रद इत्याकारकज्ञानीयहेतुमत्ताबुद्धिप्रतिबन्धकताव्यापकत्वेन तादृशविशिष्टविषयकनिश्चयस्य तादृशाव्यापकप्रतिबन्धकताशून्यत्वादिति वाच्यं, व्यापकतासम्बन्धेन स्वविशिष्टान्यप्रतिबन्धकताशून्यज्ञानीययद्रूपावच्छिन्नविषयिता-व्यापकं स्वं तद्रूपावच्छिन्नत्वस्य विवक्षितत्वात्। अत्र स्वपदमनुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतापरं, तथा चोक्तविशिष्टविषयकनिश्चयस्य हेतुमत्ताज्ञानप्रतिबन्धकताविशिष्टान्यप्रतिबन्धकताशून्यत्वेऽपि तादृशप्रतिबन्धकताया उक्तस्वपदार्थाभिमतसाध्यवत्ताज्ञानप्रतिबन्धकत्वाव्यापकत्वान्नातिव्याप्तिः।

एतेन मेयत्ववाच्यत्वोभयवद्धूमाभाववद्वृत्तित्वाभावद्वह्निपक्षकधूमसाध्यक-वह्निहेतुकस्थले मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः, तादृशव्यभिचारनिश्चय-वृत्तिप्रतिबन्धकतामात्रस्यैवाश्रयासिद्धिप्रतिबन्धकताव्यापकत्वात्। एवं ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृत्तिमेयत्वविशिष्टजलाभावादित्यत्र वह्न्यभाववज्जला-दिमद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः, तादृशह्रदविषयकनिश्चयनिष्ठप्रतिबन्धकतामात्रस्यैव स्वरूपासिद्धिप्रतिबन्धकताव्यापकत्वात्। अतो नोक्तकल्पः साधीयानित्यपि परास्तम्।

न च धूमव्यभिचारिवह्निमदादावतिव्याप्तिः, तज्ज्ञानस्य निर्धर्मितावच्छेदकतया तत्र व्याप्तिज्ञानप्रतिबन्धकत्वाव्यापकप्रतिबन्धकताविरहादिति वाच्यं, तत्रापि वह्निरवृत्ति-रित्याकारकज्ञानप्रतिबन्धकतायास्तादृशप्रतिबन्धकत्वाव्यापिकायाः सत्त्वेनातिव्याप्ति-विरहादिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मैवं, द्रव्यं समवेतादित्यादौ द्रव्यत्वाभाववद्वृत्तिसमवेतवदादावतिव्याप्त्यापत्तेः, द्रव्यत्वाभाववद्वृत्तिसमवेतवदित्याद्याकारकज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वाव्यापकीभूतप्रतिबन्धकताशून्यत्वात् अवृत्तिसमृवेतमित्यादिज्ञानस्याप्याहार्यत्वेनाप्रतिबध्यत्वात्। न च द्रव्यत्वाभाववद्वृत्तिसमवेतवदिति ज्ञानं जायतामित्याकारकेच्छाप्रतिबन्धकतामादाय न तत्रातिव्याप्तिरिति वाच्यम्, इच्छात्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताया एव निवेशनीयत्वात्। अन्यथा बाधादिविषयकतत्तज्ज्ञानान्यज्ञानं जायताम् इत्याकारकेच्छाप्रतिबन्धकतामादायासम्भवापत्तेरिति ध्येयम्। निरवच्छिन्नवह्न्यभाववद्ध्रदस्य दोषत्वे तत्राव्याप्तेर्दुरुद्धरत्वापत्तेरिति तु नव्याः।

केचित्तु व्यापकसामानाधिकरण्यव्याप्तिघटितस्य सत्प्रतिपक्षत्वे तत्राव्याप्तिः, तज्ज्ञानस्य ज्ञानविशिष्टज्ञानेत्वेनैव प्रतिबन्धकतया तादृशप्रतिबन्धकत्वाव्यापकीभूतप्रतिहेतुव्यापकसाध्याभावसमानाधिरणहेत्वभावरूपविशेषाभाववत्ताज्ञानप्रतिबन्धकताशून्यत्वाभावादित्याहुः।

अथ यद्रूपावच्छिन्नविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशे अभावत्वेन ह्रदत्वावगाहिनः अभाववान् वह्न्यभाववान् इत्यादिज्ञानवारणमशक्यम्, अभावत्वावच्छिन्नविषयितात्वस्य वह्न्यभाववद्ध्रदविषयित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वाद् यद्रूपपदेनाभावत्वस्य धर्तुमशक्यत्वात्। वह्न्यभाववदभावत्वस्य धर्तुं शक्यत्वेऽपि तद्रूपावच्छिन्नविषयिताशून्यत्वस्य तादृशभ्रमे सत्त्वात्।

न च यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं निवेश्यं, तथा चाभावत्वावच्छिन्नविषयितानिरूपितवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वं तथेति तादृशविषयिताशून्यत्वं न तत्रास्तीति वाच्यम्, अभावत्वावच्छिन्नविषयितानिरूपितवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताया अपि वह्न्यभाववद्ध्रदत्वविशिष्टविषयित्वाव्यापकत्वाभावात्।

न च यद्रूपमात्रावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशावच्छेदकं तद्रूपमात्रावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं वक्तव्यम्। तथा चाभावत्वमात्रावच्छिन्नविषयितानिरूपितवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताया अव्यापकत्वात् तच्छून्यत्वाभावान्नासङ्गतिरिति वाच्यं, तथापि वह्न्यभावत्वेन ह्रदत्वावगाहिभ्रमवारणासम्भवात्। न च भ्रमान्यत्वं विशेषणं देयमिति वाच्यम्, एतत्कल्पे तस्यानुपादेयत्वात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च विशेष्यदले यद्रूपावच्छिन्नविषयित्वव्यापकमित्यत्र यद्रूपनिष्ठावच्छेदकत्वं यद्रूपावृत्तिधर्मानवच्छिन्नं ग्राह्यम्। तथा च तस्याव्यापकीभूतविषयिताशून्यत्वेऽपि तावतैव तद्वारणमिति वाच्यं, तथा सति प्रकारीभूतवह्नित्वस्याभावत्वेन ज्ञानवारणासम्भवात्। न च यादृशविषयितात्वं तादृशाभावप्रतियोगितावच्छेदकं तादृशविषयितात्वावच्छिन्नाभाववत्त्वं विशेषणं देयमिति वाच्यं, वह्नित्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितानिरूपितह्रदत्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितात्वादिरूपस्य तादृशविषयितात्वस्यापि तादृशविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावादिति चेत्?, न, तत्तज्ज्ञानान्यत्वेन स्वतन्त्रविशेषणस्यापि देयत्वात्। स्वाभाववन्निष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताकत्व-स्वाश्रयनिष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताकत्वोभयसम्बन्धेन यत्किञ्चिद्धर्मवज्ज्ञानान्यत्वं देयमिति कथञ्चिदनुगतोक्तिसम्भवाच्च।

स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्त्यवच्छेदकतानिरूपकताकविषयित्वसमानाधिकरणभेदप्रतियोगितावच्छेदकीभूतविषयिताशून्यज्ञानीयत्वसम्बन्धेन यद्रूपावच्छिन्नविषयिताविशिष्टं यत्किञ्चिद्विषयित्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपवत्त्वमिति पर्यवसितोऽर्थ इत्यपि केचित्।

वस्तुतः अथैवं जातिमान् वह्न्यभाववान् इत्यादिग्रन्थ एव आपाततः, विषयितासम्बन्धेन यादृशविशिष्टव्यापकं प्रतिबन्धकत्वं तादृशत्वमित्येव वक्तव्यम्। यत्र स्वरूपतोऽस्वरूपतो वा यादृशविशेषणघटितयादृशविशिष्टो दोषः, तत्र तादृशविशिष्टनिरूपितविषयिताया एव विशिष्टस्य संसर्गता स्वीक्रियते, न त्वन्यविधाया इति जातिमद्वह्न्यभाववद्ध्रदरूपविशिष्टनिरूपितविषयितायाः स्वरूपतो ह्रदत्वघटितविशिष्टसंसर्गताविरहेणासम्भवासम्भवात्। परन्तु यादृशत्वमनुगतमिति।

एतेनाभावत्वेन ह्रदत्वावगाहिज्ञानवारणाय यथार्थपदसार्थक्यसम्भवेन **दीधितिकृतां** यथार्थपदाघटितद्वितीयलक्षणाभासस्य विरोध इति परास्तम्। अत एव अनुमितिग्रन्थे परामर्शग्रन्थे च **भट्टाचार्येण** विशिष्टव्याप्तिप्रसिद्धस्थले खण्डशो विषयितामनुपादाय विषयितासम्बन्धेन विशिष्टविषयस्यैव ज्ञाने निवेशः कृतः।

अथ यद्रूपावच्छिन्नविषयितासामान्यमनुमितिप्रतिबन्धकतावच्छेदकमित्यत्र सामान्यपदं व्यर्थं, ह्रदो न वह्निमान् इत्यादिज्ञानीयह्रदत्वावच्छिन्नयत्किञ्चिद्विषयतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वेऽपि तज्ज्ञानस्य ह्रदत्वविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद् वह्न्यभावत्वावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वाभावादेव वारणसम्भवात्, ह्रद इत्यादिज्ञानीयविषयितायाश्च स्वरूपसम्बन्धरूपावच्छेदकत्वविरहात्। न चात्र कल्पे तादृश-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विशिष्टविषयित्वाव्यापकीभूतविषयिताशून्यत्वं न निवेशनीयं, वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयिताया अपि स्वरूपसम्बन्धरूपावच्छेदकत्वाज्जातिमान् वह्न्यभाववान् इत्यादिज्ञानकालीनस्य जातिमान् ह्रद इत्यादिज्ञानस्य ह्रदे वह्न्यनुमितिप्रतिबन्धकत्वादिति वाच्यं, तावताऽपि ह्रदत्वसामानाधिकरण्येन वह्न्यभावस्यादोषत्वापत्तेः, तत्र जातिसामानाधिकरण्येन वह्न्यभावविषयितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वविरहेण तादृशाव्यापकविषयिताशून्यत्वदलस्यावश्यकत्वात्।

न च संयोगः संयोगाभाववान् इत्यादौ संयोगः संयोगवान् इत्याकारकभ्रमात्मकबाधज्ञानविषये संयोगेऽतिव्याप्तिः, तत्र संयोगत्वावच्छिन्नविषयितात्वस्य संयोगत्वविशिष्टविषयितासमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावात् तादृशरूपावच्छिन्नविषयिताया भ्रमात्मकज्ञाने सत्त्वस्याकिञ्चित्करत्वादिति वाच्यं, संयोगावच्छिन्नविषयितात्वस्य तादृशतया तादृशविषयिताशून्यत्वस्य संयोगः संयोगवान् इति भ्रमेऽसत्त्वादिति चेत्?, न, गोत्वाभावो गोत्वाभाववान् इत्यादौ गोत्वाभावो गोत्ववान् इत्याकारकभ्रमात्मकबाधज्ञानविषये गोत्वाभावेऽतिव्याप्तेः, तत्र गोत्वाभावत्वविशिष्टविषयितासमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य गोत्वावच्छिन्नविषयित्वादावसत्त्वात्।

न च यत्संसर्गावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संसर्गावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वस्य ज्ञानविशेषणत्वेनैव तत्र नातिव्याप्तिः। तथा हि गोत्वाभावत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यत् समवायसम्बन्धावच्छिन्नगोत्वत्वावच्छिन्नविषयितात्वं तादृशविषयिताशून्यत्वस्य गोत्वाभावो गोत्ववान् इतिज्ञानेऽसत्त्वात् केवलगोत्वाभाव इति ज्ञाने तु प्रतियोगितासम्बन्धेनैव गोत्वस्य भानादिति वाच्यं, तथा सत्यपि गोत्ववत्समानकालीनगोत्वाभावपक्षकस्थलेऽतिव्याप्तिः, जातिमत्त्वावच्छिन्नविषयितायाः संसर्गानवच्छिन्नतया संसर्गावच्छिन्नत्वनिवेशे जातिमान् जातिमान् इत्यादिज्ञानवारणासम्भवाच्च।

न च यद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपितयद्रूपावच्छिन्नविषयित्वं विशिष्टविषयित्वाव्यापकं तद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशे नोक्तदोषः, समवायत्वाच्छिन्नसांसर्गिकविषयतानिरूपितगोत्ववत्समानकालीनगोत्वाभावत्वावच्छिन्नविषयताया विशिष्टविषयत्वाव्यापकतया तच्छून्यत्वस्य गोत्ववत्समानकालीनगोत्वाभावो गोत्ववान् इति बाधभ्रमेऽसत्त्वादिति वाच्यं, तावतापि गगनत्ववत्कालीनगगनत्वाभावो गगनत्वाभाववान् इत्यत्र गगनत्ववत्कालीनगगनत्वाभावो गगनत्ववान् इति बाधभ्रममादाय गगनत्ववत्कालीन-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गगनत्वाभावेऽतिव्याप्तेः, तत्र स्वरूपत्वावच्छिन्नसांसर्गिकविषयतानिरूपितगगनत्ववत्कालीनगगनत्वाभावत्वावच्छिन्नविषयताया विशिष्टविषयित्वाव्यापकत्वाभावात्।

न च यद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वं निवेशनीयं, तथा चोक्तबाधविषयकज्ञाने गगनत्ववत्कालीनगगनत्वाभावत्वावच्छिन्नविषयितानिरूपितगगनत्वत्वावच्छिन्नविषयितात्वस्य तादृशविशिष्टविषयितासमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन तादृशाव्यापकीभूतविषयिताशून्योक्तज्ञानीयविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावेनोक्तस्थले नातिव्याप्तिरिति वाच्यम्, एवमपि संयोगवत्संयोगवत्संयोगाभावस्य साध्यतायां संयोगवत्संयोगस्य पक्षतायां संयोगवत्संयोगः संयोगवत्संयोगवत्संयोगवान् इत्यादिबाधभ्रमविषयीभूतसंयोगवत्संयोगवत्संयोगवत्संयोगवत्संयोगरूपबाधैकदेशेऽतिव्याप्तेः, साध्यघटकप्रथमसंयोगस्य वैशिष्ट्यं संयोगसम्बन्धेन, द्वितीयस्य कालिकेन, पक्षघटकसंयोगस्य वैशिष्ट्यन्तु कालिकेन, साध्यघटकप्रतियोगित्वन्तु कालिकसम्बन्धावच्छिन्नं ग्राह्यम्।

न च यद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयत्वं विशिष्टविषयत्वाव्यापकं तद्रूपावच्छिन्नसांसर्गिकविषयतानिरूपित(तद्रूपावच्छिन्नसांसर्गिकविषयितानिरूपित?)तद्रूपावच्छिन्नविषयतात्वावच्छिन्ननिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशे नोक्तातिव्याप्तिः, उक्तस्थलीयबाधभ्रमे तादृशाव्यापकीभूतसंयोगत्वावच्छिन्नसांसर्गिकविषयितानिरूपितसंयोगत्वावच्छिन्नविषयतात्वावच्छिन्ननिरूपितसंयोगत्वावच्छिन्नविषयताशून्यत्वविरहादिति वाच्यं, गगनाभाववत्संयोगवत्संयोगपक्षके उक्तसाध्यकस्थले बाधभ्रममादाय संयोगवत्संयोगवद्गगनाभाववत्संयोगवत्संयोगेऽतिव्याप्तेः। अत्र साध्यघटकप्रथमसंयोगवैशिष्ट्यं स्वरूपसम्बन्धेन। द्वितीयादिवैशिष्ट्यन्तु पूर्ववत्। तथा च स्वरूपत्वावच्छिन्नसांसर्गिकविषयतानिरूपितसंयोगत्वावच्छिन्नविषयतात्वावच्छिन्ननिरूपितसंयोगत्वावच्छिन्नविषयित्वमपि न विशिष्टविषयित्वाव्यापकमिति।

तत्तदप्रामाण्यज्ञानाभावस्य तत्तदाहार्यभिन्नत्वस्य च तत्तद्व्यक्तित्वेन निवेशे गौरवमतोऽनुगतरूपेण निवेशः। अनुगतत्वञ्च स्वाभाववत्त्व-स्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयितावत्त्वोभयसम्बन्धेनाभावविशिष्टान्यत्वम्। अतो न संशयान्यत्वरूपनिश्चयत्ववैयर्थ्यम्। एवं विशिष्टद्वयाघटितत्वस्यापि [न] वैयर्थ्यम्, अनयोस्तु तादृशानुगमतात्पर्यग्राहकत्वात्। सम्बन्धव्यावृत्तिस्तु स्वयमूह्या।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वमित्यत्र विशिष्टद्वयविषयिताशून्यत्वनिवेशे ह्रदो वह्निमान् धूमादित्यादावेकत्र द्वयमितिरीत्या ह्रदवृतित्ववह्निव्यापकीभूताभावप्रतियोगित्वोभयवज्जलेऽतिव्याप्तिः, उभयविषयितानिरूपितजलत्वावच्छिन्नविषयिताया एकत्वेन तादृशविशिष्टद्वयविषयिताशून्यप्रतीतिविषयतावच्छेदकीभूतह्रदवृत्तित्ववह्निव्यापकीभूताभावप्रतियोगित्ववज्जलत्ववत्त्वात्। तादृशविशिष्टविषयिताशून्यत्वे सति तादृशविशिष्टविषयिताशून्यत्वनिवेशेऽप्यसाधारण्येऽव्याप्तिः, असाधारण्यस्यापि तादृशविशिष्टद्वयान्तर्गतत्वात्। अतो विशिष्टद्वयविषयिताशून्यत्वमपहाय तादृशविशिष्टविषयिताविशिष्टतादृशविशिष्टविषयिताशून्यत्वं निवेशनीयम्।

अथ ह्रदत्वादिविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वा[दि]विशिष्टविषयकनिश्चयत्वस्यानुमितिप्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वादसम्भवः। न च परस्परं यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वं निवेश्यमिति न दोष इति वाच्यं, वह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्यापि तादृशतया तादृशविशिष्टद्वयघटितत्वस्यापि बाधादौ सत्त्वादसम्भवादिति चेत्?, न, यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वस्य निवेशनीयत्वात्।

अथैवमपि वह्न्यभाववज्जलादिमद्वृत्तिजलाभाववद्ध्रदपक्षकस्थले तादृशजलवद्ध्रदात्मकाश्रयासिद्ध्यादावव्याप्तिः, तादृशविशिष्टद्वयघटितत्वात्। न चाश्रयासिद्धिविषयिताघटक[विषयिता]भिन्नत्वं तादृशविशिष्टद्वयविषयितायां निवेशनीयमिति वाच्यं, तथा सति तादृशरीत्या साध्याप्रसिद्ध्यादिविषयताघटकविषयताभिन्नत्वस्यापि निवेशनीयतया गौरवात्। गन्थकारस्य सत्प्रतिपक्षविषयिताघटकविषयिताभिन्नत्वमात्रनिवेशानौचित्यात्। न च यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबधकतानतिरिक्तवृत्ति तादृशविशिष्टाघटकत्वं तादृशविशिष्टद्वये निवेशनीयमतो न दोष इति वाच्यं, तथा सति तादृशपक्षकस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादावपि दोषतापत्तेः। न चेष्टापत्तिः, विशिष्टपक्षग्रहाविरोधितयाऽऽश्रयासिद्ध्यनात्मकत्वात्।

न च वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादिरूपविशिष्टद्वयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तिविषयताकविशिष्टाघटकत्वेन तादृशविशिष्टद्वयघटितत्वान्नोक्तातिव्याप्तिरिति वाच्यं, कालीनत्वादिघटितविशिष्टद्वयस्य धारणा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्भवस्योपरि वक्ष्यमाणत्वादिति चेत्?, न, यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टविषयिताघटक-विषयिताभिन्नत्वस्य निरुक्तविशिष्टद्वयविषयितायां निवेशनीयत्वात्। एवञ्च विशिष्टद्वयाघटितत्वशरीरेऽसम्भववारणाय प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्व-मपि न देयमिति वह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्य ज्ञानवैशिष्ट्यान-वच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तितया तादृशविशिष्टविषयिताघटकविषयिताभिन्नत्वस्य निरुक्तविशिष्टविषयितायामभावात्।

अथात्र ह्रदो वह्निमान् वह्निमज्जलवत्कालीनजलाभाववद्ध्रदादित्यादौ वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः, तत्र ज्ञानवैशिष्ट्यानवच्छिन्नं यद्धेतुग्रहप्रतिबन्धकत्वं तदवच्छेदकविषयिताभिन्नं यन्निरुक्तविशिष्टद्वयविषयित्वं तच्छून्यप्रतीतिविषयत्वस्य तादृशविशिष्टे सत्त्वात्। न चात्र तादृशविशिष्टान्तरं यज्जलवद्ध्रदादि तद्घटितत्वान्नातिव्याप्तिरिति वाच्यं, विशेषगुणवद्घटादिसङ्ग्रहायाग्रे वक्ष्यमाणस्य यत्किञ्चित्प्रतिबन्धकताघटितस्य विशिष्टान्तराघटितत्वस्य सत्त्वात्। ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय विशिष्टान्तराघटितत्वसम्भवात्।

मैवं, स्वव्यापकत्व-स्वव्यभिचारित्वैतदुभयसम्बन्धेन प्रतिबन्धकता-विशिष्टान्यज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टविषयकनिश्चय-विशिष्टयादृशविशिष्टविषयकनिश्चयत्वं तादृशविशिष्टद्वयाघटितत्वं निवेशनीयम्।

न च वह्न्यभाववज्जलादिमद्वृत्तिजलाभाववद्ध्रदपक्षकस्थले वह्न्यभाव-वज्जलवत्कालीनजलवद्ध्रदेऽतिव्याप्तिः, तादृशविशिष्टविषयकज्ञानीयप्रतिबन्धकता-द्वयस्यैवाश्रयासिद्धिप्रतिबन्धकताविशिष्टत्वादिति वाच्यं, स्वावच्छिन्नविषय-कत्वावच्छिन्नप्रतिबन्धकताविशिष्टान्यज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं तादृशवि-शिष्टद्वयविषयिताशून्यप्रतीतिविषयतावच्छेदकत्वेन लक्ष्यतावच्छेदकस्य विवक्षितत्वा-दिति।

अपरे तु स्वावच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकयादृशविशिष्टविषयक-निश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं स्वावच्छिन्नविषयकत्वावच्छिन्न-प्रतिबन्धकतासामान्यावच्छेदकं तादृशविशिष्टद्वयघटितत्वावच्छेदकं यत् तदन्यत्वं लक्ष्यतावच्छेदके विशेषणीयमिति।

केचित्तु स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यानतिरिक्तवृत्ति-विषयिताकान्यत्वेन यादृशविशिष्टं विशेषणीयं तादृशयादृशविशिष्टविषयकनिश्चय-विशिष्टयादृशविशिष्टविषयकनिश्चयत्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकता-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामान्यानतिरिक्तवृत्ति तादृशविशिष्टद्वयघटिततत्वावच्छेदकं यद् यत् स्वं तदन्यत्वेन दोषतावच्छेदकं विशेषणीयमतो नोक्तदोषः। तादृशनिश्चयविशिष्टनिश्चयत्वे स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यानतिरिक्तवृत्तित्वनिवेशान्न प्रागुक्ता- श्रयासिद्ध्यादावव्याप्तिः। निश्चयविशिष्टनिश्चयत्वनिवेशान्न विशिष्टद्वयघटितत्वा- वच्छेदकस्वपदार्थाप्रसिद्धिनिबन्धनो दोषः। निरुक्तस्वावच्छिन्नविषयितात्वावच्छिन्न- प्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयताकान्यत्वस्य यादृशविशिष्टद्वये प्रवेशान्ना- सम्भवः। अत्रोभयदले प्रतिबन्धकतासामान्यनिवेशाद् वह्निमज्जलवत्कालीनजला- भाववद्ध्रदपक्षकस्थले वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादौ नातिव्याप्तिरित्याहुः।

यत्तु ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकीभूतविषयिताशून्यज्ञानीय- विषयिताभिन्ना या तादृशविशिष्टद्वयविषयिता तच्छून्यप्रतीतिविषयतावच्छेदकत्वेन लक्ष्यतावच्छेदकं विशेषणीयमिति। वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदात्मकाश्रया- सिद्धिज्ञानीयविषयिताया ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वविरहेण तादृशप्रतिबन्धकतानवच्छेदकीभूतविषयिताशून्यज्ञानीयविषयिताभिन्ना या उदासीन- ज्ञानीयतादृशविशिष्टद्वयविषयिता तच्छून्यप्रतीतिविषयितावच्छेदकत्वस्याश्रयासिद्धि- त्वादौ सत्त्वेन तत्र नाव्याप्तिः। वह्निमज्जलवज्जलवत्कालीनजलाभाववद्ध्रद- पक्षकस्थले वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वस्य तादृशप्रतिबन्धकतान- वच्छेदकीभूतवृत्तित्वविषयिताशून्यजलवान् ह्रद इति ज्ञानीयविषयिताभिन्नवह्न्य- भाववज्जलवद्वृत्तिजलवान् ह्रद इति ज्ञानीयतादृशविशिष्टद्वयविषयिताशून्यप्रतीति- विषयतावच्छेदकत्वविरहेण वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादौ नातिव्याप्तिरिति, तन्न समीचीनं भाति, वह्न्यभाववज्जलवत्कालीनत्वाभाववज्जलकालीनजलाभाव- वद्ध्रदपक्षकवह्निसाध्यकस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदेऽतिव्याप्तिः, तज्ज्ञानीयविषयितायां प्रतिबन्धकतानवच्छेदकत्वाभावात्। उक्तरीत्यैव मेयत्वादि- विशिष्टव्यभिचारादिवारणसम्भवे वक्ष्यमाणविशिष्टान्तराघटितत्वविशेषणवैयर्थ्यापत्तेः।

अथ घटो गगनाभाववदभाववत्कालीनगगनवानित्यादौ गगनाभाववदभाव- वत्कालीनगगनाभावद्घटरूपबाधेऽव्याप्तिः, तादृशबाधज्ञानस्य गगनवत्ताबुद्धिं प्रति अभाववान् गगनाभाववान् अभाववांश्च घट इत्याकारकनिश्चयस्य निश्चयविशिष्टनिश्चयत्वेन प्रतिबन्धकत्वस्यावश्यं कल्पनीयतया गगनाभाववद- भाववत्कालीनगगनाभाववद्घटत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकतान्तरे मानाभावेन अभाववान् गगनाभाववान् इत्याकारकनिश्चयविशिष्टाभाववान् घट इत्याकारकनिश्चयत्वस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्ततया तादृश- विशिष्टद्वयविषयित्वस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकतया च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गगनाभाववदभाववत्कालीनगगनाभाववद्घटत्वस्य तादृशविशिष्टद्वयविषयिताशून्य-प्रतीतिविषयतावच्छेदकत्वाभावादिति।

न च वह्न्यभाववज्जलवद्वृत्तिजलाभाववद्ध्रदपक्षकस्थले वह्न्यभाव-वज्जलवद्वृत्तिजलवद्ध्रदात्मकप्रागुक्ताश्रयासिद्ध्यव्याप्तिवारणाय विशिष्टद्वया-घटितत्वघटकीभूतज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां स्वव्यापकत्व-स्वव्यभिचारि-त्वोभयसम्बन्धेन स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकताविशिष्टान्यत्वमनिवेश्य तादृशोभयसम्बन्धेन तादृशानुमितित्वव्यापकप्रतिबन्धकतानिरूपितस्वावच्छिन्न-विषयत्वावच्छिन्नप्रतिबध्यताविशिष्टान्यत्वमेव निवेश्यम्। तथा चोक्तस्थलीयबाध-निश्चयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकत्वान्तरासत्त्वेऽपि प्रकृतसाध्यवत्ता-निश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतासत्त्वेनोक्तबाधज्ञानीयवैशिष्ट्या-वच्छिन्नप्रतिबन्धकतायास्तादृशप्रतिबध्यताविशिष्टत्वान्नोक्तबाधादावव्याप्तिः। न चोक्तस्थले गगनाभाववदभाववत्कालीनघटाभाववद्घटादावतिव्याप्तिः, तज्ज्ञानीय-प्रतिबन्धकतायां तादृशप्रतिबध्यताविशिष्टान्यत्वाभावादिति वाच्यं, स्वावच्छिन्नविषय-कत्वावच्छिन्नतादृशानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यत्वाप्रसिद्ध्यैवो-क्तातिव्याप्त्यनवकाशादिति वाच्यं, ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृतिजला-भावव्याप्यादित्यत्र वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्त्यापत्तेः, तज्ज्ञानीय-ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां तादृशानुमितित्वव्यापकतादृशजलाभाव-व्याप्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपिता या स्वावच्छिन्नविषयित्वा-वच्छिन्नप्रतिबध्यता तद्विशिष्टत्वादिति चेत्?, न, प्रतिबध्यताविशिष्टान्यविशिष्टद्वय-विषयिताशून्यत्वस्य निवेशनीयत्वात्। प्रतिबध्यतावैशिष्ट्यञ्च स्वावच्छेदकत्व-स्वनिरूपितप्रतिबन्धकतानवच्छेदकविषयिताशून्यज्ञानीयतादृशानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन बोध्यम्। स्वनिरूपक-प्रतिबन्धकत्वञ्च स्वावच्छेदकीभूतधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता-वच्छेदकप्रकारतावच्छेदकीभूतधर्मावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकीभूतधर्मानवच्छिन्नत्वे सति ज्ञानवैशिष्ट्यानवच्छिन्नत्वेन विशेषणीयम्। अतो ह्रदपक्षकजलाभावव्याप्यसाध्यकस्थले जलाभावव्याप्याभाव-वज्जलवद्वृत्तिजलवद्ध्रदादौ नातिव्याप्तिः। न वा ह्रदपक्षकवह्निसाध्यकस्थले वह्निमान् जलाभाववान् वह्निमांश्च ह्रद इत्यादिज्ञानीयप्रतिबन्धकतामादाय वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादावतिव्याप्तिरिति। संसर्गघटकीभूतानुमितित्व-व्यापकप्रतिबध्यतायां स्वनिरूपितप्रतिबन्धकताशालिज्ञानीयत्वनिवेशे ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृत्तिजलाभावव्याप्यादित्यत्र वह्न्यभाववज्जलवद्वृत्ति-जलवद्ध्रदेऽतिव्याप्तिः, तज्ज्ञानीयविशिष्टद्वयविषयितायास्तादृशजलाभावव्याप्य-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वत्तानिश्चयप्रतिबध्यताविशिष्टत्वात्। अतः स्वनिरूपितप्रतिबन्धकतानवच्छेदक-विषयिताशून्यज्ञानीयत्वनिवेशः।

न चैवं वह्निमज्जलवद्वृत्तिजलाभाववद्ध्रदादिहेतुके वह्न्यभाववज्जल-वद्वृत्तिजलवद्ध्रदादावतिव्याप्तिः, तज्ज्ञानीयविशिष्टद्वयविषयिताया हेतुमत्ताग्रह-प्रतिबध्यताविशिष्टत्वादिति वाच्यम्, उभयसम्बन्धघटकस्वावच्छेदकत्वपदेन स्वान-वच्छेदकविषयिताशून्यज्ञानीयत्वस्य विवक्षणात्। एवञ्च जनकतावच्छेदकधर्मान-वच्छिन्नान्तं ज्ञानवैशिष्ट्यानवच्छिन्नत्वञ्चानुपादेयम्। अत एव स्वावच्छेदकत्व-सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्व—स्वरूपोभयसम्बन्धेन यद्रूपावच्छिन्न-विषयिताशालिनिश्चयत्वव्यापकं प्रतिबन्धकत्वं तद्रूपवत्त्वं लक्षणार्थः। तथा च वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदविषयकज्ञानस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया तादृशज्ञाने स्वावच्छेदकत्वसम्बन्धेन प्रतिबन्धकतायाः सत्त्वेन स्वावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वघटितोभयसम्बन्धेन तादृशविशिष्टविषयकत्वाव्यापकत्वात् तादृशविशिष्टेऽतिव्याप्तिविरहेण विशिष्टद्वया-घटितत्वनिवेशनमनतिप्रयोजनकमिति परास्तं, गगनाभाववदभाववत्कालीनगगना-भाववद्घटात्मकबाधेऽव्याप्तेरिति तादृशबाधविषयकनिश्चयस्य ज्ञानविशिष्ट-ज्ञानत्वेनैव प्रतिबन्धकतया तादृशप्रतिबन्धकत्वस्य निरुक्तोभयसम्बन्धेन तादृश-बाधविषयकनिश्चयत्वाव्यापकत्वात्।

अथाभावपक्षक-संयोगेन वह्निसाध्यकस्थले संयोगसम्बन्धावच्छिन्नप्रति-योगिताकवह्न्यभाववद्वह्निमदात्मकेऽतिव्याप्तिः। प्रतियोगितासम्बन्धेन वह्न्यवच्छेदेन वह्न्यभाववत्तानिश्चयकालेऽभावत्वावच्छिन्नविशेष्यकप्रतियोगित्वावच्छिन्नवह्नित्वा-वच्छिन्नप्रकारताशालिनिश्चयस्य नैयत्येन तादृशविशिष्टविषयकनिश्चयस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकत्वान्तरे मानाभावात्, तज्ज्ञानीयविषयितायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वविरहादिति।

न च प्रागुक्ताव्याप्तिभिया विशिष्टद्वयविषयितायां प्रतिबध्यताविशिष्टान्यत्वनिवेशेनैव वह्न्यभाववद्ध्रदादावव्याप्तिवारणसम्भवे विशिष्टद्वयाघटितत्वशरीरे ज्ञानवैशिष्ट्या-वच्छिन्नप्रतिबन्धकत्वप्रवेश एव नास्तीति वाच्यं, वह्न्यभावव्याप्यवद्ध्र-दादावव्याप्तिवारणाय तन्निवेशावश्यकत्वादिति चेत्?, न, तत्तत्प्रतिबन्धकताभिन्नत्वेन प्रतिबन्धकताया विशेषणादिति।

अत्र केचित्—विशिष्टद्वयविषयितायां प्रकृतानुमितिप्रतिबध्यतानवच्छेदकत्व-विशिष्टप्रकृतानुमितिविरोध्यनुमितिजनकतानवच्छेदकत्वं निवेशनीयम्। न चैवं ह्रदो वह्निमान् वह्निमज्जलवत्कालीनजलाभाववद्ध्रदादित्यादिस्थले वह्न्यभाववज्जल-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वद्वृत्तिजलवद्ध्रदादावतिव्याप्तिः, तादृशविशिष्टविषयितायां प्रकृतानुमितिप्रतिबध्यतानवच्छेदकत्वविशिष्टविरोध्यनुमितिजनकतानवच्छेदकत्वस्यासत्त्वादिति वाच्यं, यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितीययद्रूपावच्छिन्नविषयकत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नविषयकत्वावच्छिन्नप्रतिबध्यतानवच्छेदकत्वविशिष्टविरोध्यनुमितिजनकतानवच्छेदकत्वस्य निरुक्तविशिष्टविषयितायां विवक्षितत्वात्। एवञ्च बाधसत्प्रतिपक्षादिविषयितायां निरुक्तजनकतानवच्छेदकत्वाभावान्नासम्भवः। उक्तस्थलीयवह्न्यभाववद्वह्निमदात्मकविशिष्टविषयितायाञ्च तादृशजनकतानवच्छेदकत्वसत्त्वान्नातिव्याप्तिरित्याहुः।

वस्तुतस्त्वभावधर्मिताकवह्निप्रकारकबुद्धिं प्रति वह्निमान् वह्न्यभाववान् इतिज्ञानविशिष्टवह्निमांश्चाभाव इति ज्ञानमिव घटवान् वह्न्यभाववानिति निश्चयविशिष्टघटवांश्चाभाव इति नानाविधव्यावर्तकधर्मावच्छिन्नविशेष्यकतादृशावगाहिज्ञानानां प्रतिबन्धकत्वस्यावश्यकतया सर्वासामेवाभावधर्मिकतादृशावगाहिबुद्धीनां व्यावर्तकधर्ममनिवेश्य लाघवेन ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकत्वं कल्पनीयम्। तथा हि वह्न्याद्यभावत्वावच्छिन्नप्रकारताशालिनिश्चयविशिष्टाभावत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकत्वम्। तादृशनिश्चयवैशिष्ट्यञ्च स्वसामानाधिकरण्य-स्वनिरूपितविशेष्यताविशिष्टधर्मावच्छिन्नप्रकारताकत्वोभयसम्बन्धेन। विशेष्यतावैशिष्ट्यञ्च स्वावच्छेदकतावच्छेदकत्वसम्बन्धेन ग्राह्यम्। विशेष्यता च व्यापकप्रतियोगिताकत्वावच्छिन्नसांसर्गिकविषयितानिरूपितवह्न्यभावत्वावच्छिन्नप्रकारतानिरूपिता ग्राह्या। अतो न विशेष्यत्वान्तरमादाय कश्चिद् दोषमुपैतीति नव्या वदन्ति। एतन्मते प्रकृतस्थले नातिव्याप्तिः।

अत्रेदमवधेयम्—उक्तरीत्या नानाविधनिश्चयसाधारण्यानुरोधेन ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकताकल्पनेऽभावो गगनत्ववान् आधेयत्वादित्यत्र गगनत्वव्यापकीभूताभावप्रतियोग्याधेयत्वेऽव्याप्तिः, असाधारण्यशरीरे व्यापकताघटकतया पक्षांशे हेतुमत्त्वस्य निविष्टत्वेन विशिष्टद्वयघटितत्वादिति।

अथ यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टाघटितत्वमेव निवेश्यतां, किं विशिष्टद्वयाघटितत्वनिवेशनेति चेत्?,

अत्र केचित्—ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतालाभाय तादृशाभिधानम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परे तु यादृशविशिष्टपदेन वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादेरिव वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादेरप्युपादेयतया तादृशतादृशानन्तविशिष्टाघटितत्वमपेक्ष्य तद्घटकविशिष्टद्वयमुपादाय तादृशविशिष्टपदार्थवारणमेव सम्यगिति लाघवेन तथोक्तिः।

न च तादृशविशिष्टद्वयाघटितत्वकल्पे वह्न्यभाववज्जलादिमत्स्वरूपविशिष्टविषयकनिश्चयविशिष्टकालीनजलवद्ध्रदत्वविशिष्टविषयकनिश्चययत्वादेरपि तादृशप्रतिबन्धकतावच्छेदकतया तादृशविशिष्टद्वयाघटितत्वनिवेशाद् गौरवमिति वाच्यं, यादृशविशिष्टविषयकनिश्चयविशिष्टयादृविशिष्टविषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतायास्तद्घटकत्वात्, वह्न्यभाववज्जलवन्निश्चयविशिष्टकालीनत्वविशिष्टजलवद्ध्रदनिश्चयत्वेनाप्रतिबन्धकतया तादृशरूपस्योपादानासम्भवात्।

वस्तुतस्तु स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतानवच्छेदकीभूतविषयिताशून्यप्रतीतिविषयतानिरूपकताकत्वेन यादृशरूपद्वयं विशेषणीयम्।

न च यादृशविशिष्टविषयकनिश्चयवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्ववद् यद्रूपावच्छिन्नविषयितासामान्यं तादृशविशिष्टविषयिताविशिष्टतादृशविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वं तादृशानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपवत्त्वविवक्षणेनैवोपपत्तौ विशिष्टद्वयाघटित[त्व]शरीरेऽ[न]तिरिक्तवृत्तित्वविशेषणमपि व्यर्थमिति वाच्यं, पक्षवृत्ति जलमिति निश्चयविशिष्टवह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुनिश्चयत्वेन प्रतिबन्धकतया जलत्वविशिष्टविषयकनिश्चयविशिष्टवह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुरूपविशिष्टविषयितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वेन जलत्वविशिष्टजलरूपविशिष्टवह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुरूपविशिष्टद्वयघटितत्वेनासाधारण्याव्याप्तिवारणाय तस्य सार्थक्यात्।

अथ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चये प्रत्येकाव्यापकीभूतविषयिताशून्यत्वं निवेशनीयमिति। अन्यथाऽनतिरिक्तवृत्तित्वकल्पे जातित्वादिना जलत्वावगाहिज्ञानघटितनिश्चयत्वं न तादृशानुमितिप्रतिबन्धकतानतिरिक्तवृत्तीति विशिष्टद्वयाघटितत्वनिवेशनमकिञ्चित्करं स्यात्। तथा चासाधारण्ये नाव्याप्तिः। जलत्वविशिष्टविषयित्वाव्यापकीभूतविषयिताशून्यजलमिति निश्चयवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्यासाधारण्यविषयितायां विरहादिति किमनतिरिक्तवृत्तित्वनिवेशनम्। यदि च प्रथमविशिष्टनिश्चयेऽव्यापकीभूतविषयिताशून्यत्वं न प्रवेश्यम्। शुद्धजलत्वविशिष्टजलव्यापकताघटितसम्बन्धः शुद्धजलविशिष्टजलधर्मितावच्छेदकज्ञाने भासत इति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जातिमद्व्यापकताघटितसम्बन्धो न वह्न्यभाववज्जलवद्रूपविशिष्टघटक इति मन्यते तदाप्यसाधारण्येऽव्याप्तिवारणायैव तादृशाव्यापकीभूतविषयिताशून्यत्वं देयम्। तावताऽप्यप्रामाण्यज्ञानाभावाद्यनिवेशेनानत्तिरिक्तवृत्तित्वापेक्षया लाघवादिति चेत्?, एवमपि जलवत्समानकालीनः पर्वतः जलवत्समानकालीनपर्वतकालीनवह्निमान् जलादित्यादौ जलप्रकारकतादृशपक्षविशेष्यकनिश्चयविशिष्टजलवत्समानकालीन-पर्वतकालीनवह्निव्यापकीभूताभावप्रतियोगिहेतुनिश्चयत्वेन प्रतिबन्धकतया तत्रत्या-साधारण्ये जलवत्समानकालीनपर्वतकालीनव्यापकीभूताभावप्रतियोगिहेतुरूपेऽ-व्याप्तिः, तत्र तादृशपक्षरूपतादृशासाधारण्यरूपविशिष्टद्वयघटितत्वात्। अतोऽनतिरिक्तवृतित्वनिवेशनमिति।

न च प्रतिबन्धकीभूतहेतुमत्पक्षविषयकज्ञाने हेतुतावच्छेदकावच्छिन्न-विषयितानिरूपिततादृशपक्षविषयिताया अव्यापिकायाः शून्यत्वाभावाद् व्यावृत्त्यसङ्गतिरिति वाच्यं, यत्र स्वरूपसम्बन्धेन जलविशिष्टं यत् संयोगसम्बन्धेन जलवज्जलं तस्य पक्षत्वं स्वरूपवज्जलवज्जलवज्जलकालीनवह्नेः साध्यत्वं (सकलजलवत्त्वं संयोगसम्बन्धेन ग्राह्यम्।) स्वरूपवज्जलस्य हेतुत्वं तत्र तत्स्थलीयासाधारण्ये स्वरूपवज्जलवज्जलवज्जलकालीनवह्निव्यापकीभूताभाव-प्रतियोगिस्वरूपवज्जलेऽव्याप्तिरिति।

अथवा यत्र जलवज्जलवज्जलवज्जलवज्जलस्य पक्षत्वं स्वरूपवज्जल-वज्जलवज्जलवज्जलकालीनवह्नेसाध्यत्वम् (अत्र पक्षघटकप्रथमवैशिष्ट्यं स्वरूपेण, अन्यजलवैशिष्ट्यं तु संयोगेन, साध्यघटकसकलजलवत्त्वमेव संयोगेन), तत्र स्वरूपवज्जलवज्जलवज्जलवज्जलकालीनवह्निव्यापकीभूताभावप्रतियोगि-स्वरूपवज्जलात्मकविशिष्टस्वरूपवज्जलवज्जलवज्जलवज्जलरूपविशष्टघटितत्वेना-व्याप्तिः। अतोऽनतिरिक्तवृत्तित्वप्रवेशः।

अत्रेदं बोध्यं, यादृशविशिष्टविषयकनिश्चयविशिष्टस्वविषयिताशून्ययादृश-विशिष्टविषयकनिश्चयत्वम् अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्ट-द्वयाघटितत्वनिवेशेनैव ह्रदत्वविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्व-विषयकनिश्चयत्वमादाय नासम्भवः। एवञ्च मेयत्वविशिष्टवह्न्यभाववद्ध्रदत्व-विशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वमादाय मेयत्वविशिष्टवह्न्यभाववद्ध्रदेऽतिव्याप्तिवारणसम्भवे व्यर्थं स्वतन्त्रविशिष्टान्तरा-घटितत्वदलम्।

न च विशेषगुणवद्घटादिरूपाश्रयासिद्ध्यादावव्याप्तिः, विशेषगुणवद्घट-विषयिताशून्यगुणवद्घटविषयकनिश्चयस्यानुमितिप्रतिबन्धकतया विशिष्टद्वय-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घटितत्वादिति वाच्यम्, एतन्मतेऽपि तस्य तादृशविशिष्टान्तराघटितत्वरक्षणाय यत्किञ्चित्प्रतिबन्धकतामादाय लक्षणसमन्वय इव मन्मतेऽपि स्वविषयिताशून्य-यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं यत्प्रतिबन्धक-तानतिरिक्तवृत्ति तत्प्रतिबन्धकताभिन्नप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकता-वच्छेदकत्वस्य लक्ष्यतावच्छेदके विवक्षितत्वात्।

अत्र केचित्-यादृशविशिष्टविषयकनिश्चयविशिष्टस्वविषयिताशून्ययादृश-विशिष्टविषयकनिश्चयत्वम् अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तीति निवेशेऽपि मेयत्वविशिष्टव्यापकसामानाधिकरण्यघटितसत्प्रतिपक्षेऽतिव्याप्तिः, तद्घटकजल-व्यापकवह्न्यभावविषयिताया जदलवद्ध्रदविषयितायाश्च सत्प्रतिपक्षेऽव्याप्तिभयेन भेदस्यावश्यं निवेशनीयत्वात्। अतो विशिष्टान्तराघटित[त्व]दलस्य पृथङ्-निवेशस्यावश्यकत्वादित्याहुः।

नव्यास्तु वह्न्यभाववज्जलवद्वृत्तिजलाभाववान् ह्रदो वह्निमान् धूमादित्यादौ मेयत्वविशिष्टवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः, तादृशजलवद्ध्रदे-ऽव्याप्तिवारणाय प्रतिबन्धकताविशिष्टान्यप्रतिबन्धकतानतिरिक्तवृत्तित्वस्य निश्चयत्वे विवक्षणीयतया तादृशनिश्चयविशिष्टनिश्चयत्वस्य धर्तुमशक्यत्वादिति प्राहुः।

वस्तुतो गगनाभाववदभाववत्कालीनगगनाभाववद्घटाद्यात्मकबाधाव्याप्ति-प्रसङ्गात्, तादृशबाधनिश्चयस्य निरुक्तप्रतिबन्धकताभिन्नप्रतिबन्धकत्वासत्त्वादिति ध्येयम्।

अथ पक्षवृत्तित्वाघटितासाधारण्यानुरोधेन यादृशविशिष्टविषयकनिश्चयत्व-व्यापकः प्रकृतानुमित्यप्रतिबन्धकत्व—पक्षधर्मताज्ञानकालीनत्वोभयाभावः, तादृश-त्वस्य विवक्षितत्वे ह्रदो वह्निमान् जलादित्यादौ जलव्यापकवह्न्यभावेऽतिव्याप्तिः, तादृशविषयत्वव्यापकत्वस्यानुमित्यप्रतिबन्धकत्व—पक्षधर्मताज्ञानकालीनत्वो-भयाभावे सत्त्वादिति चेत्? न, एतन्मते वह्निव्यापकीभूताभावप्रतियोगिजलादेरिव जलव्यापकवह्न्यभावस्याप्यसाधारणताया **भट्टाचार्येण** सव्यभिचारे लिखितत्वात्।

अथैवं जलावच्छिन्नधर्मिकवह्निमत्ताबुद्धिं प्रति जलत्वावच्छिन्नधर्मिकवह्न्य-भावव्याप्यत्वज्ञानप्रतिबन्धकतायाः **परामर्शग्रन्थे** स्वयं **भट्टाचार्येण** व्यवस्थापितत्वात् जलवान् वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यत्वविशिष्टजलेऽतिव्याप्तिः, तस्य च पक्षावृत्तित्वेन सत्प्रतिपक्षत्वाभावादिति चेत्? न, पक्षसाध्यग्रहाविरोधित्वे सति विशिष्टपक्षे विशिष्टसाध्यग्रहविरोधित्वरूपबाधविभाजकस्य तत्र सत्त्वेन बाधमध्ये तस्यान्तर्भावात्। तदनन्तर्भावे तु तत्तत्प्रतिबन्धकताभेदस्य लक्षणे निवेशनीयत्वात्। एतेन वह्निमान् जलादित्यादौ वह्न्यभाववज्जलवदात्मकेऽतिव्याप्तिः, तद्विषयित्व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यापकत्वस्य प्रकृतानुमित्यप्रतिबन्धकत्व—पक्षधर्मिकहेतुमत्ताकालीनत्वाभावे सत्त्वादिति परास्तम्।

अथ ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वानवच्छिन्नत्वोभयाभाववदनुमितिप्रतिबन्धकतावच्छेदकं यद्रूपावच्छिन्नविषयित्वं तद्रूपावच्छिन्नो दोष इति सामञ्जस्ये किं विशिष्टद्वयाघटितत्वनिवेशेनेति?, तन्न साधु, तथा हि तत्र यद्यनुमितिप्रतिबन्धकतावच्छेदकत्वं स्वरूपसम्बन्धरूपं तदा हेतुमत्पक्षेऽतिव्याप्तिः, तादृशोभयाभाववदसाधारण्यज्ञानप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्य हेतुमत्पक्षविषयियतायाः सत्त्वात्। यदि चानतिरिक्तवृत्तित्वं निवेश्यते तदा जलं वह्निमत् जलादित्यादिस्थले तादात्म्येन हेतौ वह्न्यभाववह्निव्यापकीभूताभावप्रतियोगित्ववद्वृत्तितादृशप्रतियोगित्ववज्जलरूपासाधारण्यघटितेऽतिव्याप्तिरिति विशिष्टद्वयाघटितत्वनिवेशनमावश्यकम्।

एतेन पक्षधर्मिकहेतुमत्ताज्ञानभिन्नज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानिवेशनमपि न साधु, तत्रापि स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे हेतुमत्पक्षेऽतिव्याप्तिरिति। अनतिरिक्तवृत्तित्वनिवेशे वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तेः, जलहेतुकस्थले जलवद्ध्रदज्ञानविशिष्टवह्न्यभाववज्जलवद्विषयकनिश्चयत्वावच्छिन्नप्रतिबन्धकतायास्तादृशज्ञानभिन्नज्ञानवैशिष्ट्यानवच्छिन्नतया तदनतिरिक्तवृत्तित्वस्य तादृशविशिष्टविषयितायां सत्त्वात्।

यदपि ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वासाधारण्यविषयताभिन्नत्वोभयाभावद् यद्रूपावच्छिन्नविषयितासामान्यं प्रकृतानुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्ववत् तद्रूपवत्त्वं वक्तव्यम्। तथा च हेतुमत्पक्षे नातिव्याप्तिः, न वा पूर्वोक्तासाधारण्यघटिततादृशविशिष्टद्वयघटितेऽतिव्याप्तिः, तस्य विशिष्टान्तरेण तादृशेन तादृशाप्रतियोगित्ववज्जलरूपेण घटितत्वात्, तदपि न, वह्न्यभाववद्ध्रदादावव्याप्तेः, वह्न्यभाववद्ध्रदविषयिताया अभाववान् वह्न्यभाववान् अभाववांश्च ह्रद इति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतावच्छेदकत्वासाधारण्यविषयिताभिन्नत्वयोः सत्त्वात्।

यदि च ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपितत्वासाधारण्यविषयित्वावृत्तित्वोभयाभाववत्प्रतिबन्धकतावच्छेदकतावद् यद्रूपावच्छिन्नविषयितासामान्यं तद्रूपवत्त्वं वक्तव्यमित्युच्यते तदा जलहेतुपक्षकस्थले वह्निव्यापकीभूताभावप्रतियोगिजलवान् वह्न्यभाववान् जलवृत्ति तादृशजलमिति ज्ञाननिष्ठज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतानिरूपितत्वासाधारण्यविषयित्वावृत्तित्वोभयाभाववत्प्रतिबन्धकतावच्छेदकत्वस्य जलवृत्तितादृशजलविषयित्वे सत्त्वेन जलवृत्तिवह्न्यभाववद्वह्नि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यापकाभावप्रतियोगिजलवत्कालीनवह्निव्यापकीभूताभावप्रतियोगिजलेऽतिव्याप्तिः, तादृशविशिष्टान्तरेणाघटितत्वादसाधारण्यमात्रस्य तत्प्रतिबन्धकताघटिततादृशत्वाभावात्।

यदि चासाधारण्यविषयितेत्यत्रासाधारण्यप्रकारत्वातिरिक्तप्रकारत्वानिरूपितविषयिता, असाधारण्यविषयित्वाव्यापकविषयिताशून्यज्ञानीयविषयिता वा निवेश्यते तदा स्वरूपसम्बन्धरूपावच्छेदकत्वकल्पेऽपि सम्भवतीति, तदपि न सत्, वह्निमज्जलवत्कालीनजलाभाववद्ध्रदपक्षकवह्निसाध्यकस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदेऽतिव्याप्तेः, तादृशविशिष्टविषये ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकत्वादिति। वस्तुतः कपिसंयोगाभावद्वृक्षादावतिव्याप्तेः स्वरूपसम्बन्धरूपावच्छेदकत्वं न निवेशयितुं शक्यत इत्येव तत्त्वम्।

अथवा यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वम् अनुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकत्वे सति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकं तादृशविशिष्टद्वयाघटितत्वनिवेशेनैव सम्यक् अनतिरिक्तवृत्तित्वरूपावच्छेदकं व्यर्थमिति चेत्?, न, अनुमितिं प्रति चिकीर्षासामग्र्याः प्रतिबन्धकतया कृतिसाध्यपाकत्वविशिष्टविषयकनिश्चयविशिष्टेष्टसाधनीभूतपाकत्वविशिष्टविषयकनिश्चयत्वस्यानुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकतया ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकतया च तादृशविशिष्टविषयिताशून्यत्वनिवेशे महागौरवं तदपेक्षयाऽनतिरिक्तवृत्तित्वनिवेशे च कृतिसाध्यपाकत्वविशिष्टविषयकनिश्चयविशिष्टेष्टसाधनीभूतपाकत्वविशिष्टविषयकनिश्चयत्वस्यानुमित्सासमकालीनतादृशविशिष्टविषयकनिश्चयविशिष्टतादृशविशिष्टविषयकनिश्चये फलेच्छाद्यसमानकालीननिश्चये च वृत्तितया कृतिसाध्यव्यापकत्वविशिष्टविषयकनिश्चयविशिष्टेष्टसाधनीभूतपाकत्वविशिष्टविषयकनिश्चयत्वस्य नानुमितिप्रतिबन्धकताऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वम्। अत एव यादृशपदेन कृतिसाध्यपाकत्वविशिष्टविषयकनिश्चयविशिष्टेष्टसाधनीभूतपाकत्वविशिष्टविषयकनिश्चयत्वस्य धर्तुमशक्यत्वादिति तल्लाघवमिति कश्चित्॥

अथानुमितिप्रतिबन्धकतानवच्छेदकविषयिताशून्यज्ञानवृत्तियद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापकमनुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वमिति किं विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वनिवेशेनेति, [एवम्] (चेत्?,) अव्यापकीभूतविषयिताशून्यत्वमपि निष्फलमेव [इति चेत्?,] मैवं, वह्न्यभाववज्जलवत्कालीनत्वाभाववद्ध्रदपक्षकवह्निसाध्यकस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदादावतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वस्य, एकत्र द्वयमिति रीत्या वह्न्यभावधूमाभाववद्ध्रदादावतिव्याप्तिवारणाय विशिष्टान्तराघटितत्वस्य, एकदेश-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वारणायाव्यापकीभूतविषयिताशून्यत्वस्य च सार्थक्यात्। न च (अथ) यद्रूपावच्छिन्नविषयिताशालिनिश्चये तादृशयत्किञ्चित्प्रतिबन्धकतानवच्छेदक-विषयिताशून्यत्वनिवेशेनैवोक्तस्थले वह्न्यभाववज्जलवत्कालीनजलवद्ध्रदेऽति-व्याप्तिवारणं सम्भवति, एकदेशेऽतिव्याप्तिवारणाय वरमव्यापकीभूतविषयिता-शून्यत्वमपि निवेश्यम्, मैवम्, अव्यापकीभूतविषयिताशून्यत्वनिवेशेऽपि गोत्वाभावपक्षकगोत्वाभावसाध्यकस्थले गोत्वाभावत्वावच्छिन्नाव्यापकीभूतविषयता-शून्यगोत्वाभावो गोत्ववानित्यादिबाधभ्रमविषयीभूतगोत्वाभावेऽतिव्याप्त्यापत्तेरिति कृतं पल्लवितेन॥

प्रथमविशिष्टान्तराघटितत्वकल्पे स्वरूपसम्बन्धरूपावच्छेदकतानिवेशेऽसाधा-रण्यज्ञानीयप्रतिबन्धकतावच्छेदकविषयिताश्रयहेतुमत्पक्षघटितवह्न्यभाववज्जलवद्ध्रदा-त्मकबाधेऽव्याप्तिः। अतोऽनतिरक्तिवृत्तित्वनिवेशनम्। स्वावच्छिन्नाविषयकत्वमुपेक्ष्य स्वाश्रयाविषयकत्वनिवेशे मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिः मेयत्वविशिष्टव्य-भिचारत्वाश्रयाविषयकत्वस्य व्यभिचारत्वावच्छिन्नविषयकप्रतीतौ दुर्घटत्वादित्यनेन **भट्टाचार्येणा**भिहिता(पृ.सं. १६८), सा च न सङ्गच्छते, व्यभिचारत्वेन पटावगाहि-प्रतीतेरपि प्रमेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकतया तदीयविषयतावच्छेदकत्वस्य व्यभिचारत्वे सुघटत्वात् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य मेयत्व-विशिष्टव्यभिचारत्वेऽसम्भवाद् इति।

अत्र केचित्—असम्भवभयेन स्वाश्रयाविषयकप्रतीतिविषयवृत्तिधर्मावच्छिन्ना-विषयकप्रतीतिविषयतावच्छेदकत्वमेव निवेश्यम्। तन्निविशेनैवातिव्याप्तिसङ्गतिः।

परे तु व्यभिचारत्वेन पटाद्यवगाहिप्रतीतेरपि स्वाश्रयाविषयकत्वं दुर्घटम्। सामानाधिकरण्यसम्बन्धेन साध्याभाववद्वृत्तित्वविशिष्टहेतुतावच्छेदकस्यैव व्यभिचा-रत्वपदार्थतया सामानाधिकरण्यघटकतया च तादृशप्रतीतौ स्वाश्रयभानमप्यावश्यकम्। तथा च यथाश्रुतमेव सम्यक्। न च स्वाश्रयाविषयकत्वनिवेशे प्रमेयं गगनवदित्यादौ स्वश्रयाविषयकप्रतीत्यप्रसिद्ध्या गगनाभाववत्प्रमेयात्मकबाधादावव्याप्तिसम्भवेऽति-व्याप्तिदानमसङ्गतमिति वाच्यं, प्रमेयनिष्ठगगनाभावादेरेव तत्र दोषत्वात् स्वाश्रया-विषयकप्रतीतिविषयतावच्छेदकं यत् तादृशं तदवच्छिन्नघटितत्वावच्छेदकं यद् यत् स्वं तदन्यत्वरूपं प्रतियोगिनिष्ठत्वमन्तर्भाव्य विशिष्टान्तराघटितत्वं निवेश्याप्य-व्याप्तिवारणसम्भवाच्च। न चैवं स्वपदार्थाप्रसिद्धिः, मेयत्वविशिष्टव्यभिचारत्वादेरपि स्वपदेनोपादातुमशक्यत्वादिति वाच्यं, धूमव्यभिचारिवह्नित्वादेरेव स्वपदेन धर्तुं शक्यत्वादिति ध्येयम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद् अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयितावच्छेदकं तदाश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वनिवेशे प्रमेयं गगनवद् वाच्यत्वादित्यादौ व्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद् गगनाभाववत्प्रमेयत्वं तदाश्रयाविषयकप्रतीतेरसिद्धेरिति **भट्टाचार्येणा**भिहितम्। (पृ.सं. १६९)।

अत्रेयमनुपपत्तिः—सर्वत्रैव साध्याभावव्याप्यवत्पक्षतावच्छेदकादिकं साध्याभाववद्वृत्तित्वव्याप्यवद्धेतुतावच्छेदकञ्चादायासम्भव एव स्यात्।

अत्राहुः—घटो गगनवानित्यादौ गगनाभाववद्घटरूपबाधे लक्षणगमनान्नासम्भवः, तत्र साध्याभाववदवृत्तित्वरूपव्याप्तेः सत्प्रतिपक्षघटकत्वमते सत्प्रतिपक्षाभावात्, अवृत्ति गगनादिकमादाय दोषस्य तु तदाश्रयनिष्ठमुख्यविशेष्यताशून्यत्वनिवेशेनैव वारणसम्भवात्। न चैवं मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिः, तत्र तादृशविशिष्टान्तरं यद् व्यभिचारादिकं तन्निष्ठमुख्यविशेष्यताशून्यज्ञानीयमुख्यविशेष्यतावच्छेदकत्वस्य विवक्षितत्वादिति ध्येयम्। व्यापकसामानाधिकरण्यरूपव्याप्तिविशेषितधर्मवद्घटादिकमादाय दोषस्य ज्ञानवैशिष्ट्यावच्छिन्नत्वघटितोभयाभाववत्प्रतिबन्धकतानिवेशेनापि वारणात्। असिद्धिनिबन्धनाऽव्याप्तिर्वह्न्यभाववद्ध्रदादौ न सम्भवतीति वा तदुपेक्षितम्।।

यद्रूपावच्छिन्नविषयकत्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशरूपान्तराघटितत्वमिति कल्पे स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकरूपाप्रसिद्ध्यासम्भवं दत्त्वा **भट्टाचार्येण** दूषितम्। (पृ.सं. १७०) अत्रावच्छेदकत्वद्वयमनतिरिक्तवृत्तित्वरूपं ग्राह्यम्। अन्यथा प्रथमावच्छेदकत्वं यदि स्वरूपसम्बन्धरूपं तदा अभाववान् वह्न्यभाववान् अभाववांश्च ह्रद इत्यादिज्ञानीयप्रतिबन्धकताया अपि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गततया तादृशप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितावच्छेदकाप्रसिद्ध्याऽसम्भवापत्तेः। एवं वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यस्य स्वरूपसम्बन्धरूपावच्छेदकताश्रयविषयितावच्छेदकीभूतविशिष्टान्तरं यद्ध्रदत्वादिकं तद्घटितत्वादुक्तदोषतादवस्थ्यम्। अतो द्वितीयावच्छेदकत्वमप्यनतिरिक्तवृत्तित्वरूपम्।

न च स्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यस्य स्वरूपसम्बन्धरूपावच्छेदकतावद् यद्रूपावच्छिन्नविषयितासामान्यं तादृशविशिष्टान्तरविवक्षणे ह्रदत्वादिकमादाय न दोष इति वाच्यम्, एवमपि धूमव्यभिचारिवह्निमान् धूमवान्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वह्नेरित्यादौ धूमाभाववद्धूमव्यभिचारिवह्निमदात्मकबाधाव्याप्त्यापत्तेः, तादृशबाधविषयिताव्यापकप्रतिबन्धकतासामान्यस्य स्वरूपसम्बन्धरूपावच्छेदकतावद्विषयितासामान्यकरूपाप्रसिद्धेः। तादृशविषयितासामान्यकरूपाप्रसिद्ध्या ह्रदो वह्निमान् वह्न्यभावाभाववन्निरूपितत्वाभाववद्वृत्तित्वकालीनधूमादित्यादौ हेतुविशेषणासिद्धिघटितसत्प्रतिपक्षाव्याप्तिप्रसङ्गाच्च।

न च स्वावच्छिन्नविषयितानिष्ठस्वरूपसम्बन्धरूपावच्छेदकताकप्रतिबन्धकतासामान्यस्य स्वरूपसम्बन्धरूपावच्छेदकतावद्यद्रूपावच्छिन्नविषयितासामान्यं तादृशविशिष्टान्तराघटितत्वमित्युक्तौ नोक्तदोष इति वाच्यम्, एवमपि धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यत्र घटकालीनधूमव्यभिचारिवह्निमदात्मकेऽतिव्याप्तिः, घटकालीनधूमव्यभिचारिवह्निमान् धूमाभाववान् इति बाधज्ञानीयघटकालीनधूमव्यभिचारिवह्निमत्त्वावच्छिन्नविषयितानिष्ठावच्छेदकताकप्रतिबन्धकतासामान्यस्य स्वरूपसम्बन्धरूपावच्छेदकतावद्विषयितासामान्यकं विशिष्टान्तरं यद् धूमाभाववद्धूमव्यभिचारिवह्निमदादि तदघटितत्वस्य तत्र सत्त्वात्।

वस्तुतस्तु वह्न्यभाववद्ध्रदवान् धूमाभाववान् तादृशह्रदवांश्च ह्रद इत्यादिज्ञानीयप्रतिबन्धकताया अपि बाधविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यान्तर्गततया बाधविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितासामान्यकाप्रसिद्धिरेव स्यादिति ध्येयम्। यदि च स्वावच्छिन्नविषयित्वावच्छिन्नत्वमित्यत्रापि स्वावच्छिन्नविषयितासामान्यावच्छिन्नत्वनिवेशेनैवोक्तदोषाणां वारणसम्भवेऽनतिरिक्तवृत्तित्वप्रवेशो व्यर्थ इति मन्यते, तदा व्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्य सत्प्रतिपक्षत्वे तत्राव्याप्तिः। निरुक्तविशिष्टान्तरं यज्जलवद्ध्रदादि तद्घटितत्वादिति तद्वारणायानतिरिक्तवृत्तित्वनिवेश इति ध्येयम्।

अथ स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकत्वस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभयाभावकेवलान्वयिकं यत् स्वं तद्वत्त्वं हेत्वाभासत्वमित्युक्तावेतत्कल्पस्य निर्दोषत्वे कथं तत् परित्यक्तमिति। न च जातिमान् वह्न्यभाववान् इत्यादिज्ञानमादाय दोषवारणाय स्वावच्छिन्नविषयितायां स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितायाञ्च स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वनिवेशस्यावश्यकत्वे बाधविशिष्टव्यभिचारादावतिव्याप्तिः, तत्र बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयतादृशप्रतिबन्धकतासामान्यावच्छेदकविषयितावच्छेदकत्वघटितनिरुक्तोभयाभावस्य केवलान्वयित्वादिति वाच्यं, तादृशप्रतिबन्धकतासामान्यावच्छेदकविषयितायां स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वमनिवेश्य यद्रूपावच्छिन्नविषयित्वाव्यापकीभूतविषयिता-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शून्यज्ञानीयत्वनिवेशेनापि जातिमान् वह्न्यभाववान् इत्यादिज्ञानवारणसम्भवेन यद्रूपावच्छिन्नविषयत्वाव्यापकीभूतविषयिताशून्यज्ञानीययद्रूपावच्छिन्नविषयकत्वं तादृश-प्रतिबन्धकतासामान्यावच्छेदकं तत्त्व-स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेद-कत्वैतदुभयाभावस्य व्यभिचारविशिष्टबाधत्वादावसत्त्वात् केवलान्वयित्वविरहेण बाधविशिष्टव्यभिचारादावतिव्याप्त्यनवकाशादिति चेत्?, न, ह्रदे वह्न्यभावः वह्न्यभाववान् ह्रद इत्यादिज्ञानद्वयसाधारणैकरूपेण प्रतिबन्धकत्वमते तादृशो-भयाभावस्य ह्रदवृत्तिवह्न्यभावत्वादावसत्त्वेन केवलान्वयित्वाभावादसम्भवापत्तेः।

न च ज्ञानद्वयसाधारणैकप्रतिबन्धकत्वमताश्रयणे **भट्टाचार्योक्ते** यथाश्रुतकल्पे तादृशप्रतिबन्धकतासामान्यावच्छेदकस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य ह्रदवृत्तिवह्न्यभावत्वादावेव तादृशरूपस्य प्रसिद्धत्वादसम्भवदानासङ्गतिरिति वाच्यं, भट्टाचार्योक्तकल्पे तादृशप्रतिबन्धकतासामान्यावच्छेदकविषयितायां स्वावच्छिन्न-विषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वनिवेशस्यैवावश्यकत्वेन ह्रदवृत्ति-वह्न्यभावत्वादेस्तादृशविशिष्टान्तररूपत्वाभावात्। अन्यथा बाधविशिष्टव्य-भिचारादावतिव्याप्त्यापत्तेः, व्यभिचारविशिष्टबाधत्वादेरेव तादृशरूपत्वेन प्रसिद्धत्वात्। तदवच्छिन्नाघटितत्वस्य तत्र सत्त्वात्। अत एव भट्टाचार्योक्तकल्पे स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितावच्छेदकस्व-पर्याप्त्यवच्छेदकताकनिरूपकताकविषयिताशून्यप्रतीतिविषयतावच्छेदकस्य तादृश-विशिष्टान्तरपदेन विवक्षणे मेयत्वविशिष्टव्यभिचारत्वादेरेव तादृशत्वेन तदवच्छिन्नाघटितत्वस्य व्यभिचारादौ सत्त्वादसम्भवदानासङ्गतिरिति निरस्तं, स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितायामुक्तयुक्त्या स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वनिवेशस्यावश्कत्वेन मेयत्वविशिष्टव्यभिचारत्वादेरपि तादृशत्वाभावात्। एतेन स्वावच्छिन्नविषयित्वा-वच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितावच्छेदकस्वानवच्छिन्नप्रकारता-वच्छेदकस्य विशिष्टान्तरपदेन विवक्षणे वह्न्यभाववद्ध्रदत्वादेरेव तादृशत्वादसम्भव-दानमसङ्गतमित्यप्यपास्तम्।।

स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकता-वच्छेदकः कश्चित् स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवम्भूतं यत् स्वं मेयत्वविशिष्टव्यभिचारत्वादि तदवच्छिन्नाघटितत्वमित्यत्रापि (पृ.सं. १७०) प्रतिबन्धकतावच्छेदकत्वद्वयमेवानतिरिक्तवृत्तिरूपं ग्राह्यम्। अन्यथोभयत्र स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे ह्रदो वह्निमान् धूमाद् इत्यत्र मेयत्वविशिष्ट-वह्न्यभाववान् धूमाभाववान् तादृशवह्न्यभाववांश्च ह्रद इत्यादिज्ञानीय-प्रतिबन्धकताया अपि मेयत्वविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्न-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिबन्धकतासामान्यान्तर्गततया तादृशप्रतिबन्धकतासामान्यावच्छेदकत्वस्य शुद्धवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितायामसत्त्वात् स्वपदार्थाप्रसिद्धिः स्यादतः प्रथमावच्छेदकत्वमनतिरिक्तवृत्तिरूपम्।

एवञ्च यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगित्वसंसर्गावच्छिन्नप्रतियोगिताकवह्न्यभाववदभावस्य पक्षत्वं, संयोगेन वह्नेर्हेतुत्वं, धूमादेः साध्यत्वं तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धेन वह्निविशिष्टाभावरूपाश्रयासिद्धिघटितवह्न्यभाववदभावरूपस्वरूपासिद्धावव्याप्तिः, तद्घटकवह्निविशिष्टाभावस्य तादृशस्वरूपासिद्धिविषयिताव्यापकप्रतिबन्धकतासामान्यावच्छेदकीभूततादृशस्वरूपासिद्धिज्ञानीयविषयितावच्छेदकत्वेन तस्या अपि स्वपदेन धर्तुं शक्यत्वात्। तादृशप्रतिबन्धकतावच्छेदकविषयितासामान्यकत्वविवक्षणे च तत्रैव मेयत्वविशिष्टस्वरूपासिद्धावतिव्याप्तिः, मेयत्वविशिष्टतादृशासिद्धिविषयताव्यापकप्रतिबन्धकतासामान्यावच्छेदकविषयितासामान्यकस्याप्रसिद्ध्या स्वपदेन मेयत्वविशिष्टतादृशासिद्धेर्धर्तुं शक्यत्वात्।

अथवा घटत्वावच्छेदेनाभाववदन्यत्ववैशिष्ट्येन प्रतियोगितासम्बन्धेन वह्नीयवदन्यत्ववैशिष्ट्येन च घटितपक्षतावच्छेदककाभाववदन्यघटकालीनवह्नीयवदन्यत्वघटकालीनपर्वतो द्रव्यवान् इत्यादिस्थले आश्रयासिद्धिद्वयघटिते वह्न्यभाववद्घटेऽतिव्याप्तिः, तादृशविशिष्टविषयिताव्यापकप्रतिबन्धकतासामान्यावच्छेदकत्वस्य स्वभिन्नविशिष्टविषयितामात्र एवासत्त्वेन स्वपदेन तादृशविशिष्टस्य धर्तुमशक्यत्वात्। एवं यत्र पर्वतत्वसामानाधिकरण्येन नीलत्वस्य वह्नेश्च प्रत्येकं दोषत्वं तत्र वह्निमन्नीलपर्वतादावतिव्याप्तिः स्यात्। अतो द्वितीयावच्छेदकत्वमप्यनतिरक्तिवृतित्वरूपं वाच्यमिति।।

स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयित्वं यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् तद्रूपावच्छिन्नत्वमेव समुतिदार्थ इति (पृ.सं. १७०) कल्पे—न च वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतायां वह्नित्वावच्छिन्नानिरूपितत्वसत्त्वात् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य वह्न्यभाववद्ध्रदत्वे सत्त्वादसम्भव इति वाच्यं, तत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य विवक्षितत्वात्।

अथ स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकत्वमित्यत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपं ग्राह्यम्। प्रतिबन्धकतावच्छेदकमित्यत्रापि तथा। अन्यथा उभयदिशि स्वरूपसम्बन्धरूपावच्छेदकत्वे पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयत्व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विशिष्टपर्वतेऽतिव्याप्तिः। न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकत्वमित्यत्र स्वरूपसम्बन्धरूपं प्रतिबन्धकतावच्छेदकमित्यत्रानतिरिक्तवृत्तित्वमेव निवेश्यम्। तथा च पाषाणमयत्वावच्छिन्नपर्वतत्वावच्छिन्नविषयकस्वावच्छिन्नप्रतिबन्धकताया अनतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकरूपाप्रसिद्ध्या पाषाणमयत्ववत्पर्वते नातिव्याप्तिरिति वाच्यं, ह्रदो वह्निमान् धूमादित्यादौ जलवान् वह्न्यभाववान् जलवांश्च ह्रद इत्यादिज्ञानप्रतिबन्धकतावच्छेदकीभूतजलवद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयिताया जलवद्ध्रदत्वावच्छिन्नानिरूपितत्वासत्त्वेनोदासीनयादृशयादृशधर्मावच्छिन्नानिरूपितत्वं तत्रास्ति तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य जलवद्ध्रदत्वे सत्त्वात्।

एवमभाववान् वह्न्यभाववान् अभाववांश्च ह्रद इत्यादिज्ञानीयप्रतिबन्धकताया अपि तादृशप्रतिबन्धकतासामान्यान्तर्गतत्वेन तदनतिरिक्तवृत्तिविषयितावच्छेदकरूपाप्रसिद्ध्या वह्न्यभाववद्ध्रदादावव्याप्तिश्च। न चोक्तदोषभिया प्रथमावच्छेदकत्वमेवातिरिक्तवृत्तिरूपं विवक्षितं, द्वितीयन्तु स्वरूपसम्बन्धरूपमेवेति वाच्यं, धूमाभाववद्धूमव्यभिचारिवह्निमदादावव्याप्तेः, धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतासामान्यावच्छेदकं यद्रूपावच्छिन्नविषयितासामान्यं तद्रूपाप्रसिद्धेः।

अथ बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतं न बाधत्वादिप्रत्येकधर्मावच्छिन्नविषयित्वमपि तु बाधविशिष्टव्यभिचारविषयित्वम्। तन्न बाधविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितमिति बाधविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिरुक्ता तत् कथं सङ्गच्छते। तथा हि बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतं यत्किञ्चिद्विषयित्वं यद्व्यभिचारविशिष्टबाधत्वावच्छिन्नविषयित्वं तस्य बाधविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितत्वान्नातिव्याप्तिरिति।

न च ह्रदे वह्न्यभावः वह्न्यभाववान् ह्रद इत्यादिज्ञानसाधारणप्रतिबन्धकतया वह्न्यभावद्ध्रदादावसम्भवः, वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूताया ह्रदे वह्न्यभाव इति ज्ञानीयह्रदत्वविशिष्टवह्न्यभावत्वावच्छिन्नविषयिताया वह्न्यभाववद्ध्रदत्वावच्छिन्नानिरूपितत्वात्। अतस्तस्य वारणाय तादृशयत्किञ्चिद्विषयित्वे स्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यज्ञानवृत्तित्वं स्वावच्छिन्ननिरूपितविषयिताकविशिष्टनिरूपितं वा विशेषणं देयमिति बाधविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तितादवस्थ्यमिति वाच्यं,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कालिकादिसम्बन्धेन वह्न्यभाववत्ताज्ञानस्याप्रतिबन्धकतया स्वरूपसम्बन्धनिवेशस्यावश्यकतया स्वरूपसम्बन्धावच्छिन्नाधेयत्वोभयसम्बन्धमादायैकप्रतिबन्धकताया दुर्घटत्वात्।

न च सप्तम्युल्लेखिप्रतीतिस्थले स्वरूपसम्बन्धावच्छिन्नाधारतानिरूपिताधेयता भासते प्रथमान्तत्वस्थले स्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधारतेति ह्रदत्वावच्छिन्नविषयितानिरूपिताधेयत्वविषयतानिरूपितनिरूपितत्वविषयतानिरूपित(त्व?)-आधारतानिरूपितवह्न्यभावत्वावच्छिन्नविषयताकनिश्चयत्वेनैकरूपेण प्रतिबन्धकतयाऽसम्भवः, तद्वारणाय स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यत्वनिवेशनमावश्यकमित्यतिव्याप्तिसङ्गतिरिति वाच्यम्, अप्रामाण्यज्ञानाननुगमेन निश्चयत्वाननुगमेन चैकप्रतिबन्धकताया वक्तुमशक्यत्वात्। कथञ्चिदप्रामाण्यज्ञानाद्यनुगमे एतद्ग्रन्थस्यैकप्रतिबन्धक[त्व]परत्वे व्यभिचारघटितबाधसङ्ग्राहकयद्रूपावच्छिन्नविषयितात्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशरूपान्तराघटितत्वकल्पे ह्रदवृत्तिवह्न्यभावादेरेव तादृशरूपान्तराघटितत्वसम्भवेऽसम्भवानवकाशात् तद्ग्रन्थस्योन्मत्तप्रलपितत्वापत्तेः। यदि च बाधविशिष्टव्यभिचारादावतिप्रसङ्गवारणाय स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानवृत्तित्वं यद्रूपावच्छिन्नविषयितायां दीयताम्, एवञ्चासम्भवदानं सङ्गच्छत एवेत्युच्यते, तदा स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपितावच्छेदककः कश्चित् स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य, एवम्भूतं यद् यत् स्वं मेयत्वविशिष्टव्यभिचारत्वादि, तदवच्छिन्नाघटितत्वकल्पेऽसम्भवस्य प्रसक्तौ धूमव्यभिचारिवह्निमत्त्वमादायाव्याप्तिदानस्य सन्दर्भविरोधो वज्रायमाण एव, बाधविशष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिभिया स्वावच्छिन्नविषयिताव्यापकीभूतविषयिताशून्यत्वाप्रवेशात्।

यत्तु ह्रदे पक्षे महानसीयवह्न्यादेः साध्यत्वे महानसीयवह्न्यभाववद्ध्रदो वह्न्यभाववद्ध्रदश्च बाध इति तत्र महानसीयवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूताया वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताया महानसीयवह्न्यभाववद्ध्रदत्वावच्छिन्नानिरूपितत्वादिति तद्वारणाय तादृशाव्यापकविषयिताशून्यत्वनिवेशनमावश्यकमिति बाधविशिष्टव्यभिचारेऽतिव्याप्तिसङ्गतिरिति, तन्न, वह्निसामान्याभावबुद्धेर्वह्निबुद्धिं प्रति प्रतिबन्धकतायाः क्लृप्तत्वेन तत्साधारणैकप्रतिबन्धकतायां मानाभावात्।

न च साक्षात्परम्परासाधारणैकनिरूपितत्वस्य स्वयं दूषितत्वाद् बाधादावसम्भवाद् वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतवह्न्यभाववद्ध्रदवत्प्रमेयविषयितायां साक्षाद् वह्न्यभाववद्ध्रदादि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निरूपितत्वाभावादिति तादृशाव्यापकविषयिताशून्यज्ञानवृत्तित्वविशेषणं यत्किञ्चिद्विषयत्वे आवश्यकमित्यतो बाधविशिष्टव्यभिचारेऽतिव्याप्तिरिति वाच्यं, साक्षात्परम्परासाधारणैकनिरूपितत्वासम्भवेऽपि यादृशरूपावच्छिन्नघटितानिरूपितत्वस्यैव निवेशनीयतयाऽसम्भववारणस्यातिव्याप्तिवारणस्य च सम्भवात्।

यदपि ह्रदो वह्न्यभाववान् इति ज्ञानीयवह्न्यभावत्वावच्छिन्नविषयित्वे वह्न्यभाववद्ध्रदाद्यनिरूपितत्वेनासम्भव इति यद्रूपावच्छिन्नविषयितात्वावच्छिन्नं प्रति स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यस्य व्यापकत्वं वाच्यम्। तथा च जातिमान् वह्न्यभाववान् इति ज्ञानसाधारणवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वावच्छिन्नं प्रति स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यस्य व्यापकताभङ्गेन स्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यज्ञानवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वं वा वाच्यमिति बाधविशिष्टव्यभिचारेऽतिव्याप्तिरिति, तत्तुच्छम्।

यद्रूपावच्छिन्नविषयितासमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वमेव विशेषणं देयमिति, न तु दोषतावच्छेदकावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यत्वम्, अतिव्याप्तिवारणासम्भवबाधकविशेषणसत्त्वेऽतिव्याप्तिसम्पादकासम्भववारकविशेषणदानस्यानौचित्यात्। दोषतावच्छेदकावच्छिन्नविषयत्वाव्यापकविषयिताशून्यत्वनिवेशे वह्न्यभाववज्जातिमत्कालीनत्वविशिष्टवह्न्यभाववद्ध्रदेऽतिव्याप्तिश्च। वह्न्यभाववज्जातिमत्कालीनत्वविशिष्टवह्न्यभाववद्ध्रदत्वरूपदोषतावच्छेदकाभिमतस्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं न वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयितात्वं, किन्त्वन्यत्, तद्रूपावच्छिन्नविषयिताशून्यत्वं जातिमान् वह्न्यभाववान् इति ज्ञाने वर्तत इति वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वावच्छिन्नं प्रति दोषतावच्छेदकावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकताया अव्यापकत्वमिति। वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वं न किञ्चिद्विषयितान्तर्गतं किन्तु वह्न्यभाववज्जातिमत्कालीनवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयित्वमेव, तच्च तादृशधर्मावच्छिन्ननिरूपितमेवेति।

अथ बाधाभावविशिष्टबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतापि सामान्यान्तर्गतेति व्यभिचारविशिष्टबाधत्वावच्छिन्नविषयिता न तादृशप्रतिबन्धकतासामान्यावच्छेदिकेति नासङ्गतिरिति चेत्?, न, मेयत्वविशिष्टव्यभिचारादौ तादृशरीत्या शुद्धव्यभिचारत्वावच्छिन्नविषयित्वमपि न किञ्चिद्विषयितान्तर्गतमपि तु मेयत्वविशिष्टव्यभिचारादिकविषयित्वमित्यतिव्याप्तिभिया प्रकृतानुमितिप्रतिबन्धकत्वस्य निवेशनीयत्वात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च द्रव्यत्वं वह्निमद्द्रव्यत्वाभाववच्छैवालादित्यादिस्थलीयवह्न्यभाववद्द्रव्यत्वरूपबाधविशिष्टवह्न्यभाववद्वृत्तिशैवालरूपव्यभिचारेऽतिव्याप्तिः, तत्र व्यभिचारविशिष्टबाधविषयितायास्तादृशानुमितिप्रतिबन्धकतासामान्यावच्छेदकत्वाभावादिति वाच्यं, तत्र द्रव्यत्ववद्वह्न्यभाववद्वृत्तिशैवालविशिष्टवह्न्यभाववद्द्रव्यत्वविषयिताया अपि तादृशतया तत्र स्वावच्छिन्नानिरूपितत्वादतिव्याप्तिविरहादिति चेत्?, न, वह्न्यभाववज्जलाभाववद्वह्निव्यभिचारिजलं वह्निमज्जलादित्यादिस्थलीयवह्न्यभाववज्जलरूपबाधविशिष्टव्यभिचारे वह्न्यभाववद्वृत्तिजलरूपेऽतिव्याप्तिः, तत्रत्यव्यभिचारविशिष्टबाधविषयितायास्तादृशप्रतिबन्धकतासामान्यान्तर्गतपक्षतावच्छेदकविशिष्टपक्षग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वाभावात्। न च तत्र जलत्वविशिष्टे वह्नितदभावावगाहिज्ञानस्याहार्यत्वमिति वाच्यं, जलत्वसामानाधिकरण्येन वह्नितदभावयोर्ज्ञानात्। न च तादृशविशिष्टस्य पक्षग्रहविरोधितया लक्ष्यत्वमेवेति वाच्यं, जलत्वव्यापकत्वविशिष्टस्वरूपसम्बन्धेन वह्न्यभावविशिष्टजलरूपबाधविशिष्टव्यभिचारस्य स्वरूपसम्बन्धघटितवह्न्यभाववज्जलविशिष्टव्यभिचारात्मकाश्रयासिद्ध्यन्तर्गतत्वेनालक्ष्यत्वात्, न सोऽपि साधीयान् शुद्धस्वरूपसम्बन्धेन वह्न्यभाववज्जलविशिष्टं यद्वह्निव्यभिचारिजलं तद्विशिष्टजलत्वव्यापकत्वविशिष्टस्वरूपसम्बन्धेन बाधस्वरूपं तादृशविशिष्टविषयत्वमपि स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तत्र बाधविशिष्टव्यभिचारानिरूपितत्वेनातिव्याप्त्यभावात्।

स्वरूपसम्बन्धेन वह्न्यभाववज्जलाभावबुद्धिं प्रति स्वरूपसम्बन्धेन वह्न्यभावघटितवह्न्यभाववज्जलवत्ताज्ञानप्रतिबन्धकताया जलत्वव्यापकविशिष्टस्वरूपशुद्धस्वरूपसाधारणस्वरूपत्वेनैव निवेशात् प्रतिबन्धकताया ऐक्यात्, अन्यथा शैवालधर्मिकद्रव्यत्ववत्त्ववह्न्यभाववद्द्रव्यत्व(।?)ज्ञानयोरपि प्रतिबन्धकताद्वयापत्त्या पूर्वस्थलत्यागानौचित्यात्।

अत्र केचित्—प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धेतुमत्पक्षरूपस्य सत्प्रतिपक्ष[स्य]ाभिप्रायकमिदं, तादृशसत्प्रतिपक्षविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं प्रतिहेतुव्यापकसाध्याभावसमानकालीनतद्धेतुमत्पक्षविषयित्वमपि, तत्र स्वावच्छिन्ननिरूपितत्वाभावात् तादृशसत्प्रतिपक्षेऽव्याप्तिः। अथ वा प्रागुक्तगगनाभाववदभाववत्कालीनगगनाभाववद्घटात्मकबाधेऽव्याप्तिः, तादृशबाधविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकत्वस्य गगनाभाववदभाववद्वृत्तिगगनाभाववद्घटत्वावच्छिन्नविषयितायामपि सत्त्वेन तत्र स्वावच्छिन्ननिरूपितत्वात्। अतस्तद्वारणाय स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानवृत्तित्वस्यापि तादृशयत्किञ्चिद्विषयित्वे विवक्षणीयतया व्यभिचारविशिष्ट-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बाधत्वावच्छिन्नविषयिताया (धर्तुमशक्यत्वादतिव्याप्तिसङ्गतिवारणाय स्वावच्छिन्न-विषयित्वाव्यापकविषयिताशून्यत्वस्य यत्किञ्चिद्विषयित्वे विवक्षणीयतया व्यभिचार-विशिष्टबाधत्वावच्छिन्नविषयिताया?) धर्तुमशक्यत्वादतिव्याप्तिसङ्गतिः। अत एव वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणाय विशिष्टद्वयाघटित-[त्वनिवेश]ोऽपि सफलः। अन्यथा जलवद्ध्रदविशिष्टवह्न्यभाववज्जलत्वा-वच्छिन्नविषयितायास्तादृशतया तत्र स्वावच्छिन्नानिरूपितत्वात् तादृशविशेषण-मनर्थकम्। परन्तु साध्यवदवृत्तिमत्पक्षस्य सत्प्रतिपक्षतामत एतादृशी रीतिर्न सम्भवति, विशिष्टयाघटितत्वनिवेशोऽपि निष्फलः। बाधविशिष्टव्यभिचारादावति-व्याप्तिश्च न सन्दर्भविरुद्धेति ध्येयम्।

वस्तुतस्तु स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकत्वमित्यत्रावच्छेदकत्वं स्वरूपसम्बन्धरूपमनतिरिक्तवृतित्वञ्च, प्रतिबन्धकतावच्छेदकत्वमित्यत्र स्वरूप-सम्बन्धरूपमेव। प्रथमे स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशाद्धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ धूमाभाववद्धूमव्यभिचारिवह्निमदात्मकबाधे नाव्याप्तिः। अन्यथा तादृशविषयिताव्यापकप्रतिबन्धकतावच्छेकविषयित्वाप्रसिद्धेस्तत्राव्याप्तिः। एवञ्च बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकत्वं व्याप्तिज्ञान-प्रतिबन्धकत्वमात्रमेव न तु साध्यवत्ताज्ञानप्रतिबन्धकत्वमपि तादृशप्रतिबन्धकत्वे बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयितानिष्ठस्वरूपसम्बन्धरूपावच्छेदकता-निरूपकत्वाभावात्। तथा च बाधविशिष्टव्यभिचारत्वविशिष्टविषयित्वावच्छिन्न-व्याप्तिज्ञानप्रतिबन्धकतावच्छेदकीभूतबाधविशिष्टव्यभिचारत्वावच्छिन्नविषयिताया उदासीनघटत्वावच्छिन्नानिरूपितत्वेन तादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयिता-वच्छेदकत्वस्य बाधविशिष्टव्यभिचारत्वे सत्त्वेनातिव्याप्तिसङ्गतिरिति।

न च तादृशधूमाभाववद्ध्रदविशिष्टधूमव्यभिचारिवह्नित्वावच्छिन्नविषयित्वा-वच्छिन्नव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकव्यभिचारत्वावच्छिन्नविषयिताया बाधत्वावच्छिन्नानिरूपितत्वेन तादृशबाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेद-कत्वस्य बाधविशिष्टव्यभिचारत्वेऽसत्त्वात् तत्र नातिव्याप्तिरिति वाच्यं, वह्निर्धूमवान् वह्नेरित्यादौ एकत्र द्वयमिति रीत्या धूमाभावधूमाभाववद्वृत्तित्ववद्वह्नित्वविशिष्ट-बाधात्मकव्यभिचारेऽतिव्याप्तेर्ग्रन्थकर्तुरभिप्रेतत्वादिति दिक्।

एतेनोभयत्रैव स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽपि ज्ञानवैशिष्ट्या-वच्छिन्नत्वासाधारण्यविषयित्वानवच्छिन्नत्वोभयाभाववत् स्वावच्छिन्नविषयिकत्वा-वच्छिन्नप्रतिबन्धकतासामान्यविवक्षयैव ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय जलवद्ध्रदादौ प्रागुक्तदोषस्य वारणसम्भवे एतत्कल्पस्य निदोर्षत्वमिति प्रलपितम-पास्तम्। न च प्रथमावच्छेदकत्वं स्वरूपसम्बन्धरूपं द्वितीयन्त्वनतिरिक्तवृत्तित्वरूपं,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतामादाय वह्न्यभाववद्ध्रदादावतिव्याप्तिस्तु प्रतिबन्धकतायां निरुक्तोभयाभावत्वविवक्षयैव वारणीया। तथा च वह्निर्धूमवान् वह्नेरित्यादौ धूमाभावधूमाभाववद्वृत्तित्ववद्वह्नित्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिधूमाभाववद्वह्निकालीनधूमाभाववद्वृत्तिवह्निमत्त्वाच्छिन्नविषयितायां स्वावच्छिन्नानिरूपितत्वसत्त्वादुक्तातिव्याप्त्यनवकाशेनैव तत्कल्पस्य निर्दोषत्वमिति वाच्यं, तथा सति वह्निव्यापकीभूताभावप्रतियोगित्वाभाववज्जलं वह्निमज्जलादित्यादौ वह्निव्यापकीभूताभावप्रतियोगित्ववज्जलाभाववत्तादृशप्रतियोगित्ववज्जलमित्यादिज्ञानीयप्रतिबन्धकताया निरुक्तोभयाभाववत्त्वेन सामान्यान्तर्गततया तादृशप्रतिबन्धकतासामान्यानतिरिक्तवृत्तिविषयितावच्छेदकाप्रसिद्ध्या वह्निव्यापकीभूताभावप्रतियोगिजलरूपाश्रयासिद्धावव्याप्त्यापत्तिरिति ध्येयम्।

अथ यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वमित्यत्र शेषांशे निश्चयत्वस्य संशयान्यज्ञानत्वरूपस्य विवक्षणीयतया तादृशविशिष्टविषयकस्यापि तादात्म्यसम्बन्धेन वैशिष्ट्याभिधानादेवोपपत्तौ प्रथमनिश्चयत्वांशप्रवेशनमनतिप्रयोजनकमिति चेत्?, न, तादात्म्येन वह्न्यभाववज्जलवद्विषयकनिश्चयविशिष्टस्य वह्न्यभाववज्जलवन्मात्रविषयकनिश्चयस्य तादृशोभयविषयकस्याप्रसिद्धतया तदुभयविषयकज्ञानस्य तादृशप्रत्येकविशिष्टविषयकत्वाव्यापृकीभूतविषयिताशून्यत्वविरहाद् यादृशविशिष्टपदेन वह्न्यभाववज्जलवद्रूपविशिष्टस्य जलवद्ध्रदरूपविशिष्टस्य च धर्तुमशक्यत्वेन वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्त्यापत्तेः, तादृशविषयित्वाव्यापकीभूतद्वयाप्रसिद्ध्याऽसम्भवापत्तेर्वा।

न च यादृशविशिष्टपदेन वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदरूपविशिष्ट एव धर्तव्यः। तथा च तादृशविशिष्टविषयित्वाव्यापकीभूतविषयिताशून्यवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रद इत्याकारकनिश्चयत्वस्य प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तितया नातिव्याप्तिरसम्भवो वेति वाच्यं, यादृशविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तीत्यस्यैव सम्यक्त्वे वैशिष्ट्यप्रवेशस्य वैयर्थ्यापत्त्या किं तदंशे निश्चयत्वव्यावृत्त्यनुसरणेन, वृत्तित्वादिघटितविशिष्टवारणासम्भवस्य प्रागुक्तत्वाच्च।

न च यादृशविशिष्टविषयित्वाव्यापिका सती यादृशविशिष्टविषयित्वाव्यापिका या विषयिता यादृशविशिष्टविषयित्वविशिष्टयादृशविषयित्वाव्यापिका वा या विषयिता तच्छून्यत्वनिवेशान्न पूर्वोक्तदोषाणामवकाश इति वाच्यं, ह्रदपक्षकजातिमज्जलवत्कालीनवह्निसाध्यकानुमितौ जातिमज्जलवत्कालीनवह्न्यभाववज्जलवद्वृत्ति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जलवद्ध्रदेऽतिव्याप्त्यापत्तेः, जातिमज्जलवत्कालीनवह्न्यभाववज्जलवद्रूपविशिष्ट-विषयित्वाव्यापकत्वस्य जातिमज्जलवत्त्वाच्छिन्नविषयितायामभावात्। निरुक्ता-व्यापकीभूतविषयिताशून्यजलवान् जलवत्कालीनवह्न्यभाववान् जातिमांश्च जलवान् इति निश्चयेऽपि जातिमज्जलवत्कालीनवह्न्यभाववज्जलवद्रूपविशिष्टविषयक-निश्चयविशिष्टजल[वद्]ह्रदरूपविशिष्टविषयकनिश्चयत्वस्य सत्त्वेन प्रकृतानुमिति-प्रतिबन्धकतानतिरिक्तवृत्तित्वविरहाद् यादृशविशिष्टपदेन निरुक्तविशिष्टद्वयस्य धर्तुमशक्यत्वात्।

एतेन स्वावच्छिन्नविषयकत्वावच्छिन्नयत्प्रतिबन्धकतावच्छेदकीभूतविषयिता-कविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकत्वमिति समुदितार्थः। स्वावच्छिन्नविषयकत्वव्यापकयत्किञ्चित्प्रतिबन्धकत्वं यद्रूपावच्छिन्नविषयकत्वव्यापकं तद्रूपावच्छिन्नविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकत्वमिति निष्कृष्टार्थः। न चात्र स्वावच्छिन्नविषयकत्वावच्छिन्नत्वस्य यत्किञ्चित्प्रतिबन्धकतायां निवेशनं व्यर्थमिति वाच्यं, ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ध्रदरूपबाधघटकीभूते शुद्धह्रदेऽ-तिव्याप्त्यापत्तेः, वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयत्वस्य ह्रदनिरूपितत्वेन तादृशविषयितात्वव्यापकत्वस्य शुद्धह्रदनिरूपितत्वे सत्त्वादिति।

न च स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानवृत्तित्वविशिष्ट-यद्रूपावच्छिन्नविषयिताव्यापकं यत्किञ्चित्प्रतिबन्धकत्वं तद्रूपावच्छिन्नविषयितात्व-व्यापकस्वावच्छिन्ननिरूप्यताकत्वमिति निष्कृष्टार्थमेव वक्तव्यं किं स्वावच्छिन्न-विषयकत्वव्यापकत्वनिवेशेनेति वाच्यं, वह्न्यभाववज्जातिमद्ध्रदेऽतिव्याप्त्यापत्तेः, वह्न्यभाववज्जातिमद्ध्रदत्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानवृत्ति-यद्रूपावच्छिन्नविषयितापदेन वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताया धर्तुमशक्यत्वेन यद्रूपपदेन वह्न्यभाववज्जातिमद्ध्रदत्वावच्छिन्नविषयिताया धर्तव्यतया वह्न्यभाव-वज्जातिमद्ध्रदत्वावच्छिन्नविषयितात्वव्यापकत्वस्य तादृशनिरूपितत्वे सत्त्वादिति। न च यद्रूपावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यत्वमपि निवेशनीयं तावतापि व्यापकतानिवेशापेक्षया लाघवमिति वाच्यं, वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे-तिव्याप्त्यापत्तेः। न च तत्रातिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वमेव निवेशनीय-मिति वाच्यं, व्यापकत्वमपेक्ष्य तादृशनिवेशस्यैव गुरुत्वात्।।

न च स्वावच्छिन्नविषयकत्वं यद्रूपावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकं तादृशरूपान्तराघटितत्वस्य स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्या-वच्छेदकीभूतविषयितानिरूपकतावच्छेदकं सत् स्वावच्छिन्नविषयिताशून्यप्रतीति-विषयतानिरूपकतावच्छेदकं यद्रूपं तादृशरूपान्तराघटितत्वमिति निष्कृष्टार्थत्वे-ऽसम्भवमुक्तं (इत्युक्तं) **भट्टाचार्येण** (पृ.सं. १७०), तन्न सङ्गच्छते, तथा हि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकत्वस्वावच्छिन्नविषयिताशून्यप्रतीतिविषयतानिरूपकतावच्छेदकत्वैतदुभयाभावकेवलान्वयिकत्वात् स्वं तदवच्छिन्नत्वनिवेशेनैव सामञ्जस्यादिति चेत्? न, ह्रदे वह्न्यभावः वह्न्यभाववान् ह्रद इति ज्ञानद्वयसाधारणैकरूपेण प्रतिबन्धकत्वमते तादृशोभयाभावस्य केवलान्वयित्वाभावात्। न च ज्ञानद्वयसाधारणैकप्रतिबन्धकत्वमतेऽत्र कल्पेऽसम्भव एव नास्ति स्वावच्छिन्नविषयिकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतविषयतानिरूपकतावच्छेदकं यत् ह्रदवृत्तिवह्न्यभावत्वं तस्यापि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशून्यप्रतीतिविषयतानिरूपकतावच्छेदकत्वादिति वाच्यं, बाधविशिष्टव्याभिचारेऽतिव्याप्तिवारणायाव्यापकीभूतविषयिताशून्यज्ञानवृत्तित्वस्य विषयितायां निवेशनीयत्वादिति। तथा च बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकं यद् बाधविशिष्टव्यभिचारत्वं तस्य बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयिताशून्यप्रतीतिविषयितानिरूपकतावच्छेदकत्वाभावेन तादृशरूपाप्रसिद्ध्यैव नातिव्याप्तिः। एवमसम्भवदानं सङ्गतमिति।

स्वसजातीयविशिष्टान्तराघटितत्वकल्पे विशेष्यदले विरोधिविषयताप्रयुक्तत्वदलवैयर्थ्यमुक्तं **भट्टाचार्येण** (पृ.सं. १७२), तन्न सङ्गच्छते, घटादेरपि स्वपदेन धर्त्तुं शक्यत्वात्। तथा हि यद्विषयकनिश्चयोत्तरानुमितिसामान्ये प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावस्तत्त्वं बाधत्वम्। एवं रीत्या व्यभिचारत्वादिकं निर्वाच्यम्। तथा च निर्वह्निः पर्वतो वह्निमान् इत्यादौ घटविषयकनिश्चयोत्तरानुमितौ पक्षविषयितानिरूपितसाध्यवैशिष्ट्यावगाहित्वाभावादिति घटादिवारणाय तद्दलसार्थक्यमिति। न च वह्निमत्पर्वतरूपतादृशस्थलीयाश्रयासिद्ध्यसङ्ग्रहः, तादृशबाधत्वाश्रयवह्न्यादिघटितत्वादिति वाच्यम्, असिद्धित्वमादाय लक्षणसमन्वयात्। स्ववृत्तिहेत्वाभासविभाजकीभूतयत्किञ्चिद्धर्मवद्विशिष्टान्तराघटितत्वस्यैव विवक्षितत्वात्। अन्यथा विशेषगुणवद्घटादेरसङ्ग्रहापत्तेः, गुणवद्घटादेराश्रयासिद्धित्वादिना साजात्यविरहेऽपि बाधत्वादिना तत्सत्त्वात्। यत्किञ्चित्त्वनिवेशे चाश्रयासिद्धित्वमादायैव तत्र लक्षणसमन्वयः।

अथ वह्न्यभाववान् ह्रदो वह्निमान् इत्यादौ वह्न्यभाववद्ध्रदरूपबाधेऽव्याप्तिः, तादृशवह्न्यभावादिघटितत्वात्। तद्वारणाय यद्विषयकनिश्चयोत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्तः प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावस्तत्त्वं बाधत्वमित्यादिरीत्या हेत्वाभासविभाजको निर्वाच्यः। तथा च घटादिवारणाय विरोधिविषयताप्रयुक्त[त्व]दलवैयर्थ्यमिति चेत्?, न, तथा सति विशेष्यदलवैयर्थ्यप्रसङ्गेन विरोधिविषयताप्रयुक्त[त्व]दलवैयर्थ्यनिर्वचनानौचित्यात्। न

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च सिद्धिविषयवारणाय विशेष्यदलसार्थक्यं साजात्यघटितविषयितायां विरोधित्वं न देयं, यथा सन्निवेशे वैयर्थ्याभावादिति वाच्यं, तथा सति विशेष्यदले विरोधिविषयताप्रयुक्तत्वदलवैयर्थ्याभावेनासङ्गत्यापत्तेरिति दिक्।

केचित्त्वेवं रीत्या बाधत्वादिनिर्वचने स्ववृत्तिहेत्वाभासविभाजकस्यान्यत्रासत्त्वादसम्भवापत्तेः, तादृशस्य प्रतिव्यक्तिभिन्नत्वात्। परन्तु यद्धर्मावच्छिन्नविषयताप्रयुक्तोभयाभावप्रयोजकयत्किञ्चिदभावाधिकरणतायां ज्ञानवैशिष्ट्याप्रयोज्यत्वे सति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्धर्मावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वं तद्धर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतद्धर्मवत्त्वमिति स्वसजातीयविशिष्टान्तराघटितदलनिष्कर्षः। तथा च वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताप्रयोज्यं यत् सत्प्रतिपक्षह्रदवृत्तिवह्न्यभावनिश्चयोत्तरानुमितिसामान्यनिष्ठसाध्यवैशिष्ट्याभावाधिकरणत्वं तद् ह्रदवृत्तिवह्न्यभावसत्प्रतिपक्षविषयिताप्रयोज्यमपीति सत्प्रतिपक्षादिकमेव विशिष्टान्तरं तदघटितत्वञ्च वह्न्यभाववद्ध्रदत्वावच्छिन्नेऽस्तीति तत्र लक्षणसमन्वयः। ज्ञानवैशिष्ट्याप्रयोज्यत्वञ्चाभाववान् वह्न्यभाववान् अभाववांश्च ह्रद इति निश्चयीयाभाववद्ध्रदत्वावच्छिन्नविषयिताप्रयुक्तत्वमादाय दोषवारणायैकदेशविषयितामादायासम्भववारणाय व्यापकत्वपर्यन्तानुसरणम्। विशेषगुणवद्घटादिसङ्ग्रहाय यत्किञ्चित्त्वनिवेशः। तथा चैकदेशेऽतिव्याप्तिवारणाय विशेष्यदलम्। परन्तु घटादिविषयत्वप्रयुक्ततादृशाधिकरणत्वाप्रसिद्ध्या स्वपदेन धर्तुमशक्यत्वात् तद्वारकविरोधिविषयताप्रयुक्तत्वदलवैय्यर्थ्यमिति प्रतियोगिनि स्वत्वान्तर्भाव इति। धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादिस्थलीयबाधविषयिताप्रयोज्यायां प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावाधिरणतायां व्यभिचारविषयित्वाप्रयोज्यत्वान्न तादृशविशिष्टान्तरं व्यभिचारत्वावच्छिन्नमिति नाव्याप्तिरिति। न चैवं व्यभिचारविशिष्टमेयत्वादावतिव्याप्तिरिति वाच्यं, यद्धर्मावच्छिन्नविषयितापदेन यद्धर्मावच्छिन्नविषयितान्तःपातिविषयिताविवक्षणाद् व्यभिचारविशिष्टमेयत्वविषयितायास्तादृशाधिरकरणत्वाप्रयोजकत्वेऽपि व्यभिचारविषयितायास्तथात्वाक्षतेः। यद्धर्मपदेन व्यभिचारविशिष्टमेयत्वादेरपि धर्तव्यत्वेन स्वसजातीयविशिष्टान्तरघटितं व्यभिचारविशिष्टमेयत्वादिकमपीति नातिव्याप्तिः। एवञ्च तत्कल्पेऽपि व्यभिचारघटितबाधेऽव्याप्तिदानमग्रे सङ्गच्छते। बाधविषयतान्तःपातिव्यभिचारविषयताप्रयोज्यनिरुक्तोभयाभावप्रयोजकाभावाधिकरणतायां व्यभिचारविषयिताप्रयोज्यत्वसत्त्वेन यद्धर्मपदेन बाधत्वादिसङ्ग्रहात्। स्ववृत्तियावद्धेत्वाभासविभाजक इत्यादिरपि यद्धर्मावच्छिन्नविषयतान्तःपातिविषयताप्रयुक्तं निरुक्तोभयाभावप्रयोजकीभूतं यद्यदभावादिकरणत्वं तत्तदधिकरणत्वं तद्धर्मावच्छिन्नस्य विशिष्टान्तर-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयिताप्रयोज्यं तदघटितत्वमित्यर्थः। न च व्यभिचारविशिष्टमेयत्वादावतिव्याप्तिवारणायान्तःपातिविषयतात्वमनिवेश्य विशेष्यदले विरोधिविषयताप्रयुक्तत्वमित्यत्र स्वीयविरोधिविषयताप्रयुक्तत्वमित्यर्थो वाच्यः। तथा च न व्यभिचारघटितबाधादावव्याप्तिरिति वाच्यं, धूमवान् अवृत्तिवह्नेरित्यादिसाधनाप्रसिद्धिघटितव्यभिचारात्मकधूमाभाववद्वृत्तिवह्नौ तावताप्यव्याप्तिरित्याहुः, तच्चिन्त्यम्, उक्तरीत्या घटादावतिव्याप्तिवारकतया विरोधिविषयताप्रयुक्तत्वदलस्य सार्थक्यासम्भवेऽप्याहार्यस्थले एकदेशेऽतिव्याप्तिवारकत्वैनैव सार्थक्यसम्भवेन तद्वैयर्थ्याभिधानासङ्गतितादवस्थ्यात्।

विशिष्टान्तराघटितत्वेनाघटितस्य विशिष्टसाध्यसाधनग्रहाविरोधिज्ञाननिष्ठविषयितासम्बन्धेन व्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वादिरूपस्य व्यभिचारादिविभाजकस्यात्र निवेशादिति **भट्टाचार्यः** (पृ.सं. १७२)। अत्र विशिष्टसाध्यसाधनग्रहाविरोधित्वानिवेशे पर्वतो धूमवान् अवृत्तिसत्त्वादित्यत्र धूमाभाववद्वृत्तिसत्त्वरूपव्यभिचारेऽव्याप्तिः, उक्तव्यभिचारत्वेन स्वसजातीयविशिष्टान्तरं यद्वृत्तिसत्त्वं तद्घटितत्वात्। तद्वारणाय यदि विशिष्टसाधनग्रहाविरोधित्वमात्रं निवेश्यते तदा ह्रदः प्रतियोगितानवच्छेदकवह्नित्ववत्त्वान् जलादित्यत्र स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिग्रहविरोधिविषयजलसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्नित्वरूपव्यभिचारेऽव्याप्तिः, तस्याप्युक्तव्यभिचारत्वेन स्वसजातीयविशिष्टान्तरं यत् प्रतियोगितावच्छेदकवह्नित्वं तद्घटितत्वात्। अतो विशिष्टसाध्यग्रहाविरोधित्वस्यापि निवेशः।

न चैतद्विशेषणप्रक्षेपेऽप्युक्तव्यभिचारद्वयेऽव्याप्तिवारणमशक्यम्, उक्तविशिष्टान्तरद्वयस्यैव विशिष्टसाध्यसाधनग्रहाविरोधिज्ञाननिष्ठविषयितासम्बन्धेन व्याप्तिग्रहप्रतिबन्धकतानतिरिक्तवृत्तित्वादिति वाच्यम्, अभिप्रायापरिज्ञानात्, उक्तविशेषणेन विशिष्टसाध्यग्रहत्वाव्यापकत्वे सति विशिष्टसाधनग्रहत्वाव्यापकत्वे च सति यद्व्याप्तिग्रहत्वव्यापकप्रतिबध्यत्वं तन्निरूपितप्रतिबन्धकतायाः शुद्धविषयित्वसम्बन्धेन तादृशप्रतिबन्धकतातिरिक्तवृत्तित्वेन स्वसाजात्याभावान्नाव्याप्तिरिति।

न च स्ववृत्तियावद्धेत्वाभासविभाजकरूपेण साजात्यं विवक्षणीयं, तथा च बाधादिघटकव्यभिचारादौ बाधत्वाद्यसत्त्वात् न तादृशबाधादिसाजात्यमतस्तत्सङ्ग्रहसम्भव इति वाच्यम्, एवं सति बाधविशिष्टव्यभिचारादौ स्ववृत्तिबाधत्वव्यभिचारत्वादियावद्धर्मेण स्वसजातीयविशिष्टान्तरस्य व्यभिचारविशिष्टबाधादेः प्रसिद्धावपि तदघटितत्वादतिव्याप्तेरिति **भट्टाचार्यः** (पृ.सं. १७३)। ननु स्ववृत्तिहेत्वाभासविभाजकं यद्यद्रूपं तत्रत्येकाश्रयविशिष्टान्तरघटितं यद्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्तदन्यत्वस्य प्रकृते विशेषणत्वान्नातिव्याप्तिः। तथा हि बाधविशिष्टव्यभिचारवृत्ति तादृशरूपं यद्बाधत्वं व्यभिचारत्वञ्च तत्प्रत्येकाश्रयो बाधो व्यभिचारश्च तद्घटितत्वादित्यनुगमज्ञानवृत्तिहेत्वाभासविभाजकरूपत्वव्यापकभिन्नत्वम्। व्यापकत्वन्तु स्वाश्रयवृत्तित्वसम्बन्धेन। स्वाश्रयत्वन्तु स्वाविषयकप्रतीतिविषयत्वाधेयत्वोभयसम्बन्धेन। आधेयत्वन्तु स्वाविषयकप्रतीत्यविषयत्वसम्बन्धावच्छिन्नं ग्राह्यम्। वृत्तित्वन्तु पर्याप्तिसम्बन्धावच्छिन्नाधेयत्वरूपं ग्राह्यम्। तथा च बाधविशिष्टव्यभिचारवृत्तिबाधत्वादिरूपत्वव्यापकत्वस्य बाधविशिष्टव्यभिचारे सत्त्वेन तत्र तदन्यत्वासत्त्वादिति वाच्यं, तथाप्यवच्छेदकावच्छेदेन बाधादौ लक्षणासम्भवात् नैष सारसिकः पन्था इति ध्येयम्॥

यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्ता प्रकृतपक्षे प्रकृतसाध्यावगाहित्व-प्रकृतसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहित्वोभयाभावाधिकरणता तद्रूपावच्छिन्नत्वं **भट्टाचार्येणा**भिहितम् (पृ.सं. १७८)। तत्र निर्वह्निः पर्वतो वह्निमान् धूमादित्यत्र पाषाणमयत्वविशिष्टपर्वतविषयकनिश्चयोत्तरानुमितिसामान्ये प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वस्य प्रकृतपक्षे प्रकृतसाध्यनिरूपितव्याप्तिविशिष्टहेतुमत्त्वावगाहित्वस्य चोभयाभावसत्त्वात्। एवं स्वविषयिताप्रयोज्यविशिष्टान्तरविषयित्वाप्रयोज्योभयाभावप्रयोजिका पाषाणमयो न वह्निमान् पर्वतश्च पाषाणमय इति ज्ञानोत्तरज्ञाननिष्ठा प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता तत्कत्वमपि पाषाणमयत्वविशिष्टपर्वतेऽस्ति पाषाणमयत्वावच्छेदेन वह्न्यभावाप्रसिद्ध्या विशिष्टान्तरविषयित्वाप्रयोज्यत्वस्य तदधिकरणतायामक्षतत्वात्। अतो यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये तादृशोभयाभाववत्त्वमपहाय विरोधिविषयिताप्रयुक्ततादृशोभयाभाववत्त्वं निवेशितम्। तथा च प्रतिबन्धकज्ञानोत्तरवर्तिज्ञाननिष्ठोभयाभावप्रयोजकत्वस्य प्रतिबन्धकज्ञानवृत्तिप्रतिबन्धकतावच्छेदकविषयितायामेव स्वीकारात्, पाषाणमयो न वह्निमान् इति ज्ञानशून्य(विरह)कालीनपाषाणमयत्वविशिष्टपर्वतविषयकज्ञानोत्तरानुमिति(तौ)विरोधिविषयित्वाप्रयुक्तविशिष्टतादृशोभयाभावाधिकरणतायाः सत्त्वात्[1] इति न पाषाणमयत्वविशिष्टपर्वतविषयकनिश्चयोत्तरानुमितित्वव्यापकविरोधिविषयताप्रयुक्तोभयाभावाधिकरणताकत्वम् इति न पाषाणमयत्वविशिष्टपर्वतेऽतिव्याप्तिः। निर्वह्निः पर्वतो वह्निमान् धूमादित्यत्र वह्निमत्पर्वतरूपाश्रयासिद्धिविषयकनिश्चयोत्तरानुमितिनिष्ठा या तादृशोभयाभावाधिकरणता सापि निर्वह्निपर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वव्यापकस्य पर्वतत्वावच्छिन्ने वह्न्यभावावगाहित्वस्याभावप्रयोजिका या

१. विरोधिविषयताप्रयुक्ततादृशोभयाभावाधिकरणताया असत्त्वादित्यत्र तात्पर्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वह्निमत्पर्वतविषयता तत्प्रयोज्या भवति व्यापकाभावप्रयोज्यत्वस्यावश्यं व्याप्याभावे सत्त्वात्।

ननु निर्वह्निपर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वव्यापिका नानाहार्य-ज्ञानीयपर्वतत्वावच्छिन्नविषयतानिरूपितवह्न्यभावविषयता, निर्वह्निः पर्वत इति ज्ञानीयवह्न्यभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताया वह्निप्रकारकत्वा-निरूपिततयाऽऽहार्यज्ञानावृत्तित्वात्। न च निर्वह्निः पर्वतो वह्निमान् इति ज्ञानस्य प्रत्यक्षरूपतयोपनयसन्निकर्षमर्यादया निर्वह्निः पर्वतो वह्निमान् निर्वह्निपर्वतश्च इत्याकारकसमूहालम्बनप्रत्यक्षे बाधकाभावादाहार्यज्ञानवृत्तित्वमपि तादृश-विषयतायामक्षतमेवेति वाच्यं, यत्र च पर्वतो वह्निमान् इति बाधनिश्चयो वर्तते, तदुत्तरं निर्वह्निपर्वतत्वविशिष्टे वह्निज्ञानं जायतामितीच्छा, तदुत्तरं निर्वह्निः पर्वतो वह्निमान् इत्येव ज्ञानं जायते न तु समूहालम्बनतया निर्वह्निः पर्वतो वह्निमान् पर्वतश्च निर्वह्निरिति ज्ञानं केवलं पर्वतत्वाच्छिन्ने वह्न्यभाववत्ताबुद्धिं प्रति पर्वतत्वावच्छिन्ने वह्न्यभावप्रकारकनिश्चयेच्छाविरहविशिष्टपर्वतधर्मिकवह्निमत्ता-निश्चयाभावस्य जनकत्वात् तदभावस्य तत्रासत्त्वात्। तथा च निर्वह्निः पर्वत इति ज्ञानीया या प्रतिबध्यतावच्छेदकीभूतविषयता तस्याः प्रकृतपक्षे प्रकृतसाध्य-वैशिष्ट्यावगाहित्वव्यापकत्वविरहात् कथं वह्निमत्पर्वतविषयताया व्यापकाभाव-प्रयोजकतया व्याप्याभावप्रयोजकत्वमिति चेत्? न, व्यापकतावच्छेदकावच्छिन्ना-भावप्रयोजकस्य वह्निमत्पर्वतविषयकत्वस्यैव व्याप्याभावप्रयोजकत्वात्। तथा च पर्वतत्वावच्छिन्ने वह्न्यभावावगाहितात्वस्य निर्वह्निपर्वतत्वविशिष्टे वह्न्यवगाहिता-व्यापकतावच्छेदकतया तदवच्छिन्नाभावप्रयोजकस्य वह्निमत्पर्वतविषयत्वस्य निर्वह्निपर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वघटितोभयाभावप्रयोजकत्वमक्षतमिति।

मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय स्वविषयताप्रयोज्यविशिष्टान्तर-विषयत्वाप्रयोज्योभयाभावप्रयोजकाभावाधिकरणताकत्वं **भट्टाचार्येण** निवेशितम् (पृ.सं. १८१)। उभयाभावप्रयोजकाभावाधिकरणतायां विशिष्टान्तरविषयत्वा-प्रयोज्यत्वमात्रोक्तौ यदनुमित्यव्यवहितपूर्वं ह्रदे वह्न्यनुमितिसामग्री नास्ति वह्न्यभाववद्ध्रदविषयकनिश्चयोऽपि नास्ति तदनुमितिनिष्ठोभयाभावप्रयोजिकाया अभावाधिकरणताया ह्रदधर्मिकवह्न्यनुमितिसामग्र्यभावमात्रप्रयोज्याया विशिष्टान्तर-विषयित्वाप्रयोज्यत्वात् विशिष्टान्तरविषयित्वाप्रयोज्यतदधिकरणताकमेयत्व-विशिष्टवह्न्यभाववद्ध्रदेऽतिव्याप्तिर्दुवारैव। अतः स्वविषयताप्रयोज्यत्वदलम्। तथा चानुमितिसामग्र्यभावमात्रप्रयोज्यायां तादृशाधिकरणतायां मेयत्वविशिष्टवह्न्य-

१. 'अनाहार्य' इत्यस्य स्थाने 'आहार्य' इति पाठः समीचीनः प्रतिभाति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाववद्ध्रदविषयित्वाप्रयोज्यत्वान्न स्वपदेन मेयत्वविशिष्टवह्न्यभाववद्ध्रदोपादान-सम्भवः।

ननु विषयताप्रयुक्तत्वनिवेशेनैव सामग्र्यभावमात्रप्रयोज्योभयाभावप्रयोजका-भावाधिकरणतामादायातिव्याप्तिवारणसम्भवे स्वविषयिताप्रयोज्यत्वनिवेशनं व्यर्थमिति वाच्यम्, एवमपि पर्वतो धूमवान् वह्नेरित्यत्र पर्वतत्वसामानाधिकरण्येन धूमस्य साध्यतायां तत्र पर्वतत्वावच्छेदेन धूमाभावनिश्चयोत्तरानुमितौ या तादृशोभयाभावप्रयोजक-प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता तस्या मेयत्वविशिष्टधूमव्यभिचारिवह्नित्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद् व्यभिचारत्वं तदवच्छिन्नविषयतात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वाद् भ्रमीयबाधविषयताप्रयोज्यत्वाच्च पर्वतत्वावच्छेदेन धूमाभावाप्रसिद्ध्या विशिष्टान्तरपदेन बाधमुपादाय तादृशाधिकरणतायां न विशिष्टान्तरविषयितात्व-व्यापकरूपावच्छिन्नप्रयोज्यत्वसम्भवः। स्वविषयताप्रयोज्यत्वदलनिवेशे च भ्रमविषयताप्रयोज्यतादृशाभावाधिकरणतायां न मेयत्वविशिष्टव्यभिचारविषयता-प्रयोज्यत्वमिति न मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः।

न च धूमव्यभिचारिवह्निर्धूमवान् वह्नेरित्यादौ मेयत्वविशिष्टधूमव्यभिचारि-वह्निविषयताप्रयोज्याया मेयत्ववान् धूमाभाववान् धूमव्यभिचारिवह्निश्च मेयत्ववान् इति ज्ञानोत्तरानुमितिनिष्ठायाः प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वाभावा-धिकरणताया मेयत्वावच्छेदेन धूमाभावाप्रसिद्ध्या विशिष्टान्तरविषयितात्वव्यापकरूपाव-च्छिन्नाप्रयोज्यत्वेन मेयत्वविशिष्टधूमव्यभिचारिवह्नावतिव्याप्तितादवस्थ्यात्, यद्विषयकनिश्चयोत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्तयदभावाधिकरणता-प्रयुक्तोभयाभावाधिकरणता स्वविषयताप्रयुक्तविशिष्टान्तरविषयित्वाप्रयोज्यतद-भावाधिकरणताकत्वमेव विवक्षणीयम्। तथा च मेयत्वविशिष्टधूमव्यभिचारिवह्नि-विषयकनिश्चयोत्तरानुमितिसामान्ये पक्षे साध्यव्याप्यहेत्ववगाहित्वाभावाधि-करणताप्रयुक्त एव निरुक्तोभयाभावः। एवञ्च पर्वतो धूमवान् वह्नेरित्यादौ पर्वतत्वावच्छेदेन धूमवत्त्वनिश्चयोत्तरानुमितिनिष्ठायाः प्रकृतपक्षे साध्यवैशिष्ट्या-वगाहित्वाभावाधिकरणताया विशिष्टान्तरविषयत्वाप्रयोज्यत्वेऽपि मेयत्वविशिष्ट-धूमव्यभिचारिवह्निविषयकनिश्चयोत्तरानुमितिसामान्ये तादृशोभयाभावो व्याप्त्य-वगाहित्वाभावप्रयुक्त एव। तादृशव्याप्त्यवगाहित्वाभावाधिकरणतायां विशिष्टान्तर-शुद्धव्यभिचारविषयत्वाप्रयोज्यत्वविरहेणातिव्याप्तिविरहात् कथं स्वपदोपादानमिति वाच्यम्, एवमपि पर्वतो वह्न्यभाववान् ह्रदश्च पर्वत इति ज्ञानोत्तरानुमितिनिष्ठा या पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता भ्रमीयविषयतामात्रप्रयोज्या तस्या विशिष्टान्तरविषयतात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वाद् ह्रदो वह्निमान् धूमादित्यादौ

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मेयत्वविशिष्टवह्न्यभाववद्ध्रदेऽतिव्याप्तेः। अतः केवलं विषयतामपहाय स्वविषयताप्रयोज्यत्वनिवेशनम्।

विशिष्टान्तरविषयत्वाप्रयोज्यस्वविषयताप्रयोज्योभयाभावप्रयोजकाधिकरणतामात्रनिवेशे ह्रदो वह्निमान् इत्यत्र मेयत्वव्याप्यवह्न्यभाववद्ध्रदेऽतिव्याप्तिः, वह्न्यभाववद्ध्रदो मेयत्वव्याप्यवान् इति परामर्शीया या विषयता तत्प्रयोज्यत्वस्य वह्न्यभाववद्ध्रदो मेयत्ववान् इत्यनुमितिनिरूपिताया वह्न्यभाववद्ध्रदविषयतायाः प्रतिबन्धकतावच्छेदकविषयतात्वेनोभयाभावप्रयोजिकायास्तस्याः सत्त्वेन विशिष्टान्तरविषयत्वाप्रयोज्यत्वेन च तद्विषयत्वाधिकरणत्वस्य मेयत्वव्याप्यविशिष्टवह्न्यभाववद्ध्रदेऽपि सत्त्वात्।

न च यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये विशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्ना या विरोधिविषयतानिष्ठप्रयोजकता तन्निरूपितप्रयोज्यत्वविशिष्टं यत् तादृशोभयाभावाधिकरणत्वं (तद्रूपवत्त्वमेव लक्षणम्।?) तद्रूपवत्त्वस्यैव लक्षणत्वे मेयत्वविशिष्टव्यभिचारवारणं सम्भवति। तथा हि मेयत्वविशिष्टव्यभिचारविषयकनिश्चयोत्तरानुमितिनिष्ठा या तादृशोभयाभावाधिकरणता तस्या विशिष्टान्तरव्यभिचारविषयतात्वव्यापकरूपव्यभिचारविषयतात्वेन मेयत्वविशिष्टव्यभिचारविषयताप्रयोज्यतया न विशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वम्। एवञ्च स्वतन्त्रविशिष्टान्तराघटितत्वनिवेशनं व्यर्थमेव, किन्तु विरोधिविषयतायां मुख्यविशेष्यतात्मकत्वमवश्यं निवेशनीयम्। अन्यथा व्यभिचारविषयिताया धूमाभाववद्वृत्तित्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविषयतात्वेनैव वह्नित्वावच्छिन्नविषयतानिरूपितधूमाभाववद्वृत्तित्वप्रकारताया अपि वह्नित्वावच्छिन्नविशेष्यतानिरूपितधूमाभाववद्वृत्तित्वप्रकारतात्वेन प्रयोजकतया तादृशप्रकारतात्वस्य विशिष्टान्तरविषयतात्वव्यापकत्वविरहात् तादृशप्रकारतानिष्ठप्रयोजकताया विशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्नतया तादृशप्रकारतानिष्ठप्रयोजकतानिरूपितप्रयोज्यत्वस्य मेयत्वविशिष्टव्यभिचारविषयकनिश्चयोत्तरानुमितिसामान्यवृत्त्युभयाभावाधिकरणतायां सत्त्वेऽपि न मेयत्वविशष्टव्यभिचारेऽतिव्याप्तिरिति वाच्यं, यत्र ह्रदत्वावच्छेदेन वह्नेः साध्यता तत्र ह्रदत्वव्यापकत्वविशिष्टवह्न्यभावप्रतियोगिकविशेषणताविशेषेण वह्न्यभाववद्ध्रदस्य दोषत्वम्, एवं केवलविशेषणताविशेषसम्बन्धेन वह्न्यभाववद्ध्रदस्यापि दोषत्वम्, तत्र ह्रदत्वावच्छेदेन वह्न्यभावेऽव्याप्तिः। तथा हि ह्रदत्वावच्छेदेन वह्न्यभावावगाहिनिश्चयोत्तरानुमितिनिष्ठह्रदत्वावच्छेदेन वह्निवैशिष्ट्यावगाहित्वघटितोभयाभावाधिकरणतायां ह्रदत्वावच्छेदेन वह्निवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकं यद् वह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतात्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेन रूपेण ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकविशेषणताविशेषसम्बन्धावच्छिन्न-वह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतायां ह्रदत्वावच्छेदेन वह्निवैशिष्ट्या-वगाहित्वघटितोभयाभावप्रयोजकतया न तादृशोभयाभावाधिकरणतायां विशिष्टान्तर-विषयितात्वव्यापकरूपानवच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वस्य सम्भवः।

एवं घटो विशेषगुणाभावगुणसामान्याभावोभयवान् इत्यादौ विशेषगुणवद्-घटो बाधः। तत्रानुमितौ विशेषगुणाभावप्रकारकबुद्धित्वावच्छिन्ना [एका,] एवं गुणसामान्याभावप्रकारकबुद्धित्वावच्छिन्ना चापरा प्रतिबध्यता। तथा च तादृशप्रतिबध्यताभेदेन प्रतिबन्धकतापि गुणवद्घटविषयकनिश्चये विशेषगुणवद्-घटविषयकनिश्चयेऽपि भिन्ना भिन्ना भवतीत्युभयस्यैव दोषत्वं तत्र विशेषगुणवद्घटेऽव्याप्तिः, विशेषगुणवद्घटविषयकनिश्चयोत्तरानुमितिसामान्ये या तादृशोभयाभावाधिकरणता तस्या गुणवद्घटरूपविशिष्टान्तरविषयतात्व-व्यापकगुणत्वावच्छिन्नविषयतानिरूपितघटत्वावच्छिन्नविषयतात्वेनैवावच्छिन्ना या प्रयोजकता तन्निरूपितप्रयोज्यत्वमेव स्वीक्रियते न तु विशेषगुणत्वावच्छिन्न-विषयतानिरूपितघटत्वावच्छिन्नविषयतात्वेनावच्छिन्ना प्रयोजकता तन्निरूपितप्रयोज्यत्वान्तरमपि, गौरवात्। तथा च विशेषगुणवद्घटविषयक-निश्चयोत्तरानुमितिनिष्ठोभयाभावाधिकरणताया न विशिष्टान्तरविषयतात्वव्यापक-रूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वसम्भवः। स्वविषयताप्रयोज्यविशिष्टान्तर-विषयत्वाप्रयोज्योभयाभावाधिकरणताक[त्व]निवेशे च ह्रदत्वावच्छेदेन वह्निवैशिष्ट्यावगाहित्वघटितोभयाभावप्रयोजिका यथा ह्रदत्वव्यापक-वह्निप्रतियोगिकसंयोगसम्बन्धावच्छिन्नवह्निवैशिष्ट्यावगाहित्वाभावाधिकरणता तथा ह्रदत्वावच्छिन्नविशेष्यतानिरूपितसंयोगत्वावच्छिन्नसंसर्गतानिरूपितवह्नित्वा-वच्छिन्नप्रकारताकत्वसामान्याभावेऽपि, एवं विशेषगुणाभावगुणाभावोभयवैशिष्ट्या-वगाहित्वघटितोभयाभावप्रयोजिका घटविशेष्य[क]गुणाभावप्रकारकत्वसामान्याभावा-धिकरणतापि। तयोश्च प्रत्येकं ह्रदत्वसामानाधिकरण्येन वह्न्यभावरूपविशिष्टान्तर-विषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वह्रदत्वावच्छेदेन वह्न्यभावप्रयोज्यताया एव गुणवद्घटरूपविशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वविशेषगुणवद्-घटरूपविषयतायाश्च प्रयोज्यतायाः सत्त्वादुक्तस्थले ह्रदत्वावच्छेदेन वह्न्यभारूपबाधे विशेषगुणवद्घटरूपबाधे च नाव्याप्तिः।[1] स्वविषयताप्रयोज्यविशिष्टान्तरविषयित्वा-प्रयोज्योभयाभावाधिकरणताकत्वमात्रनिवेशे धूमवान् धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्र बाधेऽव्याप्तिः, बाधविषयताप्रयोज्याया निरुक्तोभयाभावाधिकरणताया व्यभिचाररूपविशिष्टान्तरविषयताप्रयोज्यत्वनियमात्। अत उभयाभावप्रयोजका-

१. अत्रत्यो ग्रन्थः किञ्चिदस्पष्ट इव प्रतीयते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावाधिकरणतायां स्वविषयिताप्रयोज्यविशिष्टान्तरविषयत्वाप्रयोज्यत्वनिवेशनं **भट्टाचार्येण** कृतम्। तथा चोभयाभावप्रयोजिका या पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणता तस्यां व्यभिचारविषयतात्वव्यापकरूपेण व्यभिचारविषयताया अप्रयोजकतया व्यभिचाररूपविशिष्टान्तरविषयतात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वं तत्राक्षतमेव।

न च यत्र धूमव्यभिचारिवह्निमान् धूमाभाववान् इति बाधनिश्चयोत्तरं धूमव्यभिचारिवह्निमान् धूमव्याप्यवह्निमान् इत्याहार्यनिश्चयस्तज्ज्ञाननिष्ठा या उभयाभावाधिकरणता तस्याञ्च न व्यभिचारविषयतायाः प्रयोजकत्वं किन्तु बाधविषयतात्वेनैवेति तदधिकरणतामादायैव स्वविषयताप्रयोज्यविशिष्टान्तरविषयित्वाप्रयोज्योभयाभावाधिकरणताकत्वं व्यभिचारघटितबाधे स्थास्यतीति तादृशोभयाभावप्रयोजकाभावाधिकरणतापर्यन्तनिवेशनं विफलमिति वाच्यं, यादृशव्यभिचारघटितबाधविषयकज्ञाना[न]न्तरं पक्षे साध्यव्याप्यहेतुवैशिष्ट्यावगाह्याहार्यज्ञानं न जातं तादृशव्यभिचारघटितबाधानन्तरज्ञाने निरुक्तोभयाभावाधिकरणताया व्यभिचाररूपविशिष्टान्तरविषयतात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वनियमात् तादृशव्यभिचारघटितबाधेऽव्याप्तिवारणार्थमेवोभयाभावप्रयोजकाभावाधिकरणताकत्वपर्यन्तानुधावनम्। एवं ह्रदो वह्निमान् धूमाद् इत्यत्र ह्रदत्वावच्छेदेन वह्नेः साध्यता यत्र, तत्र ह्रदत्वावच्छेदेन वह्न्यभावस्य दोषत्वानुपपत्तिः। ह्रदत्वावच्छेदेन वह्न्यभावनिश्चयोत्तरोभयाभावाधिकरणताया ह्रदत्वसामानाधिकरण्येन वह्न्यभावरूपविशिष्टान्तरविषयताप्रयोज्यत्वनियमात्। अतस्तादृशानुधावनमिति चिन्त्यम्।

ननु धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यत्र धूमाभाववद्धूमव्यभिचारिवह्निमद्विषयकनिश्चयोत्तरानुमितिनिष्ठोभयाभावप्रयोजकाभावाधिकरणताया बाधविषयतान्तःपातित्वेन विशिष्टान्तरव्यभिचारविषयताप्रयोज्यतया विशिष्टान्तरयत्किञ्चिद्विषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वं **भट्टाचार्येण** निवेशितम्। अत्रेदं बोध्यं, यद्यपि ह्रदो वह्निमान् धूमादित्यादावपि वह्न्यभाववद्ध्रदादिरूपबाधविषयिताप्रयोज्योभयाभावप्रयोजकाभावाधिकरणतायां वह्न्यभावादिरूपविशिष्टान्तरविषयिताया अपि बाधविषयितान्तःपातिविषयितात्वेन प्रयोजकतया विशिष्टान्तरविषयितात्वव्यापकत्वानिवेशेऽसम्भव एव दातुमुचितः, तथापि यद्विषयकनिश्चयोत्तरानुमितिसामान्ये निरुक्तोभयाभावस्तादृशविशिष्टान्तरविषयित्वाप्रयोज्यत्वनिवेशे वह्न्यभावादिविषयताप्रयोज्यत्वस्य वह्न्यभाववद्ध्रदविषयिताप्रयोज्यत्वस्य चं निरुक्तोभयाभावप्रयोजकाभावाधिकरणता[यां]सत्त्वेऽपि न वह्न्यभाववद्ध्रदादौ लक्षणासङ्गतिः, केवलवह्न्यभावविषयकनिश्चयोत्तरानुमिति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामान्ये तादृशोभयाभावविरहाद् विशिष्टान्तरपदेन केवलवह्न्यभावस्य धर्तुमशक्यत्वात्। धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यत्र धूमव्यभिचारिवह्निमद्विषयकनिश्चयोत्तरानुमितिसामान्य एव तादृशोभयाभावसत्त्वात् तादृशविशिष्टान्तरपदेन व्यभिचारस्य धर्तुं शक्यतया व्यभिचारादिकमादाय धूमाभाववद्धूमव्यभिचारिवह्निमत्यव्याप्तिवारणार्थं विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशनमावश्यकमिति।

ननु वह्न्यादिधर्मिकव्याप्तिग्रहं प्रति धूमाभाववद्वृत्तित्वप्रकारतानिरूपितवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धत्वमावश्यकं वाच्यम्, अन्यथा जातिमान् धूमाभाववद्वृत्तिरिति ज्ञानोत्तरमपि वह्निधर्मिकधूमव्याप्तिग्रहानुत्पादप्रसङ्गात्। एवञ्च मेयत्वविशिष्टधूमव्यभिचारिवह्नावतिव्याप्तिवारणं दुःशकम्। तथा हि तत्र विशिष्टान्तरं यद् धूमव्यभिचारिवह्न्यादि तद्विषयतात्वव्यापकं न धूमाभाववद्वृत्तित्वप्रकारतानिरूपितनिरवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकविशेष्यतात्वं, जातिमान् धूमाभाववद्वृत्तिरिति ज्ञानीयविषयतायां व्यभिचारात्। किन्तु धूमाभाववद्वृत्तित्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यतात्वमेव। तादृशञ्च रूपं न शुद्धवह्नित्वावच्छिन्नधर्मिकव्याप्तिग्रहप्रतिबन्धकतावच्छेदकमिति न तदवच्छिन्नप्रकारतानिरूपितप्रयोज्यत्वस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वाभावाधिकरणतायां सत्त्वसम्भवः। तथा च कथं मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिवारणमिति विशिष्टान्तरविषयित्वाव्यापकीभूतविषयताशून्यज्ञानीयविशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वमेव निवेशनीयम्। तथा च धूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयितात्वाव्यापकीभूतविषयिताशून्यं (विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वमेव?,) न जातिमान् धूमाभाववद्वृत्तिरितिज्ञानं किन्तु धूमाभाववद्वृत्तिवह्निरितिज्ञानमेव तज्ज्ञानवृत्तिधूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयितात्वव्यापकं धूमाभाववद्वृत्तित्वप्रकारतानिरूपितवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताकविशेष्यतात्वमपि। तद्रूपावच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वाभावाधिकरणतायां सत्त्वान्न मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिः।

एवञ्च विशिष्टान्तरविषयत्वाव्यापकीभूतविषयताशून्यज्ञानीयविषयतानिष्ठप्रयोजकतानिरूपितप्रयोज्यत्वस्याभावविवक्षणे धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यत्र बाधे नाव्याप्तिः, व्यभिचाररूपविशिष्टान्तरविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानं [न] धूमव्यभिचारिवह्निमान् धूमाभाववान् इति बाधविषयकज्ञानं, किन्तु धूमव्यभिचारिवह्निरिति केवलव्यभिचारविषयकं ज्ञानं, तदीयविषयिता तु न प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिग्रहप्रतिबन्धतावच्छेदकेति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तन्निष्ठप्रयोजकतानिरूपितप्रयोज्यत्वाभावस्य पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां सत्त्वात् तादृशयत्किञ्चिद्विशिष्टान्तरविषयतात्वनिवेशनमफलम्।

न चैवं मेयत्वविशिष्टधूमव्यभिचारिवह्नावतिव्याप्तिः, मेयत्वविशिष्टधूमव्यभिचारिवह्निविषयकनिश्चयोत्तरानुमितिनिष्ठा या उभयाभावप्रयोजकाधिकरणता तस्या धूमव्यभिचारिवह्निरूपविशिष्टान्तरविषयतात्वव्यापकीभूतविषयताशून्यधूमव्यभिचारिवह्निः इत्याकारकज्ञानीयविषयताया मेयत्वविशिष्टधूमव्यभिचारीति ज्ञानावृत्तितया तादृशविषयत्वाप्रयोज्यत्वात् स्वपूर्ववर्त्तिज्ञानीयविषयताया एव स्वोत्तरवर्तिज्ञाननिष्ठप्रतिबध्यतावच्छेदकधर्माभावप्रयोजकत्वादिति वाच्यम्, एवमपि विशिष्टान्तरविषयित्वाव्यापकीभूतविषयताशून्यज्ञानीयविषयतावृत्तिरूपपर्याप्त्यवच्छेदकताकप्रयोजकतानिरूपितप्रयोज्यत्वाभावविवक्षणेऽतिव्याप्तिवारणं सम्भवति। केवलं धूमव्यभिचारिवह्निरितिज्ञानीया या विषयता तद्वृत्ति यद्धूमाभाववद्वृत्तित्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविषयतात्वं तेन रूपेणैव मेयत्वविशिष्टधूमव्यभिचारिवह्निविषयतायास्तदनन्तरज्ञाननिष्ठोभयाभावप्रयोजकाभावाधिकरणतायां प्रयोजकत्वादिति चेत्?, न, सामान्यतो विशिष्टान्तरविषयत्वाव्यापकीभूतविषयताशून्यग्रहस्यापि प्रसिद्धिरिति विशिष्टान्तरविषयताया घटादिज्ञानेऽपि सत्त्वात्, तत्र च व्यभिचारविषयताया अभावाद् व्यभिचारविषयताया अपि विशिष्टान्तरविषयत्वाव्यापकत्वेन तच्छून्यत्वस्य व्यभिचारविषयकज्ञानेऽप्यभावात्, किन्तु स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्यद्रूपं प्रातिस्विकरूपेण तद्रूपावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्यज्ञानवृत्तिविषयतानिष्ठधर्मपर्याप्त्यवच्छेदकताप्रयोजकतानिरूपितप्रयोज्यत्वाभावकूट एव निवेशनीयः। तथा च मेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः, व्यभिचारविषयत्वाव्यापकीभूतविषयताशून्यज्ञानवृत्तिविषयतानिष्ठधर्मपर्याप्त्यवच्छेदकताकप्रयोजकतानिरूपितप्रयोज्यत्वस्य मेयत्वविशिष्टव्यभिचारविषयकज्ञानोत्तरज्ञाननिष्ठोभयाभावप्रयोजकाभावाधिकरणतायामक्षतत्वात्। एवञ्च घटाभाववद्भूतलविषयत्वाप्रयोज्यत्वस्य पटाभाववद्भूतलविषयत्वाप्रयोज्यत्वस्य प्रातिस्विकरूपेण निवेशः कर्तव्यः। तदपेक्षया स्वावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्यज्ञानवृत्तिर्या स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतधर्मावच्छिन्नविषयता तत्प्रयोज्यत्वाभाव एव निवेशनीयः। तथा च घटाभाववद्भूतलविषयतायाः स्वावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्यज्ञानवृत्तित्वविरहात् तदप्रयोज्यत्वस्य न तादृशकूटान्तर्गतत्वम्। एवञ्च धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ धूमाभाववद्धूमव्यभिचारिवह्निमद्विषयत्वाव्यापकीभूतविषयताशून्यज्ञानीया या धूमव्यभिचारिवह्नित्वावच्छिन्नविषयता तस्याः साध्यवत्ताग्रहप्रतिबन्धकतावच्छेदकतया पक्षे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकत्वेन धूमाभाववद्धूमव्यभिचारिवह्निमत्यव्याप्तिः। अतो व्यापकत्वनिवेशनमिति।

यत्तु गगनम् अभावाप्रतियोगि गगनादित्यादावभावाप्रतियोगित्वव्यापकीभूताभावप्रतियोगिगगनरूपासाधारण्ये बाधघटितेऽव्याप्तिः, तज्ज्ञानानन्तरज्ञाननिष्ठतादृशसाध्यावगाहित्वाभावाधिकरणतायां बाधरूपविशिष्टान्तरविषयित्वप्रयोज्यत्वादिति, तत्तुच्छं, साध्यवत्ताबुद्धावभावप्रतियोगित्वनिश्चयत्वेन प्रतिबन्धकत्वं न तत्र ज्ञानविशिष्टज्ञानत्वेन बाधविषयकज्ञानस्य प्रतिबन्धकत्वमिति तस्यालक्ष्यत्वात् स्वातन्त्रेण दूषकत्वाभावेन दोषत्वस्वीकारस्यायुक्तत्वाद् व्यभिचारघटितबाधादेश्च स्वातन्त्र्येण दूषकत्वात् तत्सङ्ग्रहप्रकारस्यावश्यकत्वात्।

अथ साध्यव्यापकीभूताभावप्रतियोगिहेतुरूपासाधारण्येऽव्याप्तिः, पक्षवृत्तिर्हेतुरिति ज्ञानकालीनासाधारणज्ञानोत्तरजायमानज्ञाननिष्ठसाध्यावगाहित्वाभावाधिकरणतायां स्वविषयिताप्रयोज्यत्वविशिष्टान्तररूपहेतुमत्पक्षविषयिताप्रयोज्यत्वस्यावश्यकत्वात्। न च तादृशविशिष्टान्तरविषयित्वाप्रयोज्यत्वं वक्तव्यं केवलहेतुमत्पक्षादिकञ्च न तथेति वाच्यं, जलाभाववद्ध्रदकालीनवह्नेः साध्यतास्थले जलवद्ध्रदरूपहेतुमत्पक्षस्य तादृशतया तत्र वह्निव्यापकीभूताभावप्रतियोगिजलरूपेऽसाधारण्येऽव्याप्तिः। एवं यद्विषयकनिश्चय इत्यादिदलानाक्रान्तत्वाच्च। न [च] तत्रापि यद्विषयकनिश्चये पक्षधर्मिके हेतुमत्ताज्ञानकालीनत्वं देयमिति न दोष इति वाच्यं, यद्विषयकनिश्चयेऽनाहार्यत्वस्यावश्यकतया स्वरूपासिद्ध्यादावव्याप्त्यापत्तेः। तस्मात् पक्षवृत्तित्वाघटितमेवासाधारण्यमित्यस्य विरोध इति चेत्?, न, पक्षवृत्तित्वाघटितमेवासाधारण्यम्। परन्तु तन्निश्चयोत्तरमनाहार्यहेतुमदवगाहिसाध्यावगाहिज्ञानानुत्पत्त्या तादृशानुमितावुभयाभावसत्त्वात् तादृशाधिकरणतायां विरोधिविषयिताप्रयुक्तत्वस्य च सत्त्वादनुपपत्त्यभावात्।

एतेन विशेष्यदलसत्त्वनिर्वाहकं यद्विषयकनिश्चये हेतुमत्पक्षनिश्चयाकालीनत्वासाधारण्यविषयकत्वोभयाभावनिवेशनमुपादेयमेवेति निरस्तम्।

विशिष्टान्तरविषयित्वाप्रयोज्यत्वञ्च ज्ञानवैशिष्ट्याप्रयोज्यत्वे सति यद्विशिष्टान्तरविषयित्वाप्रयोज्यत्वं तदभाव इति नासाधारण्यासङ्ग्रहः। एवञ्च वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदवारणाय विशिष्टद्वयाघटितत्वमावश्यकम्। वस्तुतो विशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्नविषयितानिष्ठप्रयोजकताकत्वनिवेशनकल्पे नानुपपत्तिलेशोऽपि। न वा तादृशविशिष्टद्वयाघटितत्वमपीति। अथात्र कल्पे हेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वस्यासाधारण्यादिरूपस्य कथं सङ्ग्रहः। साधने साध्यव्यापकीभूताभावप्रतियोगित्वनिश्चयोत्तरपक्षतावच्छेदकमेव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मं धर्मितावच्छेदकीकृत्य साध्यसाधनोभयप्रकारकानाहार्यज्ञानानुत्पत्त्या निरुक्ता-साधारण्यादिविषयकनिश्चयोत्तरानुमितिसामान्ये निरुक्तोभयाभावाधिकरणतासत्त्वेऽपि तन्निश्चयोत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्तत्वविशिष्टतादृशोभयाभावाधि-करणताविरहात् स्वपूर्ववर्तिप्रतिबन्धकीभूतज्ञानविषयित्वस्यैव प्रयोजकतया हेतुमत्ता-ज्ञानकलीनतादृश[ा]साधारण्यज्ञानविषयिताया अप्रयोजकत्वादिति चेत्?, हेतुमत्पक्ष-ज्ञानाकालीनत्वासाधारण्यविषयकत्वोभयाभाववैशिष्ट्यं यद्विषयकनिश्चये विशेषणी-कृत्य सङ्ग्रहात्। असाधारण्यविषयकस्य पक्षधर्मताज्ञानकालीननिश्चयस्य निरुक्तोभयाभाववत्तया तदुत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्ततादृशाव-गाहित्वद्वयाभावाधिकरणताकत्वसत्त्वादिति स्वरूपासिद्धिनिश्चयस्य पक्षधर्म-ज्ञानकालीनस्यापि निरुक्ताभावविशिष्टानाहार्यस्याप्रसिद्ध्याऽव्याप्तिवारणाया-साधारण्यविषयकत्वमित्यपि मदेकपरिशीलितः पन्थाः।

न च तथापि निरुक्तासाधारण्यविषयताप्रयुक्तनिरुक्तोभयाभावप्रयोजका-भावाधिकरणतायां नियमतो हेतुमत्पक्षरूपविशिष्टान्तरविषयिताप्रयुक्तत्वसत्त्वेन विशिष्टान्तराघटितत्वस्य निरुक्तासाधारण्ये विरहात् तत्राव्याप्तिरिति वाच्यम्, असाधारण्यविषयितात्वावच्छिन्नानिरूपितत्वज्ञानवैशिष्ट्यप्रयोज्याधिकरणतावृत्तित्वो-भयाभावस्य विशिष्टान्तरविषयिताप्रयोज्यतायां निवेशेन सामञ्जस्यात्।

अथ तादृशाधिकरणतानिष्ठप्रयोज्यत्वं प्रतिबन्धकतावच्छेदकतापर्याप्त्य-धिकरणघटकयावद्भिर्निरूपितमेकमेव न तु नाना कथं विशिष्टान्तरविषयिता-प्रयोज्यतायां तादृशोभयाभावनिवेशेनासाधारण्यसङ्ग्रह इति चेत्?, तथा सति तादृशप्रयोज्यतानिरूपितहेतुमत्पक्षादिविषयितानिष्ठा च प्रयोजकता नानैव, अवच्छेदकभेदात्। तासां भिन्नानामपि तत्प्रयोज्यतानिरूपितप्रयोजकतात्वेन व्यासज्यवृत्तितया महानसीयवह्न्यभावप्रतियोगितावच्छेदकतावत्पर्याप्तेरैक्येन तावद्भेदेन न प्रयोज्यताभेदः। एवञ्च ज्ञानवैशिष्ट्याप्रयोज्यत्वनिरूपितत्वा-साधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववती या विशिष्टान्तरविषयितात्व-व्यापकरूपानच्छिन्नप्रयोजकता तन्निरूपितप्रयोज्यताभावस्य विशिष्टान्तरविषयित्वा-प्रयोज्येत्यनेन विवक्षितत्वाद् हेतुमत्पक्षविषयितानिष्ठतादृशप्रयोजकतायाश्च तादृशोभयवत्त्वादिति।

अथ ह्रदो वह्निमान् वह्निमद्वृत्तिजलादित्यादौ साधनाप्रसिद्ध्यात्मक-वह्निमदवृत्तिजलेन घटिते मेयत्वविशिष्टे तत्रातिव्याप्तिः, वह्निमदवृत्ति जलं प्रमेयं जलवान् ह्रद इति ज्ञानोत्तरघटानुमितिनिष्ठप्रमेयत्वविशिष्टतादृशजलविषयिताप्रयुक्त-पक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायास्तदघटकीभूतवह्निमदवृत्तिजल-विषयिताप्रयोज्यत्वसत्त्वेऽपि तत्प्रयोज्यत्वानिरूपिततादृशविषयितानिष्ठप्रयोजकतायां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानवैशिष्ट्यप्रयोज्यतानिरूपितत्वासाधारण्यादिविषयतात्वानवच्छिन्नत्वोभयवत्त्वेन तादृशोभयाभाववद्विशिष्टान्तरविषयितानिष्ठप्रयोजकतानिरूपितप्रयोज्यताविरहस्य तादृशाधिकरणतायामक्षतत्वेन तामादाय विशिष्टान्तराघटितत्वसत्त्वात्। एवं ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः, तद्घटकीभूतवह्न्यभाववज्जलादिरूपविशिष्टान्तरविषयितानिष्ठतादृशाधिकरणताप्रयोजकताया उभयवत्त्वात्। न चासाधारण्यविषयिताप्रयुक्ताधिकरणताप्रयोजकत्वासाधारण्यविषयत्वान्यत्वोभयाभाव एव विषयितायां निवेशनीयो न तु प्रयोजकतायामुक्तोभयाभावः, तथा च नोक्तातिव्याप्तिद्वयावाकाश इति वाच्यं, ह्रदो वह्निमान् धूमादित्यादौ मेयत्वविशिष्टबाधेऽतिव्याप्तेः, वह्न्यभाववान् ह्रदः प्रमेयः वह्निव्यापकीभूताभावप्रतियोगिधूमवान् ह्रद इति ज्ञानोत्तरघटाद्यनुमितिनिष्ठपक्षधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां बाधासाधारण्यविषयकत्वयोरेव विनिगमनाविरहेण प्रयोजकतया तादृशोभयवत्त्वादिति। मैवम्, असाधारण्यविषयिताप्रयोज्यतानिरूपितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववती या विशिष्टान्तरविषयितानिष्ठप्रयोजकता तन्निरूपितप्रयोज्यत्वाभावस्य विशिष्टान्तरविषयित्वाप्रयोज्यत्वेत्यनेन विवक्षणादिति।

नव्यास्त्वसाधारण्यसङ्ग्रहाय वरमसाधारण्यविषयताभिन्नत्वतादृशोभयाभाववृत्तिभिन्नत्वोभयाभावविशिष्टविषयतावच्छेदकत्वं लक्ष्यतावच्छेदके विशेषणं देयम्। विषयतायां तादृशोभयाभाववृत्तित्वञ्च स्वावच्छेदकावच्छिन्नविषयकनिश्चयोत्तरानुमितित्वव्यापकत्वसम्बन्धेन ग्राह्यम्। एवञ्च मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणार्थं तादृशविषयतायां विशिष्टान्तराघटितत्वविशेषणमपि देयम्। तच्च स्वनिष्ठप्रयोजकतानिरूपितस्वभिन्नयत्किञ्चिद्विषयतात्वव्यापकरूपावच्छिन्नप्रयोजकत्वानिरूपितत्वोभयवत्तादृशोभयाभावप्रयोजकाभावाधिकरणतानिष्ठप्रयोज्यतावत्त्वरूपम्। अतो नानुपपत्तिलेशोऽपीति ध्येयम्।

अत्रापि धूमाभाववत्पर्वतकालीनः पर्वतो वह्निमान् धूमादित्यादावाश्रयासिद्ध्यात्मकधूमवत्पर्वते मेयत्वादिविशिष्टेऽतिव्याप्तिः, वह्निव्यापकीभूताभावप्रतियोगिधूमो धूमवान् पर्वतः प्रमेय इति ज्ञानोत्तरजातघटाद्यनुमितिनिष्ठपर्वतधर्मिकवह्निवैशिष्ट्याभावाधिकरणतामादाय विशिष्टान्तराघटितत्वसत्त्वात्, धूमवत्पर्वतविषयितानिष्ठतादृशाधिकरणताप्रयोजकताया असाधारण्यविषयितात्वानवच्छिन्नत्वासाधारण्यविषयिताप्रयोज्यतानिरूपितत्वोभयवत्त्वात्।

यदि च विशिष्टान्तरविषयितानिष्ठप्रयोजकत्वे स्वविषयितानिष्ठप्रयोजकत्वे चोभयत्रैवासाधारण्यविषयित्वानवच्छिन्नत्वासाधारण्यविषयिताप्रयोज्यतानिरूपितत्वोभयाभावं निवेश्य विशिष्टान्तरविषयितानिष्ठतादृशोभयाभाववत्प्रयोजकतानिरूपित-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रयोज्यताशून्यस्वविषयितानिष्ठतादृशोभयाभाववत्प्रयोजकतानिरूपितप्रयोज्यतावत्तादृशोभयाभावप्रयोजकाभावाधिकरणताकत्वमित्युच्यते तदा न कोऽपि दोषः। एवञ्च ज्ञानवैशिष्ट्यप्रयोज्यतानिरूपितत्वघटितप्रागुपदर्शितोभयाभावस्योभयप्रयोजकताया निवेशोऽपि साधीयानिति।

अथात्र प्राणुक्तदोषवारणाय स्वविषयितानिष्ठप्रयोजकतायां विशिष्टान्तरविषयितानिष्ठप्रयोजकतायाञ्च ज्ञानवैशिष्ट्यप्रयोज्यतानिरूपितत्वासाधारण्यविषयित्वानवच्छिन्नत्वोभयाभावनिवेशेन ध्रौव्ये निरुक्तोभयाभावविशिष्टविशिष्टान्तरविषयितात्वव्यापकरूपानवच्छिन्नप्रयोजकतानिरूपितप्रयोज्यत्वाभाववन्निरुक्तोभयाभावविशिष्टस्वविषयितात्वव्यापकरूपावच्छिन्नस्वविषयितानिष्ठप्रयोजकतानिरूपितप्रयोज्यतावदुभयाभावप्रयोजकीभूताभावाधिकरणताकत्वमित्यस्यैव सम्यक्त्वे विशेष्यदलनिवेशनमफलमिति चेत्?, न, कपिसंयोगाभाववद्वृक्षः कपिसंयोगीत्यत्र कपिसंयोगाभाववद्वृक्षेऽतिव्याप्तेः। न च यद्विशेष्यकनिश्चयस्येत्यत्राव्याप्यवृत्तित्वज्ञानानास्कन्दितत्वनिवेशस्यावश्यकतयाऽव्याप्यवृत्तित्वज्ञानानास्कन्दितकपिसंयोगाभाववद्वृक्षविषयकनिश्चयोत्तरानुमितित्वव्यापकोभयाभावस्य सत्त्वात् तन्निवेशेऽपि तत्रातिव्याप्तिरिति वाच्यम्, अव्याप्यवृत्तित्वभ्रमानास्कन्दितयद्विषयकेत्यस्यैव विशेष्यदले निवेश्यतया तत्राव्याप्यवृत्तित्वभ्रमानास्कन्दिततन्निश्चयोत्तरानुमितित्वव्यापकविरोधिविषयताप्रयुक्तत्वविशिष्टोभयाभाववत्त्वविरहादिति ध्येयम्।

प्रकृतपक्षे प्रकृतसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तियद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नविषयताशालिनिश्चयोत्तरानुमितिसामान्ये निरुक्तोभयाभावस्तद्रूपवत्त्वमिति **अत्र वदन्तीत्यस्य** निकृष्टार्थो **भट्टाचार्येण 'यत्तु'** इत्यादिना कृतः (पृ.सं. १८४)। तत्र यद्रूपावच्छिन्नविषयतायां तादृशनिश्चयावृत्तित्वरूपविरोधित्वस्य निवेशात् निर्वह्निः पर्वतो वह्निमान् इत्यत्र घटविषयकनिश्चयोत्तरानुमितिसामान्ये निर्वह्निपर्वतत्वविशिष्टवह्निवैशिष्ट्यावगाहित्वघटितोभयाभावस्य सत्त्वेऽपि न घटे तादृशस्थले दोषताप्रसङ्गः। निर्वह्निः पर्वतो वह्निमान् घटश्चेति समूहालम्बनज्ञाने घटविषयितायाः सत्त्वेन घटविषयितास्तादृशनिश्चयावृत्तित्वविरहात्।

अत्र च निश्चयपदानुपादाने ह्रदो वह्निमान् न वा वह्निव्याप्यवान् न वेति संशयात्मक-पक्षे साध्यवैशिष्ट्यावगाहिसाध्यव्याप्यहेतुवैशिष्ट्यावगाहिज्ञाने वह्न्यभाववद्ध्रदविषयताया धूमाभाववद्ध्रदविषयतायाश्च सत्त्वेन वह्न्यभाववद्ध्रदरूपबाधे स्वरूपासिद्ध्यादिदोषे च तादृशलक्षणगमनानिर्वाहः। अतो निश्चयपदम्। अथात्र निश्चयत्वं यदि तद्धर्मावच्छिन्नविशेष्यकतदभावप्रकारकत्वे सति तद्धर्मावच्छिन्नविशेष्यकतत्प्रकारकत्वं तदा निर्वह्निः पर्वतो वह्निमान् इत्यत्र पर्वतधर्मिकवह्न्यभावप्रकारकपर्वतधर्मिकवह्निप्रकारकस्य तादृशाहार्यस्यासङ्ग्रहः। न च तद्धर्मा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्न-विशेष्यकतदभावप्रकारताकान्यत्वं यत् तदेव निश्चयपदेन विवक्षणीयम्। तथा च निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्निप्रकारतानिरूपितविशेष्यतावच्छेदकता-पर्याप्त्यधिकरणवह्न्यभावपर्वतत्वोभयमेव तादृशोभयधर्मावच्छिन्नविशेष्यक-वह्न्यभावप्रकारकान्यत्वं तादृशनिश्चयेऽक्षतमेव।

अनुगमप्रकारस्तु-स्वाश्रयत्वस्वनिरूपितविशेष्यतावच्छेदकतापर्याप्त्यधिकरणी-भूतधर्मावच्छिन्नविशेष्यतानिरूपितस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभावप्रकारता-कत्वैतदुभयसम्बन्धेन तद्धर्मावच्छिन्नप्रकारताविशिष्टान्यत्वमिति (वाच्यम्?)। एवं सति नीलह्रदो वह्निमान् इत्यत्र ह्रदत्वावच्छेदेन वह्न्यभावस्य बाधतया तादृशपक्षकधूमसाध्यकहेतौ च ह्रदत्वावच्छेदेन धूमाभावस्य स्वरूपासिद्धितया तत्राव्याप्तिः। **भट्टाचार्यमते** यथा सामान्यघटितविशेषधर्मावच्छिन्नसामान्या-भावकोटिसंशयो ह्रदो महानसीयवह्निमान् वह्निसामान्याभाववान् वेत्याकारको जायते, तथा च सामान्यघटितविशेषधर्मावच्छिन्नैककोटिविशिष्टसामान्य-धर्मावच्छेदेन चापरकोट्यवगाही नीलह्रदो वह्निमान् ह्रदो वह्न्यभाववान् वा नीलह्रदो वह्निव्याप्यधूमवान् ह्रदो धूमसामान्याभाववान् इत्याकारको जायते। तथा च तादृशसंशयस्य वह्नित्वावच्छिन्नप्रकारकत्वसत्त्वेऽपि वह्नित्वावच्छिन्नप्रकारता-निरूपितविशेष्यतावच्छेदकतापर्याप्त्यधिकरणीभूतनीलत्वह्रदत्वोभयधर्मावच्छिन्न-विशेष्यतानिरूपितवह्न्यभावप्रकारकत्वाभावाद् वह्नित्वावच्छिन्नप्रकारकत्वस्य निरुक्तोभयसम्बधेन वैशिष्ट्यस्य तत्रासत्त्वात् तादृशज्ञानस्य निरुक्तनिश्चयत्वसत्त्वात् तादृशसंशये च वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताया वर्तमानत्वादतः स्वनिरूपकत्वम्। स्वनिरूपितविशेष्यतावच्छेदकतानात्मकस्वनिरूपितविशेष्यता-वच्छेदकावच्छिन्नविशेष्यतानिरूपितस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभाव-प्रकारतानिरूपकत्वैतदुभयसम्बन्धेन प्रकारतावदन्यथारूपनिश्चयत्वं निवेशितम्। तथा च निर्वह्निः पर्वतो वह्निमान् इति ज्ञाने वह्नित्वावच्छिन्नप्रकारकत्वेऽपि तादृशप्रकारतानिरूपितविशेष्यतावच्छेदकतानात्मकवह्न्यभावप्रकारतानिरूपकत्वं नास्तीति निरुक्तोभयसम्बन्धेन वह्नित्वावच्छिन्नप्रकारतावैशिष्ट्यान्यत्वं (विशिष्टान्यत्वं) निरुक्ताहार्यनिश्चयेऽस्त्येव।

न च निर्वह्निः पर्वतो वह्निमान् इति ज्ञाने वह्न्यभावे यथा वह्निप्रकारता-निरूपितविशेष्यतावच्छेदकता वर्तते तथा पर्वतत्वावच्छिन्नविशेष्यतानिरूपितधर्मिता-वच्छेदकतानात्मकप्रकारता वर्तत इति कथं तादृशाहार्यस्य सङ्ग्रह इति वाच्यं, तत्र धर्मितावच्छेदकत्वप्रकारत्वयोर्भेदमते स्वनिरूपितविशेष्यतानात्मकत्वं विहाय स्वनिरूपिते विशेष्यतावच्छेदकत्वानवच्छिन्नत्वस्योक्तत्वान्न दोषः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न चैवं सति ह्रदो वह्निमान् धूमादित्यत्र ह्रदविशिष्टवह्न्यभावेऽव्याप्तिः, ह्रदो वह्निमान् वह्न्यभावश्च ह्रद इति समूहालम्बनाहार्यस्य वह्नित्वावच्छिन्न-प्रकारकत्वसत्त्वेऽपि वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्न-विशेष्यतानिरूपितावच्छेदकत्वानवच्छिन्नवह्न्यभावप्रकारकत्वविरहेण निरुक्तोभय-सम्बन्धेन वह्नित्वावच्छिन्नप्रकारताविशिष्टान्यत्वसत्त्वात् तत्र च ह्रदविषयतानिरूपित-वह्न्यभावत्वावच्छिन्नविषयताया वर्तमानत्वेन निरुक्ततादृशनिश्चयावृत्तित्वस्य ह्रदविशिष्टवह्न्यभावत्वावच्छिन्नविषयतायामसत्त्वात् आहार्यज्ञानीयविषयताया अनाहार्यज्ञानीयविषयतातो निरूपकभेदेन भिन्नतयाऽपि ह्रदे वह्न्यभाव इति ज्ञानीय-विषयताया ह्रदो वह्निमान् वह्न्यभावश्च ह्रदे इति समूहालम्बनज्ञानीयह्रदविशिष्ट-वह्न्यभावविषयतातोऽभिन्नतया प्रामाण्यम्। केवलं ह्रदे वह्न्यभाव इति ज्ञानीय-ह्रदविशिष्टवह्न्यभावत्वावच्छिन्नविषयताया अपि तादृशसमूहालम्बननिश्चयवृत्तित्वे बाधकाभावात्। अत एव ह्रदो वह्निमान् ह्रदो वह्न्यभाववान् इति ज्ञानीय-विषयतातदप्रयोजकम् आहार्यज्ञानसमानाकारकानाहार्यज्ञानाप्रसिद्धिरिति भट्टाचार्य-लिखनं न सङ्गच्छत इति वाच्यं, स्वनिरूपकत्वस्वावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकीभूतविषयतावत्त्वैतदुभयसम्बन्धेन प्रकारताविशिष्टान्यत्वं निश्चयत्वम्। तथा च ह्रदो वह्निमान् वह्न्यभावश्च ह्रदे इति ज्ञाने ह्रदत्वावच्छिन्न-विशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतावत्त्वं वर्तते। एवं तादृशप्रकारतावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूताधेयत्वसम्बन्धावच्छिन्नह्रदत्वावच्छिन्न-प्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविषयताकत्वमपि वर्तत इत्युभयसम्बन्धेन तादृशप्रकारतावत्त्वात् तादृशज्ञानस्य न निरुक्तोभयसम्बन्धेन प्रकारताविशिष्टान्यत्वं किन्तु ह्रदो वह्निमान् इति ज्ञानस्यैव, तत्र ह्रदविशिष्टवह्न्यभावत्वावच्छिन्नविषयताया अवर्तमानत्वाद् यद्रूपपदेन ह्रदविशिष्टवह्न्यभावस्य धारणसम्भवाद्ध्रदविशिष्ट-वह्न्यभावे लक्षणसमन्वयः।

न च निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्न्यभावप्रकारतायाः सत्त्वेऽपि तादृशप्रकारताया आहार्यज्ञानमात्रवृत्तित्वेन स्वावच्छिन्नप्रतिबध्यताया अप्रसिद्धत्वेन स्वपदेन तस्य धारणं न सम्भवतीति निर्वह्निः पर्वतो वह्निमान् पर्वतश्च वह्निमान् इति ज्ञाने निरुक्तोभयसम्बन्धेन प्रकारताविशिष्टान्यत्वमस्त्येवेति तादृश-वह्निमत्पर्वतत्वावच्छिन्नविषयताया वर्तमानत्वेन वह्निमत्पर्वतस्य धारणासम्भवाद् वह्निमत्पर्वतेऽव्याप्तिरिति वाच्यं, स्वनिरूपकत्वस्वविशिष्टप्रकारतावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयतावत्त्वैतदुभयसम्बन्धेन प्रकारता-विशिष्टान्यत्वम्। प्रकारतायां वैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्नत्वस्वनिरूपित-विशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वैतदुभयसम्बन्धेन। तथा च निर्वह्निः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पर्वतो वह्निमान् पर्वतश्च वह्निमान् इति समूहालम्बनज्ञाने निर्वह्निः पर्वतो वह्निमान् इति ज्ञानीया या वह्न्यभावप्रकारता तन्निरूपकत्वं वर्तते। एवं निरुक्तोभयसम्बन्धेन तादृशप्रकारताविशिष्टा या निर्वह्निः पर्वत इति ज्ञानीयविषयता तदवच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूता पर्वतो वह्निमान् इति ज्ञानीय-विषयताऽपि वर्तत इति निरुक्तोभयसम्बन्धेन तादृशप्रकारताविशिष्टान्यत्वं तादृशसमूहालम्बनज्ञाने नास्तीति न वह्निमत्पर्वतेऽव्याप्तिः।

न च निर्वह्निः पर्वतो वह्निमान् इत्याहार्यज्ञानीयवह्निमत्पर्वतविषयताया वह्न्यभावप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वविरहेण तादृशज्ञानमपि निरुक्तोभयसम्बन्धेन प्रकारताविशिष्टान्यमेवेति तादृशज्ञानीयवह्निम-त्पर्वतत्वावच्छिन्नविषयतायास्तादृशनिश्चयावृत्तित्वेन तथापि वह्निमत्पर्वतेऽव्याप्ति-तादवस्थ्यमिति वाच्यं, भ्रमान्यवृत्तियद्रूपावच्छिन्नविषयताया तादृशनिश्चयावृत्ति-तद्रूपावच्छिन्नत्वस्य **भट्टाचार्येण** विवक्षणीयतया निर्वह्निः पर्वतो वह्निमान् इति ज्ञानीयवह्निमत्पर्वतविषयताया भ्रमान्यवृत्तित्वविरहेण भ्रमान्यवृत्तियद्रूपावच्छिन्न-विषयतासामान्यस्य तादृशनिश्चयावृत्तित्वाक्षतेः।

न चैवमपि निर्वह्निः पर्वतो वह्निमान् निर्वह्निश्च वह्न्यभाववान् इति समूहालम्बनज्ञाने या वह्न्यभावत्वावच्छिन्नविषयतानिरूपितवह्न्यभावप्रकारता तस्यां प्रतिबन्धकतानवच्छेदकतया तादृशज्ञाने निरुक्तोभयसम्बन्धेन प्रकारताविशिष्टान्यत्व-मक्षतमेवेति निरुक्तनिश्चयावृत्तित्वस्य वह्न्यभावविशिष्टवह्न्यभाववत्त्वावच्छिन्न-विषयतायामक्षतत्वाद् वह्न्यभावविशिष्टवह्न्यभाववत्यव्याप्तिरिति वाच्यं, तत्र वह्न्यभाववत्त्वावच्छिन्नविशेष्यकवह्न्यभावप्रकारताकान्यत्वस्य स्वातन्त्र्येण ज्ञाने निवेशान्न वह्न्यभावविशिष्टवह्न्यभाववत्यव्याप्तिः।

एवं वह्न्यभावस्याधेयत्वसम्बन्धेन वह्न्यभाववत्प्रकारकान्यत्वमपि तादृशज्ञाने देयमित्यतो नाधेयतासम्बन्धेन वह्न्यभाववद्विशिष्टवह्न्यभावेऽव्याप्तिः। एवञ्च निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्निविशिष्टपर्वतस्य आधेयतासम्बन्धेन पर्वतविशिष्ट-वह्न्यादीनां लक्षणसमन्वयार्थं पर्वते वह्न्यभावप्रकारकान्यत्वस्याधेयतासम्बन्धेन वह्नौ पर्वतप्रकारकान्यत्वस्य प्रातिस्विकरूपेण निवेशे गौरवात् तेषामनुगतोक्तरूपेणैव निवेशः। वह्न्यभावविशिष्टवह्न्यभावादौ च तादृशानुगमप्रकारत्वासम्भवादगत्या प्रातिस्विकरूपेणाभावनिवेशः।

न च निरुक्तोभयाभाववत्त्वनिवेशनं विफलमिति वाच्यं, यादृशस्थलविशेषे यद्व्याप्यवत्ताज्ञानं व्याप्याभावधर्मितावच्छेदककं पक्षे तदभावनिश्चयकाले न जायते पक्षे तद्व्याप्यस्य साध्यतायां तदभाववत्पक्षेऽतिव्याप्तिवारणार्थं तादृशविशिष्ट-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयकनिश्चयोत्तरानुमितिसामान्य उभयाभावस्य निवेशनसार्थक्यात्। अत एव **सव्यभिचारग्रन्थे** यद्रूपवत्ताज्ञानं साध्यसन्देहजनकमित्यस्य साध्यसन्देहजनकतावच्छेदकीभूता या या प्रकारता तत्तत्प्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वविवक्षणे व्याप्यसंशयस्य पक्षे व्याप्याभावप्रकारकत्वे सति पक्षे व्याप्यप्रकारकज्ञानत्वेन यदि कारणता तदा साध्यसन्देहजनकतावच्छेदकीभूतयावत्प्रकारतान्तर्गतव्याप्याभावप्रकारतावच्छेदकीभूतव्याप्याभावत्वस्य व्याप्येऽसत्त्वात् व्याप्येऽतिव्याप्तिर्न सम्भवति। अतः पक्षे व्याप्यप्रकारकज्ञानत्वेनैव व्याप्यसंशयस्य व्यापकसंशयहेतुत्वमत एव व्याप्येऽतिव्याप्तिः। एवञ्च व्याप्यवत्तासंशयेऽप्रामाण्यनिश्चयकाले व्यापकसंशयानुत्पत्त्या व्याप्यसंशयेऽप्रामाण्यसंशयकाले व्यापकसंशयोत्पत्त्याऽप्रामाण्यनिश्चयाभावविशिष्टव्याप्यवत्ताज्ञानत्वेनैव व्यापकसंशयं प्रति हेतुत्वस्य वाच्यतया यत्र सन्दिग्धाप्रामाण्यक—पक्षे व्याप्यवत्तानिश्चयस्तदनन्तरमपि पक्षे व्यापकसंशयोत्पत्तिरित्याशङ्क्य यादृशस्थलविशेषे पक्षे व्यापकसंशयस्येतरसकलकारणसत्त्वे पक्षे व्याप्यवत्तानिश्चयेऽप्रामाण्यसंशयो न जातस्तत्रैव व्यापकसंशयं प्रत्यप्रामाण्यनिश्चयाभावविशिष्टव्याप्यवत्ताज्ञानत्वेनैव हेतुत्वस्य वक्तुमशक्यतया तत्रैव व्याप्येऽतिव्याप्तिवारणार्थं ज्ञानपदं निश्चयपरमित्युक्तं **गदाधरेण**।

नन्वत्रापि (न चात्रापि) कल्पे मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिवारणार्थं विशिष्टान्तराघटितत्वमवश्यं निवेशनीयम्। तथा सति धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यत्र धूमाभाववद्धूमव्यभिचारिवह्निमद्ध्रदरूपबाधे धूमव्यभिचारिवह्निरूपव्यभिचारघटितेऽव्याप्तिरिति वाच्यं, पक्षविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यव्याप्यहेतुतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहिज्ञानत्वव्यापकं यद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारताकत्वं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकनिश्चयावृत्तियद्रूपावच्छिन्नविषयतासामान्यं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकनिश्चयावृत्तिस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदिका यद्धर्मावच्छिन्नविषयता तद्धर्माविषयकप्रतीतिविषयतावच्छेदकतद्रूपावच्छिन्नवत्त्वस्य निवेश्यत्वान्न दोषः। तथा च मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयता पक्षविशेष्यकसाध्यवैशिष्ट्यावगाहिपक्षविशेष्यकसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वव्यापकहेतुविशेष्यकव्याप्तिप्रकारकनिश्चयावृत्तिर्भवति। परन्तु तादृशनिश्चयावृत्तिव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वावच्छिन्नविषयतापि भवतीति व्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य मेयत्वविशिष्टव्यभिचारत्वेऽसत्त्वान्न मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वनिरूपकत्वस्वविशिष्टविशेष्यत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयतावत्त्वैतदुभयसम्बन्धेन प्रकारताविशिष्टान्यत्वमेव निश्चयत्वम्। स्ववैशिष्ट्यञ्च स्वावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वस्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वैतदुभयसम्बन्धेन। तथा च ह्रदो वह्निमान् धूमादित्यत्र ह्रदो वह्निमान् न वा ह्रदो वह्निव्याप्यधूमवान् न वेति संशये वह्नित्वावच्छिन्नप्रकारतायाः स्वनिरूपकत्वसम्बन्धेनाधिकरणत्वम्। एवं तादृशप्रकारताया निरूपकत्वसम्बन्धेनाश्रयीभूता या वह्नित्वावच्छिन्नविषयतानिरूपितह्रदत्वावच्छिन्नविषयता तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूता या समानाकारज्ञानीयैकविषयिता तदङ्गीकर्तृमते ह्रदो वह्निमान् न वेति संशयीयवह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यता तद्वत्त्वमपि वर्तत इति न निरुक्तसम्बन्धेन प्रकारताविशिष्टान्यत्वं तत्रास्तीति न तस्य निश्चयत्वमिति तादृशसंशये वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतायाः सत्त्वेऽपि न वह्न्यभाववद्ध्रदादावसम्भवः। निर्वह्निः पर्वतो वह्निमान् इत्यत्र निर्वह्निः पर्वतो वह्निमान् निर्वह्निः पर्वतो वह्निव्याप्यवांश्चेतिसमूहालम्बननिश्चयस्य वह्न्यभावप्रकारतानिरूपकत्वसत्त्वेऽपि निरुक्तोभयसम्बन्धेन प्रकारताविशिष्टान्यत्वमक्षतमेवेति तस्य निश्चयत्वनिर्वाहः।

न च निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्निविशिष्टपर्वतरूपाश्रयासिद्धिविषयतायास्तादृशनिश्चयवृत्तितया वह्निविशिष्टपर्वतरूपतादृशाश्रयासिद्धावव्याप्तिरिति वाच्यं, भ्रमान्यवृत्तियद्रूपावच्छिन्नविषयता तादृशनिश्चयावृत्तिस्तद्रूपावच्छिन्नस्यैव लक्षणे निवेशनीयतया निर्वह्निः पर्वतो वह्निमान् पर्वतो वह्निमान्-इति ज्ञानीयवह्निमत्पर्वतविषयताया भ्रमान्यवृत्तित्वविरहात्। भ्रमान्यवृत्तिर्या केवलं वह्निमान् पर्वत इति ज्ञानीयविषयता तस्याश्च तादृशनिश्चयावृत्तितया तत्र लक्षणगमनसम्भवात्।

न च ह्रदो वह्निमान् वह्न्यभावादित्यत्र ह्रदो वह्निमान् वह्निव्याप्यवह्न्यभाववांश्च ह्रद इत्यस्य निश्चयत्वानुपपत्तिः, तत्र ह्रदो वह्निमान् इति ज्ञानीयवह्नित्वावच्छिन्नप्रकारतानिरूपकत्वस्य तादृशप्रकारताविशिष्टा या ह्रदत्वावच्छिन्नविशेष्यता तन्निरूपितप्रतिबन्धकतावच्छेदकविषयतावत्त्वस्य च तत्र सत्त्वादिति वाच्यं, वह्न्यभाववदवृत्तित्वरूपवह्निव्याप्यत्वस्य स्वस्मिन् स्वावृत्तिधर्मप्रकारकज्ञानस्येव स्वमिन् स्वाधिकरणावृत्तित्वप्रकारकज्ञानस्याप्याहार्यतया वह्निव्याप्यत्वावच्छिन्नवह्न्यभावविषयतायाः प्रतिबन्धकतानवच्छेदकत्वेन निरुक्तप्रतिबन्धकतावच्छेदकीभूतविषयताघटितोभयसम्बन्धेन तादृशविषयताविशिष्टान्यत्वस्य तत्राक्षतत्वात्।

न च ह्रदो वह्निमान् वह्न्यभाववद्ध्रदकालीनजलादित्यत्र ह्रदो वह्निमान् वह्निव्याप्यवह्न्यभाववद्ध्रदकालीनजलवांश्च ह्रद इति ज्ञानीयवह्न्यभावप्रकारतानिरूपितह्रदविषयतायाः प्रतिबन्धकतावच्छेदकतया तादृशज्ञानस्य निश्चयत्वानुपपत्तिरिति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाच्यं, ह्रदधर्मिकवह्न्यभाववत्ताबुद्धिं प्रति ह्रदधर्मिकवह्निव्याप्यप्रकारकनिश्चयत्वेन प्रतिबन्धकतया ह्रदधर्मिकवह्निव्याप्यप्रकारकनिश्चयात्मकज्ञानीयवह्न्यभाववद्ध्रदविषयताया अप्याहार्यज्ञानीयत्वेन प्रतिबन्धकतानवच्छेदकत्वात्।

न च ह्रदो वह्निव्याप्यवान् इत्यत्र वह्निव्याप्याभाववान् वह्निव्याप्यवान् ह्रदो वह्न्यभाववान् वह्निमांश्चेति समूहालम्बनज्ञानस्य वह्न्यभावत्वावच्छिन्नप्रकारता-निरूपकत्वसत्त्वेऽपि निरुक्तोभयसम्बन्धेन तादृशप्रकारताविशिष्टा या ह्रदो वह्न्यभाववान् इति ज्ञानीयह्रदत्वावच्छिन्नविशेष्यता तदवच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकीभूतविषयतावत्त्वं नास्ति वह्निव्याप्याभाववान् ह्रदो वह्निव्याप्यवान् इति ज्ञानस्याहार्यतया तदीयविषयतायाः प्रतिबन्धकतानवच्छेदकत्वा-दिति तत्र समानाकारकज्ञानीयविषयताया ऐक्याङ्गीकर्तृमते ह्रदो वह्न्यभाववान् इत्याकारकभ्रमान्यवृत्तिवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतायास्तत्र सत्त्वाद्ध्रदपक्षक-वह्निव्याप्यसाध्यकस्थले वह्न्यभाववद्ध्रदेऽतिव्याप्तिर्न सम्भवतीति तादृशनिश्चयो-त्तरानुमितिसामान्य इत्यस्य वैयर्थ्यं दुर्वारमेवेति वाच्यं, यादृशस्थलविशेषे ह्रदो वह्न्यभाववान् इति ज्ञानं कदाचिदपि वह्निव्याप्यवान् ह्रदो वह्न्यभाववान् इत्याकारकाहार्यात्मकं न भवति तत्र स्थल एव ह्रदपक्षकवह्निव्याप्यसाध्यकस्थले वह्न्यभाववद्ध्रदेऽतिव्याप्तिवारणार्थं सामान्यान्तस्य सार्थक्यसम्भवादिति।

न च यादृशस्थलविशेष उदासीनघटादिविषयकं निर्वह्निः पर्वतो वह्निमान् इत्याहार्यज्ञानं न जातं तत्र घटादावतिव्याप्तिः, तत्र निर्वह्निः पर्वतो वह्निमान् इत्याकारक-प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिनिश्चयावृत्तित्वस्य तादृशोदासीन-पदार्थविषयतायां सत्त्वादुदासीनपदार्थविषयकनिश्चयोत्तरानुमितिसामान्ये पर्वतत्व-विशिष्टे वह्निवैशिष्ट्यावगाहित्वघटितोभयाभावसत्त्वादिति वाच्यम्, एतादृश-समशीलकल्पमादृत्यास्वरसस्य **जगदीशेन** दत्तत्वात्। अत्र वदन्तिकल्पेऽस्वरस एव तत्स्थले।

न च घटवद्ध्रदकालीनह्रदो वह्निमान् घटाभाववद्ध्रदकालीनधूमादित्यत्र प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिप्रकृतसाध्यव्याप्यहेतुवैशिष्ट्यावगाहिनिश्चया-प्रसिद्धिः, घटत्वावच्छिन्नविषयतानिरूपिता या ह्रदत्वावच्छिन्नविषयता तन्नि-रूपकत्वस्य तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयतायां प्रकृतपक्षे प्रकृतसाध्यविषयताबहिर्भूतत्वस्य प्रकृतपक्षे प्रकृतसाध्यव्याप्यहेतुविशिष्ट-विषयताबहिर्भूतत्वस्य च निवेशनीयत्वात्। घटवद्ध्रदकालीनह्रदो वह्निमान् तादृशह्रदो वह्निव्याप्यघटाभाववद्ध्रदकालीनधूमवान् इति ज्ञाने घटत्वाच्छिन्न-प्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता-वच्छेदकतायाः सत्त्वेऽपि तादृशविषयता न प्रकृतपक्षे प्रकृतसाध्यव्याप्यहेतुविषयता-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बहिर्भूता। एवं घटाभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकघटत्वावच्छिन्नविषयतानिरूपितह्रदत्वा-वच्छिन्नविषयतायाः सत्त्वेऽपि तादृशविषयता न प्रकृतपक्षे प्रकृतसाध्यविषयता-बहिर्भूतेति न तादृशस्थले निश्चयत्वानुपपत्तिः।

न च तादृशज्ञाने घटाभाववद्ध्रदविषयतायास्तादृशप्रकृतपक्षे साध्य-वैशिष्ट्यावगाहित्व-प्रकृतपक्षे प्रकृतसाध्यव्याप्यहेतुवैशिष्ट्यावगाहिनिश्चयवृत्तितया घटाभाववद्ध्रदस्य दोषत्वानुपपतिरिति वाच्यं, भ्रमान्यवृत्तित्वस्याव्यापकी-भूतविषयिताशून्यज्ञानवृत्तित्वस्य वा यद्रूपावच्छिन्नविषयतायां निवेशनीयतया निरुक्तज्ञाने या घटाभाववद्ध्रदविषयता तस्यास्तादृशज्ञानीयत्वविरहात् तादृशज्ञानीया या ह्रदो घटाभाववान् इतिज्ञानीयविषयता तस्याश्च तादृशनिश्चयावृत्तित्वे लक्षणसमन्वयसम्भवात्।

न च भ्रमान्यवृत्तित्वस्य यद्रूपावच्छिन्नविषयतायां निवेशेऽपि ह्रदो वह्निमान् जातिमान् वह्न्यभाववान् ह्रदो वह्निव्याप्यवांश्चेति समूहालम्बनज्ञाने भ्रमान्यद् यज्जातिमान् वह्न्यभाववान् इत्याकारकजातिसामानाधिकरण्येन वह्न्यभावावगाहि-ज्ञानं तदीयविषयतायाः सत्त्वेन वह्न्यभाववद्ध्रदादावतिव्याप्तिरित्यतो यद्रूपावच्छिन्न-विषयत्वाव्यापकीभूतविषयताशून्यज्ञानवृत्तित्वमेव यद्रूपावच्छिन्नविषयतायां निवेशनीयम्। एवं वहन्यभाववान् ह्रदो वह्निमान् इत्याहार्यज्ञानीयवह्न्यभाव-वद्ध्रदत्वावच्छिन्नविषयताया अव्यापकीभूतविषयताशून्यज्ञानवृत्तित्वविरहादेवा-व्यापकीभूतविषयताशून्यज्ञानीयविषयतासामान्ये तादृशनिश्चयावृत्तित्वं सम्भवतीति **भट्टाचार्यो**क्तभ्रमान्यवृत्तित्वनिवेशनं निष्प्रयोजनमिति वाच्यं, सम्बन्धघटक-विशेष्यतायां यत्प्रकारतावैशिष्ट्यं तत्र यत् स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वं तत्र निरवच्छिन्नावच्छेदकताकत्वरूपं न निविष्टमिति। ह्रदो वह्निमान् इति ज्ञानीया या प्रकारता तद्विशिष्टा जातिमान् वहन्यभाववान् इति ज्ञानीयविशेष्यता भवतीति तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतविषयताया जातिमान् वहन्यभाववान् ह्रदो वह्न्यभाववान् वह्निव्याप्यधूमवांश्चेति समूहालम्बनज्ञाने सत्त्वात् तादृशज्ञानस्य निरुक्तनिश्चयत्वाभावादेवाव्यापकीभूतविषयताशून्यत्वस्य निवेशे प्रयोजनाभावात्।

न चैवं निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्निमत्पर्वतरूपाश्रयासिद्धिस्तत्र वह्निमज्जातिमत्यतिव्याप्तिः, निर्वह्निः पर्वतो वह्निमान् जातिमाँश्च वह्निमान् इति ज्ञाने पर्वतत्वावच्छिन्नविशेष्यतानिरूपिता या वह्न्यभावत्वावच्छिन्ना प्रकारता तद्विशिष्टा निरुक्तोभयसम्बन्धेन विशेष्यता सा जातिमान् वह्न्यभाववान् इति ज्ञानीयापि भवति तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूत-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयतावत्त्वस्य तत्र सत्त्वात् निरुक्तसम्बन्धेन प्रकारताविशिष्टान्यत् न तज्ज्ञानं भवति किन्तु वह्निमज्जातिमद्विषयकमेव प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिज्ञानमेव भवति तत्र च वह्निमज्जातिमद्विषयताया अवर्तमानत्वाद्वह्निमज्जातिमद्विषयकनिश्चयोत्तरानुमितिसामान्ये च निर्वह्निपर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वघटितोभयाभावसत्त्वादिति सम्बन्धघटकीभूतविशेष्यतावच्छेदकावच्छिन्नत्वं विशेष्यतावच्छेदकनिविष्टनिरवच्छिन्नावच्छेदकताकत्वं विशेष्यतावच्छेदकतावच्छेदकावच्छिन्नावच्छेदकताकविशेष्यताकत्वं वा कुत्रचिद्देयम्। तथा च ह्रदो वह्निमान् धूमादित्यत्र ह्रदो वह्निमान् जातिमान् वह्न्यभाववान् इति ज्ञानमपि निरुक्तप्रकारताविशिष्टान्यज्जातम्। तत्र वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयताया वर्तमानत्वेनासम्भववारणायाव्यापकीभूतविषयताशून्यज्ञानीयत्वमवश्यं देयमिति भ्रमान्यवृत्तित्वं व्यर्थमेवेति वाच्यं, संयोगवान् इत्यादौ संयोगः संयोगवान् इत्याश्रयासिद्धिभ्रमविषयसंयोगत्वावच्छिन्नेऽतिव्याप्तिवारणार्थं भ्रमान्यवृत्तित्वस्य यद्रूपावच्छिन्नविषयतायामव्यापकीभूतविषयताशून्यज्ञानीयत्वनिवेशोऽप्यवश्यं निवेशनीयत्वात्। अन्यथा संयोगः संयोगवान् इति बाधभ्रमस्यापि संयोगत्वावच्छिन्नविषयत्वाव्यापकीभूतविशयताशून्यज्ञानीयतया तदीयविषयताया अस्मदुक्तप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावागाही यः पूर्वोक्तनिश्चयस्तदवृत्तितया तादृशविषयताशालिनिश्चयोत्तरानुमितिसामान्ये निरुक्तोभयाभावसत्त्वाच्चेति वाच्यं, यद्रूपावच्छिन्नविशेष्यतानिरूपितयद्रूपावच्छिन्नविषयत्वं प्रकृतह्रदावच्छिन्नप्रकारत्वाभावस्तच्छून्यत्वस्य विवक्षितत्वान्न तत्र वह्न्यभाववद्ध्रदे दोषः। वह्न्यभाववद्ध्रदविषयतातद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितित्वव्यापको यस्तद्रूपावच्छिन्नविशेष्यतानिरूपितमिति सामान्ये ह्रदत्वविशिष्टे वह्निव्याप्यवैशिष्ट्यावगाहित्वाभावासत्त्वात् तत्रातिव्याप्त्यसम्भवादिति कृतं पल्लवितेन॥

॥ पण्डितकुलपतिना बी.ए. उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण सङ्कलितः सामान्यनिरुक्तेर्गादाधरीटीकावादार्थः सम्पूर्णः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञ-विचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. **''वित्त अधिकारी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन ('बैङ्कड्राफ्ट' अथवा 'पोस्टल-आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **''सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन विधेयः।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्जीकरणसंख्या—६९८१/५८

सुसङ्ग्राह्याणि अभिनवप्रकाशनानि

१. **कातन्त्रव्याकरणम्** : आचार्यशर्ववर्मप्रणीतो व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थः श्रीदुर्गसिंहकृताभ्यां **कातन्त्र-वृत्ति-टीकाभ्यां**, श्रीमत्त्रिलोचनदासकृतया '**कातन्त्रवृत्तिपञ्जिका**' टीकया, कविराजसुषेणशर्मकृतया '**कलापचन्द्र**' टीकया, अथ च डॉ. जानकीप्रसादद्विवेदिकृतया **समीक्षया,** विवरणात्मिकया भूमिकया, अनुसन्धानात्मक-परिशिष्टैश्च सनाथीकृत्य सुसम्पाद्य प्रकाशितः —

प्रथमो भागः	३५०.००	द्वितीयो भागः खण्डम्-१	५००.००
द्वितीयो भागः खण्डम्-२	६००.००	तृतीयो भागः खण्डम्-१	४८०.००
तृतीयो भागः खण्डम्-२	५००.००	चतुर्थो भागः	८००.००

२. **परशुरामकल्पसूत्रम्** : तन्त्रशास्त्रस्य सूत्रात्मकोऽयं ग्रन्थस्तन्त्रसिद्धान्तैः सह सर्वासामुपासनानां प्रतिपादकोऽस्ति। श्रीरामेश्वरवृत्तेर्मुख्यांशेन समलङ्कृतो **नीरक्षीरविवेका**भिधेन **भाषाभाष्येण** संवलितः प्रो. विद्यानिवासमिश्रैः, डॉ. परमहंसमिश्रैश्च सुसम्पाद्य प्रकाशितः — २८०.००

३. **सौभाग्यरत्नाकरः** : तन्त्रशास्त्रस्य समृद्धोऽयं ग्रन्थः श्रीविद्यानन्दनाथविरचितः सौभाग्यसंवर्द्धनस्य सदुद्देश्येन तरङ्गायितः श्रीविद्यायाः सम्प्रदायसिद्धानां राद्धान्तानां समुपासनपद्धतीनाञ्च प्रतिपादको रत्नाकरसदृशो विराजते। स्वात्मविमर्शाख्यया भूमिकया विभूष्य डॉ. परमहंसमिश्रैः सम्पाद्य प्रकाशितः— ३५०.००

४. **प्राणतोषिणी** : श्रीरामतोषणभट्टाचार्येण प्रणीतस्तन्त्रशास्त्रस्य महनीयोऽयं ग्रन्थः। अस्य प्रथमभागस्य विषयवस्तु सर्ग-धर्म-अर्थेति काण्डत्रयेण विभज्य प्रस्तुतम्। ग्रन्थोऽयं सुविस्तृतया भूमिकया समलङ्कृत्य डॉ. हरिवंशकुमारपाण्डेयेन सुसम्पाद्य प्रकाशितः— प्रथमो भागः ४५०.००
द्वितीयो भागः ४६०.००

५. **जैमिनीयं सामगानम्** : जैमिनिमुनिना प्रणीतं ग्रन्थरत्नमिदं द्वितीयसंस्करणात्मकं प्रकाशतामानीतम्। ग्रन्थेऽस्मिन् सामगानस्यानेकेषां छन्दसामुपबृंहणमस्ति। ग्रन्थोऽयं श्रीरामनाथदीक्षितस्य विस्तृतया भूमिकया सुशोभितोऽस्ति— २००.००

६. **केदारखण्डः** : स्कन्दपुराणीयमाहेश्वरखण्डान्तर्गतकेदारखण्डस्य प्रकाशनं प्रो. वाचस्पतिद्विवेदिनो **हिन्दी-भाषानुवादेन** सह कृतमस्ति। पौराणिककथानकैः सत्कर्मणो भगवत आशुतोषस्य भक्तिभावनायाः सततं प्रेरणाप्रदाने पूर्णरूपेण सक्षमोऽयं ग्रन्थः। प्रो. द्विवेदिनो विस्तृतया भूमिकया सनाथितोऽयं प्रकाशितः— प्रथमो भागः ४६०.००
द्वितीयो भागः ५००.००

७. **सात्वतसंहिता** : वैष्णवतन्त्रस्य मूर्धन्यतमोऽयं ग्रन्थः अलशिङ्गभट्टस्य व्याख्यया सनाथितः प्रकाशतामानीतः। श्रीव्रजवल्लभद्विवेदिना सम्पादितस्य सभाष्यस्य ग्रन्थस्यास्य द्वितीयं संस्करणं प्रस्तूयते— ३६०.००

८. **श्रीमालिनीविजयोत्तरतन्त्रम्** : तन्त्रशास्त्रस्य ग्रन्थोऽयं डॉ. परमहंसमिश्रस्य '**नीरक्षीरविवेक**' भाषाभाष्येण समलङ्कृत्य प्रकाशतामानीतः। ग्रन्थोऽयं सम्पूर्णाध्वावर्गोपरि स्वकीयां स्वतन्त्रां दृष्टिं प्रस्तौति। स्वात्म-विमर्शात्मिकया भूमिकया विभूष्य डॉ. परमहंसमिश्रैः सम्पादितोऽयं ग्रन्थः प्रकाशितः— २४०.००

९. **बौद्धदर्शन और मार्क्सवाद** (परिसंवाद-६) : विश्वविद्यालयस्यास्य श्रमणविद्यासङ्कायेन समायोजितायां सङ्गोष्ठ्यां विश्रुतैर्विद्वद्भिः पठितानां विशिष्टनिबन्धानां सङ्कलनं विहितम्। संस्कृत-हिन्दी-आङ्ग्ल-भाषामयान् निबन्धान् सङ्कलय्य डॉ. रमेशकुमारद्विवेदिना सम्पादितोऽयं ग्रन्थः प्रकाशितः— ३६०.००

१०. **मैत्र्युपनिषद्** : श्रीरामतीर्थविरचितया '**दीपिका**' ख्यसंस्कृतव्याख्यया, प्रो. ओमप्रकाशपाण्डेयेन सनाथितया **हिन्दीव्याख्यया** विस्तृतया भूमिकया सम्भूष्य सम्पाद्य च प्रकाशितोऽयं ग्रन्थः— १८०.००

११. **श्रीमद्भागवत में सांख्ययोग के तत्त्व : एक परिशीलन** : श्रीमद्भागवतस्य दार्शनिकविश्लेषणात्मकोऽयं ग्रन्थः प्रो. विमलाकर्नाटकमहोदयाभिर्हिन्दीभाषायां प्रणीतः। दर्शनेतिहासाख्यपटलद्वयेन विभक्तोऽयं ग्रन्थो विस्तृतया भूमिकया परिशिष्टादिभिश्च सम्भूष्य सम्पाद्य च प्रकाशितः— ४००.००

१२. **तत्त्वबिन्दुः** : श्रीवाचस्पतिमिश्रप्रणीतोऽयं ग्रन्थः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विश्वविश्रुतस्य सरस्वतीभवन-पुस्तकालयस्य हस्तलिखितपाण्डुलिपिमाधारीकृत्य डॉ. रजनीशकुमारशुक्लेन सम्पादितः प्रकाशतामानीतः— १२०.००

१३. **शिवलीलार्णवः** : महाकविना श्रीनीलकण्ठदीक्षितेन प्रणीतं द्वाविंशसर्गात्मकं महाकाव्यमिदं भगवतः शिवस्य चतुष्षष्टिलीलानां लालित्यपूर्णं वर्णनं प्रस्तौति। सुविस्तृतया भूमिकया विविधैः परिशिष्टैश्च सम्भूष्य डॉ. ददन-उपाध्यायेन सम्पादितमिदं महाकाव्यं प्रकाशितम्— २००.००

पत्रव्यवहारसङ्केतः— **निदेशकः**, प्रकाशनसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri